MADRAS.

A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1910-11 TO 1912-13

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, AND CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS,

AND

S. KUPPUSWAMI SASTRI, M.A.,

PRINCIPAL, SANSKRIT COLLEGE, TIRUVADI, AND FOR SOME TIME AG. PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, AND AG. CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

Prepared under the orders of the Government of Madras.

VOL. I.—PART I. SANSKRIT, A.

MADRAS:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1913.

TABLE OF TRANSLITERATION.

—		Consonants.	Semi-vowels, Sibilants and Aspirate.	Vowels.	Diph-thongs.
Gutturals	...	k kh g gh ṅ	h ḥ	a ā	e ē ai
Palatals	...	c ch j jh ñ	y ś	i ī	
Linguals	...	ṭ ṭh ḍ ḍh ṇ	r r̤ l̤ ṣ	ṛ ṛī	
Dentals	...	t th d dh n	l ḻ s	ḷ ḷī	
Labials	..	p ph b bh m	v	u ū	o ō au

ALPHABETICAL SYNOPSIS OF SUBJECT HEADINGS.

[Reference is given to the pages of the subject index.]

ADDENDA AND CORRIGENDA.

Page	Line	For		Read
77	22	Śrīnivāsācārya	...	Śrīnivāsarāghavācār-ya.
78	4	Do	...	Do.
101	18	Omit विराटपर्व.		
	19	Omit Virāṭaparva.		
	22	Add after '77', 'in Virāṭaparvan.'		
117	13	Brother of Appaya dīkṣita.		Brother of a disciple of Appayadīkṣita
164	11	वन्धात्व	...	वन्ध्यात्व.
287	19	ரகஸ்யத்ரயம்	...	நிகமனப்படி.
	20	Rahasyatrayam	...	Nigamanappaḍi.
	21	Foll. 16a—22a	...	Foll. 16a—22b.
308	7	ரகஸ்யத்ரயம்	...	முமுக்ஷுப்படி.
	8	Rahasyatrayam	...	Mumukṣuppaḍi.
610	20	R. No. 341(a)	...	R. No. 343(a).
736	8	Tenali	..	Vizianagaram.
753	21	981	...	918.
760	4	Tenali	...	Vizianagaram.
862	27	Omit (a).		
867	24	1033	...	1038.
1016	12	Add (a) before वेदान्तकण्टकाद्धारः.		
		Insert between lines 13 and 14 'Foll. 1a—435b.'		
1017	2	Add the following before the "End" :—		

End :

मुमुक्षोरौपनिषदविचार आरभ्यत इत्युक्तचा कथं वा श्रवणविध्यधीनो ब्रह्मविचार इत्युपपादयेत् इत्यलं घुणविघूर्णनाय राघवशिलीमुखेनेति । ततश्च प्रतिपन्नरूपमेव जिज्ञासाव्या(धि)करणं रमणीयमिति । कर्मफला-

त्यास्थिरत्वनिर्णयसहितब्रह्मज्ञानानन्तास्थिरफलत्वापातप्रतीत्या ब्रह्मजिज्ञासायामधिंकरोतीति निष्कण्टकोऽसौ वैदिकघण्टापथः ।

लब्धात्मा जनकाद्वरप्रदगुरोः श्रीश्रीनिवासाभिधा-
द्भ्रातुर्लब्धयतीन्द्रभाष्यविभवोत्कर्षः पितृव्यात्ततः ।
श्रीमल्लक्ष्मणदेशिकादधिगतव्यासार्यसूक्तिक्रमः
श्रीमच्चम्पकनायकः परगिरां प्राचीकशत्फल्गुताम् ॥

* * * *

अविरतसुधाधारासोदर्यसंभृतवैखरी-
परिहृतपरीतापप्रोद्यन्निबन्धनबन्धुरम् ।
जयति कुशिकस्तोमाकूपारनिस्तुलकौस्तुभो
यतिवरगिरां सारग्राही रमानिधिदेशिकः ॥

* * * *

व्यासाचार्यवचोभिरेव निहता मुण्डीप्रलापास्तथा-
प्येकीकृत्य तदर्थजातघटनादेषा कृतिः सार्थिका ।
प्रष्ठा कोटिदिशा प्रदर्शयितुमप्येतत्तदुक्ता(क्तौ) वयं
शक्ताश्चेदपि विस्तरक्रमभिया नैवं कृता प्रक्रिया ॥

Colophon:

इति हारीतान्वयपारिजातरामानुजार्यसमरपुङ्गवाचार्यकारुण्यकलितसत्ताककौशिकवरदाचार्यचरणारविन्दविन्यस्तात्मभरस्य चम्पकेश्वरस्य कृतिषु वेदान्तकण्टकोद्धारे प्रथमसूत्रपरिशोधनं संपूर्णम् ॥

श्रीमान्नारायणो देवश्चेतनाचेतनात्मकः ।
प्रतिपाद्यः कृतेरस्याः प्रीयतामनया ध्रुवम् ॥

(6) जीवाणुत्वसमर्थनम्.

JĪVĀṆUTVASAMARTHANAM.

Foll. 436a—454a.

A treatise on Viśiṣṭādvaitavēdānta in support of the view that the individual soul is not all pervading in its nature ; by Campakēśācārya, a disciple of Varadaguru

Beginning :

लक्ष्मीं पक्ष्मलयन्तु लक्ष्मणमुनेरक्षुण्णवीक्षोद्गमाः
साक्षाद्ब्रह्मनिरीक्षणक्षममतिक्षेमैकदत्तेक्षणाः ।
रक्षःपक्षनिरीक्षलक्षणमृषाशिक्षार्थकक्ष्याक्षपा-
क्षिप्रक्षोभविपक्षतक्षणकलातक्षाप्रभातक्षणाः ॥

*　　*　　*　　*

हयवदनकटाक्षैर्हारिभिर्देशिकानां
वरदगुरुमुखानां दृष्टिभिश्चाद्भुताभिः ।
चरितनिगमसीमा चम्पकाधीशनामा
प्रथयति बहुमानं जीवमानं विपश्चित् ॥

आथर्वणे श्रूयते—'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश' इति । तत्र संशयः—जीवधर्मतया प्रतीयमानमणुत्वं किं स्वाभाविकमाहोस्विदौपाधिकमिति ।

Page	Line	
1031	6	Omit सारार्थदीपः.
	7	Omit Sārārthadīpaḥ.
	12	Add the following after 'Conjeeveram':— The commentary on the first Anuvāka is called Darpaṇa, and that on the second, Sārārthadīpa.

Page	Line	
1031	27	Add the following before " End ":-

End :

सचन्ते प्राप्नुवन्ति । तस्माद्दूरद एव सर्वेषामनुभाव्य इति भावः । अत एव वेदान्ताचार्यैरेवमुक्तम्—

निरन्तरं निर्विशतस्त्वदीयमस्पृष्टचिन्तापदमाभिरूप्यम् ।
सत्यं शपे वारणशैलनाथ वैकुण्ठवासेऽपि न मेऽभिलाषः ॥

इति । हेत्याश्चर्ये । इयत्तानवच्छिन्नः श्रीहस्तिगिरिमहिमेति भावः । एतत्सर्वं महद्भिरवगतमिति सर्वं समञ्जसम् ॥

श्रीमद्वाधूलवरदवल्लभाचार्यनिर्मितम् ।
श्रीमत्पुरुषसूक्तार्थदर्पणं वेत्ति यः स सन् ॥

Colophon :

इति श्रीमद्वाधूलकुलतिलकश्रीदेवराजार्यतनयस्य श्रीवरदवल्लभाचार्यस्य कृतिषु श्रीमत्पुरुषसूक्तार्थदर्पणः संपूर्णः ॥

Beginning :

श्रीमते देवराजाय पुण्यकोटिनिवासिने ।
ब्रह्मप्रतिष्ठितायास्तु श्रीभूमिपतये नमः ॥
श्रीमत्पुरुषसूक्तस्य सारार्थप्रतिपादकः ।
य उत्तरानुवाकोऽस्ति तस्य तात्पर्यमुच्यते ॥

INTRODUCTION.

IT was the practice till recently to issue along with the annual report on the working of this Library a columnar list (as Appendix B) showing the names of the works collected in the year together with the author's name, the subject matter, the extent thereof, the condition of the manuscript, and other such details. This list, although prepared with great care and attention, was lacking in some of the necessary details that would be ordinarily looked for in a descriptive catalogue; and when printed, it was neither supplied freely to scholars nor sold to the public. Thus the new acquisitions added from time to time to the library have had to remain practically unknown to scholars interested in them, except to those few who happened to visit the Library in person. In G.O. No. 323, Educational, dated the 6th June 1910, the Government ordered the report on the working of this Library to be submitted once in three years, and this is the first triennial report of the kind so required. This opportunity has been availed of, with the permission of the Director of Public Instruction, Madras, for issuing a descriptive catalogue of all the manuscripts acquired during the triennium. The acquired manuscripts are not, in this triennial catalogue, grouped according to subject matter for the purpose of description; they are mostly dealt with in the order of the time of their acquisition. After the description of a manuscript is given, all the works contained therein are noted down and described irrespective of the subjects with which they deal. The manner and the time of the acquisition of the manuscript, and the person from whom it was obtained for the Library, are also mentioned in the description. The date of transcription and the name of the scribe, whenever they may be gathered from the manuscripts, are also given as mentioned in them. The serial numbers given to the descriptions of the manuscripts in this catalogue have the letter R prefixed to them in order to show that they belong to the report catalogue and thus to distinguish them from the numbers given in the descriptive catalogues of the old collections of the Library, which are also being issued.

2. The first part relates to the description of the Sanskrit manuscripts acquired during the triennium under report, and consists of three volumes each dealing mostly with a year's collection. As

these volumes are intended to form a supplement to the Descriptive Catalogue of the Sanskrit Manuscripts in the Library, references are here given to this catalogue in the case of all such works as have been already described in the sixteen volumes thereof issued till now. Most of the other works not already dealt with in the Descriptive Catalogue are fully described in this Triennial Catalogue. To facilitate reference and thus be of help to research work, a subject index, an author index and a general index are all added. The subject index is made to give information as to whether the manuscripts collected are new discoveries, or new acquisitions to the Library, or are useful additional copies. Attention is also drawn below to a few of the important works described in this triennial collection:—

Sāmavēdabrāhmaṇabhāsyam, 651.—This contains the commentary by Sāyaṇācārya on the Sāmavidhāna-Brāhmaṇa, copies of which commentary are somewhat rarely to be had.

Puruṣasūktavyākhyā, 783.—This illustrates how some of the Vēdic Mantras have been utilized to support the Vēdāntic, the Purāṇic and the Āgamic doctrines of religion and philosophy. Varadavallabha, a follower of Rāmānuja's Śrīvaiṣṇavism, here interprets this well-known Vēdic hymn so as to make it refer to God Varadarāja as worshipped in one of the Viṣṇu shrines at Conjeeveram. The commentary on the Sūkta itself is called Purusasūktārthadarpaṇa; and the commentary on the Uttarānuvāka is called Sārārthadīpa. The author quotes from Vēdāntadēśika's Varadarājapañcāśat and Srīvatsāṅkamiśra's Varadarājastava and the Pāñcarātrāgamas. He also quotes from a hitherto unknown work called Vādhūlasūtra.*

Nos. 77, 78 and 80 to 83 containing commentaries on six of the well-known ten important Upanisads according to the Viśiṣṭādvaita school of the Vēdānta are understood to be the production of a living writer named Muḍumbai Narasiṃhācārya.

Śvētāśvatarōpaniṣatprakāśikā, 438 is another commentary belonging to the same Viśiṣṭādvaita school and is the work of Rāṅgarāmānujamuni, a famous author of commentaries on the ten Upaniṣads, many of which commentaries have been published in the Anandasrama Sanskrit Series. He seems to

* The quotations run thus :—

(1) वसन्ते बहुलमाज्यं भवति। ग्रीष्मे पलाशसमिधो बह्व्यो भवन्ति। शरदि हवींषि बहुलानि भवन्ति । तस्मादेतेष्वाज्यं समित्पुरोडाशं च संपाद्य वाजपेयेन यजन्ति। तस्य फलासङ्गयजनात् साध्यानामीधपतिर्भवतीति ॥ (2) पूर्णत्वात्पुरुष इति विज्ञायते ॥

have lived* about the end of the fifteenth or the beginning of the sixteenth century.

Taittirīyōpaniṣadvyākhyā: Mitākṣarā, 17—by Gōvindarāja, who may be identified with the commentator on the Rāmāyaṇa. He is said to have belonged to the Kauśikagōtra and to be a disciple of Śaṭhakōpadēśika, who, according to the extract given under No. 462 in Dr. Hultzsch's Report No. 1, belonged to the Vatsagōtra.

Tripurātāpinyupaniṣadbhāṣya, 611 (*a*)—Rāmānanda, the commentator here is not the same as Rāmānandāśrama, the disciple of Krsṇāśrama, as he is declared to have been a disciple of Rāghavānandatīrtha.

Āśvalāyanaśrautasūtrabhāṣya, 4 and *Kātyāyanaśrautasūtrabhāṣya,* 511.—These are rare acquisitions to the Library as the followers of these ritual schools are rare in this part of the country. Copies of Kapardisvāmin's commentaries on the *Āpastambaśulbasūtra,* 151 (*b*) and 777 are useful and have been acquired with a view to prepare a correct collated copy of the work for the press. *Cayanakārikā,* 151 (*c*), and *Syēnakārika,* 360 are two metrical treatises relating to the construction of sacrificial altars; and *Vājapēyakalpasūtra,* 634 (*i*), *Vājapēyakalpabhāṣya,* 634 (*h*) and *Vājapēyakārikā,* 634 (*b*), relating to the performance of the Vājapēya sacrifice, help to explain the details connected with it.

Kuṇḍadarpaṇa, 349.—This treatise on the construction of sacrificial fire-places is said to have been composed in Śaka 1646.

Raṅganāthādhvarin, the author of *Kratuvaiguṇyaprāyaścitta,* 634 (*g*), who is said to have commented upon Siddhāntakaumudī, mentions the Audgātraprayōga of Varadarāja, whose two other works *Ahīnakalpa* and *Pratihārasūtrabhāṣya* are here noticed [*vide* Nos. 634 (*e*) and 649] (*a*).

A commentary on the *Kauṣītakagṛhyasūtra,* 40, restored from a manuscript of the Library, and *Sāṭhyāyanagṛhyakārikā,* 648 (c) are two rare works in Kalpasūtra literature.

Mahābhāṣyadīpikā, 798.—The only manuscript of this work, now known, is in the Royal Library at Berlin; and a photographic copy of it has been obtained for this Library. Bhartṛhari, the author of this work is considered to be the same as the author of Vākyapadīya, and is further identified by some with the author

* Raṅgarāmānujamuni is said to have been the disciple of Pañcamatabhañjana Tātācārya, who was himself a disciple of the first Ahōbilasvāmin. This last mentioned person was, according to a Guruparamparā, a disciple of Ghaṭikāśatakam Ammāl, who was a disciple of Nayinārācārya, the son of Vēdāntadēśika. Tradition says that Raṅgarāmānuja, Mahācārya, and Appayadīkṣita were contemporaries.

of Śubhāsitaśatakas. Vardhamāna in the commentary on the first stanza of his Gaṇaratnamahōdadhi states that this author commented on the first three Pādas of the Mahābhāsya.

Dhātupradīpa, 755 of Maitrēyaraksita, who is quoted by Mādhava in his Dhātuvṛtti and who in his turn quotes the Rūpāvatāra of Dharmakīrti, and Ksīrasvāmin's *Kṣīrataraṅgiṇī*, 794 are two standard works on Sanskrit verbs prior to the time of Mādhava. Three commentaries on *Laghuśabdēnduśēkhara*, two on *Paribhāṣēnduśēkhara* and three on *Siddhānta Kaumudī* in this triennial collection show to what extent the works of Bhaṭṭōji and his school have displaced the older treatises on Sanskrit grammar in Southern India.

Kākatālīyavādārtha, 675, *Mādhavābhāraṇa*, 597 and Appayadīksita's *Pāṇinīyavādanakṣatramālā*, 632 are polemical treatises relating to the discussion of certain grammatical points arising out of Pāṇini's work.

Of the six commentaries on the Rāmāyaṇa acquired during the triennium, two, viz , *Sarvārthasāra*, 144 (*a*) and *Vālmīkibhāvaprakāśikā*, 508, are new additions to the considerable number of commentaries thereon already known.

Under Purāṇas, etc., books giving a legendary account of the sanctity and importance of the Śaiva as well as Vaisnava shrines at Mannargudi, Kumbakonam, Vaidisvarankoil, and Kaṇḍiyūr in the Tanjore district, and Benares have been newly added to the Library.

Nāradasmṛti, 785 (*b*).—From the portion contained in the manuscript it appears that this is one of the few Smṛtis which deal with the rites relating to the conduct of the worship of Viṣṇu.

Mānavōllāsa, 387 (*b*).—This modern work of Appakoṇḍācārya is intended to establish the supreme authoritativeness of Manu's Smṛti among the Smṛtis.

Sadācārasmṛtivyākhyā, 453 (*c*).—This work which is based on the Smṛtis is accepted as authority for the guidance of religious conduct largely by the followers of Ānandatīrtha.

Smārtapaddhativivēcanikā, 412.—The author, Yajñanārāyaṇasūri, gives in this work quotations from Sudarśana's commentary on Āpastambagṛhyasūtra.

Smṛtiratna, 442.—According to this work, which in the portion contained in this manuscript treats of Ahnika or the daily religious conduct of life, Bhōjarāja appears to have written a treatise on Dharmaśāstra ; and Vyavahāranirṇaya happens to be a work of that kind attributed to this royal author in the Catalogus Catalogorum.

Dharmajñasāmayaprāmāṇyaprakāśikā, 129.—This is apparently intended to support certain observances of the Śrī-Vaiṣṇavas of Southern India which are not expressly sanctioned by the Smṛtis.

Śiṣṭācāraprāmāṇya, 653 is a similar treatise.

Sacchūdrācāranirṇaya, 24 (*a*).—This is a treatise intended for the guidance of Śūdras in the matter of their duties of cleanliness, purity and social relationship; and it is worthy of note that the author Cikkadēvarāya may be identified with the king of that name who reigned in Mysore in the 17th century.

A number of ritual manuals connected with Drāhyāyaṇakalpasūtra has been acquired; they are rare in South India as the followers of this Sūtra are not very numerous here.

A study of the names of the treatises bearing on logic, acquired for the Library during this triennium, will show how largely the Vēdānta has affected the study of the older Tarka as embodied in the Nyāya and Vaiśēṣika systems of philosophy.

Nyāyakusumāñjalikārikāryākhyā, 471—This is a commentary by Haridāsabhatta on Udayanācārya's Nyāyakusumāñjalikārikā. The manuscript is written in Bengali characters and is a valuable acquisition.

Bhāṭṭasaṅgraha, 801 of Rāghavēndrayati is an important commentary on the Mīmāṁsā Sūtras giving the views of an exponent of the Dvaita-Vēdānta in regard to the aim and import of these Sūtras.

Bhāṭṭasāra, 865 is an elementary treatise intended to serve as an introduction to the study of Mīmāṁsā by beginners; its author lived in Conjeeveram about 20 years ago.

Tantraṭīkānibandhana : Ajitā, 368.—Copies of this gloss on Kumārila's Tantratīkā are very rare; and this is, therefore, an acquisition of some value.

Advaitasiddhāntavijaya, 165 (*c*) is a useful elementary treatise on Advaita-Vēdāntā.

Pañcapādikāvivaraṇōjjīvanī, 592.—Yajñēśvaradīkṣita, the author of this work, may be identified with the author of Alaṅkārarāghava, Alaṅkārasūryōdaya, etc., and the nephew of Lakṣmīdhara, the author of the commentaries on Gītagōvinda, Anargharaghava and Prasannarāghava. A number of rare commentaries on Dvaita-Vēdānta, 19 polemical works by Anantācārya of Melkote in Mysore and 10 religious and philosophical works by Appakoṇḍācārya who is said to have been the author of 60 works—are all noteworthy as important additions to the Library.

Sarvārthasiddhivyākhyā: Gūḍhaprakāśikā, 766.—The fertile and vigorous Śrīvaiṣṇava writer, Vedāntadēśika has written a metrical treatise entitled Tattvamuktākalāpa which, as the name indicates, deals with the pearl-necklace of ultimate realities in the Vēdānta; and he commented upon it himself. This commentary is called Sarvārthasiddhi, and the Gūḍhaprakāśikā now acquired is a useful gloss thereon written by Saumya-Varadarāmānujamuni, a disciple of Śrīnivāsaguru *alias* Tātayadēśika.

Vēdāntanyāyasudarśana, 30.—Varadanārāyaṇabhatta, the author of this work, is mentioned by Vēdāntadēśika in his Nyāyasiddhāñjana.

Śrutaprakāśikāvyākhyā. Tūlikā, 16.—This brief commentary on the extensive Śrutaprakāśikā which is a famous commentary on the Śrībhāṣya of Rāmānujācārya, was written by Vādhūla Śrīnivāsa, a disciple of Samarapuṅgavadīkṣita; and he may be identified with the author of *Adhikaraṇasārārthadīpikā*, 768, who is called by the name of Mahācārya also.

Apūrvabhaṅga, 608 (*d*).—This is a refutation of the Mīmāṁsakas in regard to their view respecting the causation of the fruits of work. Its author is Śrīvatsāṅka, a disciple of Varadācāryā who was a grandson of Rāmānuja's nephew and a biographical account of whom is given in *Vātsyavaradadēśikavaibhavaprakāśikā*, 413 (*a*) and *Vātsyavaradāryavaibhavapradīpa*, 413 (*c*).

Mahāpurāṇasaṅgraha, 137 (*b*).—This is a work of the 9th century giving an account of certain Jaina saints, and is thus an acquisition of value.

Pramēyaratnamālā, 22.—Another noteworthy Jaina work; it is said to have been written by Anantavīryācārya at the request of Hīrapa who was a Vaiśya and a son of Vaijaya and Nāṇāmbā.

Aṣṭaślōkīvyākhyā, 2.—Parāśarabhatta, son of Kūrēśa who was a disciple and collaborator of Rāmānujācārya is said to be the earliest of the Śrīvaiṣṇava teachers that commented on the three Rahasyas of Śrī-Vaiṣṇavism, and his Aṣṭaślōkī, which forms this commentary, consists of eight stanzas. The name of the author of the commentary thereon here noticed is not known.

Divyasūriprabhāvadīpikā, 41 is a biographical account of the Āḻvārs and Ācāryas or the Śrī-Vaiṣṇava saints and religious teachers, and it explains and establishes their holiness.

Agastyasūtra, 89 and *Śāktadarśana*, 778 are two Sūtra treatises, evidently modern in diction and style, written in imitation of Vyāsa Sūtras, and are apparently intended to establish that Śakti is the supreme deity.

Gaṇēśadarśana, 782 is a similar treatise relating to the religion of Gāṇapatam. The chief exponent of this sect of Hinduism is said to be Mudgala.

Munisuvratakāvya, 348 (*a*) and *Śrīpālacarita,* 340 (*a*) are two interesting Jaina poems.

Sāyaṇīyasubhāṣita, 797.—This anthology by Sāyanācārya, the well-known fertile writer and commentator of the 14th century is of some importance and exists in two versions in this Library.

Subhāsitārṇava, 340 (*b*).—This is another anthology newly acquired and is by a Jaina author.

Bhillakanyāpariṇaya, 366 (*f*).—This poem based on the legend of the marriage of God Narasimha of Ahobila with a woman of the hunter caste has also Telugu versions. Likewise *Vīrabhadravijaya* has its Tamil and Telugu versions.

Jāmbavatīkalyāṇanāṭaka, 419.—This drama is noteworthy as it is attributed to Kṛṣṇadēvarāya of Vijayanagar. It is not however separately mentioned in the list of his Sanskrit works given in his Āmuktamālyada. Satyāpariṇaya, Madālasācaritra, Sakalakathāsārasaṅgraha, Jñānacintāmaṇi and Rasamañjarī are all the works that are mentioned there. The manuscripts under notice are full of omissions and errors.

Jānakīrāghava, 11.—This drama of Varadakavi of Atrēyagōtra is said to have been composed at the request of Velugōṭi Singabhūpāla, son of Kastūri Raṅganarapati who seems to have been the Rāja of Veṅkatagiri about 1579 A.D.

Malayajākalyāṇanāṭaka, 409.—The author Vīrarāghava of Vādhūlagōtra and son of Narasimhasūri may be identified with the author of a commentary on the Mahāvīracarita of Bhavabhūti.

Śṛṅgārakōśabhāṇa 752.—This is the same work as the one noticed on page 173 (*b*) of Dr. Burnell's catalogue of the manuscripts in the Tanjore Palace Library.

Vasantabhūṣaṇabhāṇa, 775.—The author of this work, Varadārya is the disciple of another Varadārya who is said to have been a pupil of Srutaprakāśikācārya. It is not known whether this person is the same as the author of Srutaprakāśikā the well-known commentary on the Srībhāṣya of Rāmānuja.

Alaṅkārakaustubha, 369.—The author of this treatise on rhetoric is Vēnkaṭācārya, son of Bukkapatṇam Aṇṇayācārya of the Srīśaila family who may be the same as Bucci Vēnkaṭācārya, the author of Vēdāntakārikāvali and Gajasūtravādārthā noticed

under Nos. 5005 and 1520 respectively in the Descriptive Catalogue of Sanskrit Manuscripts. His uncle and preceptor Śrīnivāsācārya is the author of Jijñāsādarpana, 4883 *ibid.*

Kāvyaprakāśi kāṭīkā, 318.—The author of this is the same as that of the Telugu commentary, Bālaprabōdhikā, on Amarasimha's Nāmalingānuśāsana.

Sāhityadarpaṇavyākhyā . Prabhā, 712.—Gōpīnātha, the author of this work, may be identified with that of Maṇisāra as the commentary is in the technical language of Tārkikas.

Bharatārṇava, 354.—Attributed to Nandikēśvara, is an ancient treatise on dancing having resemblances to the Nāṭyaśāstra of Bharatācārya.

Kōhalarahasya, 787.—This appears to be a similarly ancient treatise on music and is attributed to Kōhala, son of Bharata.

Tāladīpikā, 770.—by Gōpatippabhūpāla of the Sāluva dynasty. The work is noticed in the catalogue of the Manuscripts in the Tanjore Palace Library.

Ārōgyacintāmaṇi, 3 (*b*).—This work also is noticed in the catalogue of the Tanjore Palace Library.

Cikitsātilaka, 373 (*b*).—The medical topics dealt with here in coincide with those in the Aṣṭāngahṛdaya.

Siddhasārasaṁhitā, 799 is a rare work on medicine and has been restored from a manuscript in the Library. It contains many omissions and errors

Under Mathematics and Astronomy a number of rare treatises chiefly relating to the preparation of the Hindu calendar have been acquired; and they are also worthy of note.

It has to be mentioned with regret that some errors have crept in on account of the shortness of the time within which the printing of this catalogue has had to be carried out.

SUBJECT INDEX

WORKS DESCRIBED IN THE SANSKRIT PART OF THE TRIENNIAL CATALOGUE OF MANUSCRIPTS.

[The letters in column 2 are used with the following significance · CC means that no copy of the work is noticed in Aufrecht's Catalogus Catalogorum, DC implies that the work has not appeared in any Descriptive Catalogue; CT implies that there are not more than 3 copies in the Catalogus Catalogorum; L means that there were no copies in the Library; P means that the MS. contains a portion which was not in the Library; T means that there were not more than 3 copies in the Library.]

Saṁhitā and Brāhmaṇa.

The Ṛgvēda.

The Sāmavēda.

The Black Yajurvēda.

Miscellaneous · Sūktas and Mantras.

Upaniṣad.

Śikṣā.

Vēdalakṣana.

Lexicography.

Prosody.

Itihāsa.

Mahāpurāna.

Upapurāna.

Sthalamāhātmya, etc.

9. *Prayōga.*

R. NUMBER.

Kāmśāstra.

Systems of Indian Philosophy.

A. Nyaya—Comprehensive Treatises.

B. Nyāya—Tracts.

Vaiśēṣika.

Yōga.

Dvaita Philosophy.

Viśiṣṭādvaita Philosophy.

Vallabha Philosophy.

SUBJECT INDEX.

d

Dvaita – Vaiṣnavism

Śaivism.

Śaktism.

Mantrakalpa.

Vrata and Vratakalpa.

Pūjā and Pūjākalpa.

Nāmastōtra.

Praśaṃsāstōtra.

Mahākāvya.

Laghukāvya.

Divination.

A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1910-11 TO 1912-13.

PART 1—SANSKRIT.

R. No. 1.

Paper. 11 × 8½ inches. Foll. 146. Lines, 18 to a page. Kanarese. Good.

Transcribed in 1910-11 from a MS. procured by G. Śrīnivāsa Rao of Mysore.

अलङ्कारचिन्तामणिः.

ALAṄKĀRĀCINTĀMAṆIḤ.

A work on poetics and rhetoric. In a commentary on this work available at the Government Oriental Library, Mysore, this is said to have been composed by Ajitasēnācārya in Śāntīśvara-caityālaya in Baṅgavāḍipura.

Complete in five Paricchēdas.

It is made out from a stanza given at the end of the original MS. that it was written by Śāntarāja, also known as Satkavi-cakravartin, son of Padmapaṇḍita of Bhāradvājagōtra, on Sunday, the 7th day of the bright fortnight of the month of Māgha in the year Vibhava, Śaka 1730. It is significant that this verse also is commented upon in the above mentioned commentary.

Beginning:

श्रीमते सर्वविज्ञानसाम्राज्यपदशालिने ।
धर्मचक्रेशिने शि(सि)द्धशान्तयेऽस्तु नमो नमः ॥

जगदानन्दिनीं तापहारिणीं भारतीं सतीम् ।
श्रीमतीं चन्द्ररेखाभां नमामि विबुधप्रियाम ॥

श्रीमत्समन्तभद्रादिकविकुञ्जरसंचयम् ।
मुनिवन्द्यं जिनानन्दं नमामि वचनप्रिये ॥

अलङ्कारमलङ्कारचिन्तामणिसमाह्वयम् ।
इष्टालङ्कारदं सूरिचेतोरञ्जनदं ब्रुवे ॥

अत्रोदाहरणं पूर्वपुराणादिसुभाषितम् ।
पुण्यपूरुषसंस्तोत्रपरं स्तोत्रमिदं ततः ॥

शब्दार्थालङ्कृतीद्धं नवरसकलितं रीतिभावाभिरामं
व्यङ्ग्याद्यर्थं विदोषं गुणगणकलितं नेतृसद्वर्णनाढ्यम् ।
लोकद्वन्द्वोपकारि स्फुटमिह तनुतां काव्यमग्र्यं सुखार्थी
नानाशास्त्रप्रवीणः कविरतुलमतिः पुण्यधर्मोरुहेतुः ॥

प्रतिभोज्जीवनो नानावर्णनानिपुण कृती ।
नानाभ्यासकुशाग्रीयमतिर्व्युत्पत्तिमान् कविः ॥

व्युत्पत्त्यभाससंस्मार्यशब्दार्थघटनाघटा ।
प्रज्ञा नवनवोल्लेखशालिनी प्रतिभास्यधीः ॥

छन्दोऽलङ्कारशास्त्रेषु गणिते कामतन्त्रके ।
शब्दशास्त्रे कलाशास्त्रे तर्काध्यात्मादितन्त्रके ॥

पारम्पर्योपदेशेन नैपुण्यपरिशालिनी ।
प्रतिपत्तिर्विशेषेण व्युत्पत्तिरभिधीयते ॥

End:

यन्नोक्तं व्रीडया वाच्यमपि तद्विहितं यथा ।
एणाक्षी लोलतारे मयि च शबलिते निक्षिपन्ती सुनेत्रे

पौनःपुन्येन लज्जास्मितनतवदना सामि भिन्नस्फुटोष्ठम् ।
जिह्वाप्रोक्तिं दधाना भुवमपि चरणाङ्गुष्ठतः संलिखन्ती
स्वान्तःस्थं तन्नुनोति स्वहृदयमपि मे न ब्रवीति स्फुरन्ती ॥
लक्ष्मोदाहृतितः प्रोक्तो नेतृभेदो मनागिति ।
शेषस्तु कामशास्त्रादौ विस्तरेण निबध्यताम् ॥
वक्तुमिच्छति चेद्ब्रूयात् राजसंसदि कोविदः ।
गलावलम्ब्यलंकारचिन्तामणिविभूषणः ॥

अल्पज्ञत्वात् प्रमादाद्वा स्खलितं तत्र तत्र यत् ।
संशोध्य गृह्यतां सद्भिः श्लिष्टावतरदृष्टिवत् ॥

Colophon:

इत्यलंकारचिन्तामणौ रसादिनिरूपणं नाम पञ्चमः परिच्छेदः समाप्तः ॥

शाकेऽब्दे नगसूपभाजि विभवे माघे सिते चारुणे
सप्तम्यामुरुपाद्मपण्डितिरिदं मे शान्तराजोऽलिखितं(खम्) ।
शास्त्रं सत्कविचक्रवर्त्यभिधया ख्यातोऽग्रजन्मार्हतो
भारद्वाजकुलो ह्यदोदि(ऽधि)वसतात्सद्भृत्कुमार्केन्दुभुं(भम्) ॥

Contains the following Paricchēdas.

(१) शिक्षाप्ररूपणम् ।
(१) चित्रालङ्कारप्ररूपणम ।
(३) यमकादिवचनम् ।
(४) शब्दार्थोभयालङ्कारविवरणम् ।
(५) रसादिनिरूपणम् ॥

R. No. 2.

Paper. 8¾ × 6⅝ inches. Foll. 74. Lines, 12 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of M. O. Anandāḻvār of Bangalore.

अष्टश्लोकीव्याख्या.

ASṬAŚLŌKĪVYĀKHYA.

A commentary on Astaślōkī by a disciple of Varadasūri of Vādhūla family and of Anantasūri of Śēsa family. The text is a work of Parāśarabhattāraka, son of Śrīvatsāṅkamiśra, and consists of eight stanzas explanatory of what are known as रहस्यत्रय, *i.e.*, the Mūlamantra, the Dvaya and the Caramaślōka, which are considered to teach Prapatti or self-surrender.

Complete

Beginning:

श्रीमल्लक्ष्मणयोगीन्द्रवाधूलवरदार्ययोः ।
कृपासुपात्रं वेदान्तिरामानुजमुनिं भजे ॥

सकलशास्त्रनिपुणाश्श्रीमद्भट्टाचार्यास्सर्वशास्त्रतात्पर्यभूतरहस्यत्रयार्थमखिलचेतनोज्जिजीवि(वयि)षया श्लोकाष्टकेन सञ्जगृहुः । तस्यार्थो यथाश्रुतं यथासम्प्रदायं यथामति प्रकाश्यते—अकारार्थो विष्णुरित्यादि । प्रथमं स्वरूपयाथात्म्यप्रतिपादनपरमूलमन्त्रार्थः प्रकाश्यते । मूलमन्त्रश्च पदत्रयात्मकः । तत्र प्रथमपदभूतोऽपि प्रणवः पदत्रयात्मकः । एवं पदविभागमभिप्रेत्य प्रणवे प्रथमपदस्थाकारस्यार्थमाह—अकारार्थो विष्णुरिति । अत्र अ इत्यनेन अ इति ब्रह्म अ इति भगवतो नारायणस्य प्रथमाभिधानमभिदधता किं नाम मङ्गलं न कृतमित्यकारस्य ब्रह्मवाचित्वप्रसिद्धेरक्षरात्मकत्वेऽपि वाचकत्वशक्तिरस्तीति विवक्षितम् ।

End:

श्लोकस्य वाक्यत्रयात्मकत्वाच्चरमं वाक्यं मा शुच इति वाक्यमित्यर्थः । सारथेरित्यनेन मामित्यस्यार्थः । अनेन वात्सल्यादिकमुच्यते । त इति मानससान्निध्याभिप्रायेण वा श्रीरङ्गनाथाभिप्रायेण सम्बुद्धिः । दृढोऽस्मीति स्वनिष्ठाप्रदर्शनेन प्रबन्धश्च निगमितः ॥

वाधूलशेषवंशेन्दुवरदानन्तसूरिणोः ।
किङ्करो व्याक्रियाव्याजादष्टश्लोकीमबुध्यत ॥

R. No. 3.

Paper. 11 × 8⅜ inches. Foll. 158. Lines, 18 to a page. Kanarese. Good.

Transcribed in 1910-11 from a MS. procured by G. Śrīnivāsa Rao of Mysore

(*a*) विद्याविनोदः.

VIDYĀVINŌDAḤ.

Foll. 1*a*—9*a*.

A work on medical treatment by Akalankasvāmin.

Incomplete.

Beginning:

प्रप्रणम्य जिनं देवं सर्वज्ञं दोषवर्जितम् ।
स(सं)संवक्ष्ये ऽतिचतुरं दाराकल्पमकल्पकम् ॥

श्रीमदर्हद्भट्टारकनिरूपितसद्धर्माम्बरभास्करवीरसेनश्रीपूज्यपादधर्म-कीर्तिप्रमुखमहामुनिनिवहप्रमुखप्रणीतसकलमतमनुक्रम्य दारशिबिकोचित-वृक्षादिसर्वलक्षणानि क्रमेण संप्रवक्ष्यामि—श्रीपुंनागाशोकदेवदारुसरलचन्दन-वकुल . . . . कपित्थजम्बूदुम्बरपन-सवत्सकधनंजयाद्यन्यतमम् ।

End:

आयुः पूरयति प्रभूतधिषणां पुष्टिं करोति क्षमा-
दारोग्यं विदधाति रोगनिवहं प्रोन्मूलयत्यापदः ।
तक्ष्णोत्यङ्गलसद्द्युतिं वितनुते कोष्टा(कौक्षा)नलं वर्धय-
त्यैश्वर्यं कुरुतेऽवगाहनमिदं तस्मान्नृपैः सेव्यताम् ॥

पाठान्तरम्—

निःशेषामयवह्निवृष्टिरतिदुर्व्याधीभपञ्चाननो
रोगारण्यदवानलो गदगिरिव्राताशनिर्वा भुवि ।
व्याध्युर्वीजकुठारको गदतृणातिक्रूरदात्रं प्रभो
ह्येवंरूपमहावगाहनमिदं भूपैरलं सेव्यताम् ॥

Colophon:

श्रीमदर्हत्परमेश्वरचारुचरणारविन्दद्वन्द्वगन्धगुणानन्दितमानसाशेषक-

लाशास्त्रप्रवीणपरमागमत्रयवेदिप्राणापायागमान्तरसमुदितवैद्यशास्त्राम्बुनिधि-पारगसर्वविद्यानन्दमानसश्रीमदकलङ्कस्वामिविरचितमहावैद्यशास्त्रे विद्याविनोदाख्येऽवगहनलक्षणं समाप्तम् ॥

(*b*) आरोग्यचिन्तामणिः.

ĀRŌGYACINTĀMAṆIḤ.

Foll. 9*b*—158*b*.

A work on diseases and their treatment: by Dāmōdarapaṇḍita, son of Viṣṇubhaṭṭa.

Beginning:

आरोग्यं भवरोगपीडितनृणां यच्चिन्तनाज्जायते
तं सर्गादिविधायिनं सुरनुतं नत्वा शिवं शाश्वतम् ।
आयुर्वेदमहोदधिं लघुतरं सर्वार्थदं सुप्रभं
वक्ष्येऽहं चरकादिसूक्तिनिचयैरारोग्यचिन्तामणिम् ॥

देहो नुः पञ्चभूतात्मा धातुदोषमू(म)लाश्रयः ।
आरोग्यं समता तेषां रोगस्तद्वृद्धिहानितः ॥

रसासृङ्मांसमेदोऽस्थिमज्जशुक्लानि धातवः ।
वातपित्तकफा दोषा विण्मूत्राद्या मलाः स्मृताः ॥

अल्पमध्योत्कटत्वेन दृष्ट्वा दोषांस्तथा जयेत् ।
अधोमध्योर्ध्वसंस्थाना हृन्नाभ्योर्व्यापिनोऽपि ते ॥

End:

मुसलीखदिरामलकश्रीकण्टकजम्बूपरिक्काथः ।
सास्थिस्रावं प्रदरं प्रमार्ष्टि मु(मो)दन् प्रगे पीतः ॥
अश्वो(न्धो)वाजिनवाराहिखदिरैर्वोरिसादितम् ।
मधुना मधुरीभूतं वनितास्थिशृतोऽपि चेत् ।
क्काथो मधुरसंसिद्धः स्रावमस्थि निहन्ति च ॥

Colophon:

इति विष्णुभट्टसुतपण्डितदामोदरविरचिता आरोग्यचिन्तामणिः समाप्ता ॥

Contains the following Sthānas:—

शारीरस्थानम् ।
चिकित्सास्थानम् ।
निदानस्थानम् ।
कल्पस्थानम् ।

Do. different.

R. No. 4.

Paper. $11\frac{1}{8} \times 8\frac{3}{4}$ inches. Foll. 259. Lines, 16 to a page. Dēvanāgarī. Good.

Transcribed in 1910–11 from a MS. of M. O. Anandāḻvār of Bangalore.

आश्वलायनश्रौतसूत्रभाष्यम्.

ĀŚVALĀYANAŚRAUTASŪTRABHĀŚYAM.

A commentary by Dēvasvāmin on Āśvalāyanaśrautasūtra.

Adhyāyas 2 to 4 complete; 5th incomplete.

Beginning:

पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः। पौर्णमासं व्याख्यातम्। तेन पौर्णमासेनेष्टयः पशवः व्याख्याताः। इज्यन्ते आभिर्देवता इतीष्टय। पशुगुणकं कर्म पशुरित्युच्यते। तच्च तृतीयेऽध्याये वक्ष्यते। तथा सोमगुणकं कर्म सोम इत्युच्यते। तदप्युत्तरत्र वक्ष्यते [वक्ष्यति] त एते इष्टिपशुसोमाः पौर्णमासेन व्याख्याता इत्यर्थः।

* * * *

Colophon:

इति श्रीमदाश्वलायनसूत्रभाष्ये देवस्वामिनः कृतौ द्वितीयोऽध्यायः ॥

End:

तेन प्राप्त आहावो विधीयते। अथापि प्रगाथत्वात् भविष्यति। तथापि न प्राप्नोति॥

R. No. **5.**

Paper. 8¾ × 5⅝ inches. Foll. 121. Lines, 16 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of M. O. Anandāḻvār of Bangalore.

जैमिनिगृह्यसूत्रव्याख्या (सुबोधिनी).

JAIMINIGṚHYASŪTRAVYĀKHYĀ (SUBŌDHINĪ).

Vide pages 5 and 150 of the Report on a Search for Sanskrit and Tamil MSS. by M. Seshagiri Sastri—No. 2.

Contains Praśna I, and Praśna II, Khaṇḍas 1 to 3 complete and 4th incomplete.

R. No. **6.**

Paper. 11 × 8¾ inches. Foll 112. Lines, 18 to a page. Dēvanāgarī. Good.

Transcribed in 1910-11 from a MS. of M. O. Anandāḻvār of Bangalore

कादम्बरीव्याख्या.

KĀDAMBARĪVYĀKHYĀ.

A commentary on Kādambarī – Uttarabhaga.

The text is by the son of Bhaṭṭa Bāṇa; and this commentary is by Arjunapaṇḍita, who was the son of Cakradāsa and the chief of the assembly of Brahmins at Kūrmapura.

Beginning:

जयतु जगतां जन्मस्थेमप्रशान्तिविधायिनी
जलनिधिभुवो यस्या देव्याः कटाक्षपरम्परा ।
अपि च विजयश्री . . . .
नवजलधरश्यामः श्रीमांस्तमालतरुच्छदः(विः) ॥
ज्ञातुं गां भुवि के वयं कविगुरोः श्रीबाणभट्टस्य तां
लोकेऽस्मिन्नचलेन्द्रतुल्यमहिमा सोऽयं महापूरुषः ।
यस्यास्याहृयगह्वरादुदभवद्या पुण्डरीकोज्वला
चन्द्रापिडमनोहरा भगवती गङ्गेव तुङ्गध्वनिः ॥

गुणिनः कल्पयित्वेव गुणानेव निराकृतीन् ।
प्रबन्धशेषं वि(व्य)वृणोद्विवृतिर्दुष्करा ततः ॥
तथापि क्रियते व्याख्या यथामतिबलं तथा ।

*   *   *   *

कविः पितृकृतस्य पूर्वप्रबन्धस्य चोत्तरस्यानुपलक्षितसंधिबन्धविरचनार्थे तदनुरूपदेहद्वयार्धघटनातिप्रणयदे . . : . न्दते.

देहद्वयार्धघटनारचितं शरीर-
मेकं द्वा(य)योरनुपलक्षितसन्धिबन्धम् ।
बन्दे सुदुर्घटकथापरिशेषसिद्ध्यै
सृष्टेर्गुरू गिरिसुतापरमेश्वरौ तौ ॥

अत्रायभभिप्रायः—केवलपुरुषदेहार्धद्वये विच्छिन्ने सति देवतानां स्वानुभवात् जरासन्धदेहद्वयस्येव संघटनं शक्यम् । एतयोस्तु पुंभागस्त्रीभागयोर्ललितकर्कशत्वात् भिन्नाकारतया च विसदृशयोरनुपलक्षितसंधि(बन्धं मनो)हरं च संघटनमेतयोर्गिरिसुतापरमेश्वरयोरेव शक्यम् । अत्रापि बाणभागोऽत्यन्तललितत्वात् स्त्रीभागो ज्ञेयः । उत्तरभागोऽत्यर्थगभीराभिप्रायकत्वात् पुंभागवत् कठिनः । उभयोः संघटनमतिदुष्करम् । एतत्सिद्ध्यर्थं तत् देवतामिथुनं वन्द्यते । सृष्टेर्गुरू इत्यनेन स्वकीयवाक्सृष्टेरपि तावेव कर्तृभूताविति प्रकटयति । तयोः शब्दार्थात्मकत्वात् ।

End :

महाश्वेता च पुण्डरीकेण सह तेषु तेषु स्थानेषु तानि तानि सुखान्यनुभवन्ती आनन्दस्य परां कोटिमध्यगच्छत् । पुण्डरीकोपरि प्रणयातिशयेन सर्व एवैताः समवेताः सर्वकालं सर्वसुखान्यनुभवन्तः परां कोटिमानन्दस्याध्यगच्छन् इति ॥

हरिहराहिरण्यगर्भा लक्ष्मीगौरीसरस्वतीसहिताः ।
कादम्बरीकथेशा रक्षन्तु समस्तभुवनानि ॥

श्रीभट्टबाणतनयग्रथितनिगूढार्थगद्यबन्धस्य ।
अर्जुनपण्डितरचिता टीका भूयादियं चिरं जयिनी ॥
श्रीमत्कूर्मपुरावनीसुरसभामुक्तावलीनायकः
श्रीगोपीजनवल्लभाङ्घ्रिकमलद्वन्द्वप्रसादोज्ज्वलः ।
श्रीमानर्जुनपण्डितः शुभगुणः श्रीचक्रदासात्मजः
साहित्यार्णवकर्णधारपदवीमालम्बते सांप्रतम् ॥

Colophon:

इत्युत्तरकादम्बरीटीका परिसमाप्ता ॥

R No. 7.

Paper. 13 × 8½ inches. Foll. 78 Lines, 20 to a page. Telugu. Good.

Transcribed in 1910–11 from a MS. of M. O. Anandāḻvār of Bangalore.

क्रियागोपनरामायणम् (सटीकम्).

KRIYĀGŌPANARĀMĀYANAM (WITH COMMENTARY).

This Rāmāyana is ascribed to Krsnakavi, son of Raghunātha-dīksita. The peculiarity of this work is that in each stanza the predicate appears in a disguised form This work is also called Candrakalāvilāsa.

Contains from the fourth Sarga of the Bālakāṇḍa to the fourteenth Sarga of the Yuddhakānda, the latter being incomplete.

Beginning:

श्रीमत्याथ सरस्वत्यास्फुटन्नलिनलोचनः ।
(क्षीरनीरधिसंजातें) सुधामाधुर्यधुर्यया ॥

अस्फुटत् अस्फुटताम् अस्फुटन्; स्फुट विकसने कुटादिः । शस्यापित्त्वेन ङित्वात् गुणाभावः । श्रीमत्या कल्याण्या सरस्वत्या वाचा । नलिनलोचनः अस्फुटत् विकसितवान् उक्तवानित्यर्थः । उपचारात् पर्यायोक्तम् । श्रीमत्या वाचा विकसितवानिति श्रीवैष्णवपारिभाषिकशब्दः ॥

यावल्लङ्का दशग्रीवं समुद्रे दारुणा रवे ।
तावन्मा त्रस्यत रणे तामाक्रम्य बलेन तम् ॥

त्रीण्यत्र क्रियापदानि । आवत् । रवे । त्रस्यत इति । समुद्रे दारुणा या लङ्का दशग्रीवम् आवत् रक्षितवती । आवत् आवताम् आवन्; अव रक्षणे लङ् । तां लङ्कां बलेनाक्रम्य तं रावणं रवे हनिष्यामि । रवे रवावहे रवामहे; रुङ् गतिरेषणयोः रेषणं हिंसेति व्याख्यातमाकरे । वर्तमानसामीप्ये लट् । तावदिदानीं हे देवाः मा त्रस्यत मा भैष्ट । त्रस्य त्रस्यतात् त्रस्यतम् त्रस्यत; त्रसी उद्वेगे लोट्, दिवादिः । माशब्दो न तु माङ् । रणे युद्धे ॥

* * * *

पुत्रोऽहं रघुनाथदीक्षितगुरोः श्रीकृष्णनामा कविः
काव्यं चन्द्रकलाविलासमतुलं सद्भाव्यराज्यावहम् ।
तुर्यं तत्र कलाविलासमगदां श्रीरामचर्यां शुभा-
मध्यायं च समाप्य मङ्गलशतैरानन्दमत्यद्भुतम् ॥

Colophon:

इति क्रियागोपनरामायणे चतुर्थः सर्गः ॥

End:

रामरावणयोर्युद्धं रामरावणयोरिव ।
उपमारहि तत्त्वेन यस्य युद्धस्य शोभया ॥

उपमा अरहि इति पदच्छेदः । यस्य युद्धस्य शोभया . . . .

R. No. 8.

Paper. 11⅛ × 8¾ inches Foll. 460. Lines, 18 to a page. Dēvanāgarī. Good

Copied in 1910–11 from a MS. of Vijayēndrācār of Coimbatore.

गीताभाष्यव्याख्या (भावरत्नकोशः).

GĪTĀBHĀṢYAVYĀKHYĀ (BHĀVARATNAKŌŚAḤ).

This is a commentary by Sumatīndratīrtha, a disciple of Sudhīndratīrtha, on Ānandatīrtha's commentary of Bhagavadgītā.

One to five Adhyāyas only.

Beginning:

श्रीमन्तो जानकीजानेः पदपङ्कजपांसवः ।
जयन्ति सीतावक्षोजकुङ्कुमश्रीविडम्बिनः ॥

येनाखण्डि मुदैव खण्डपरशोरुद्दण्डकाण्डासनं
भूदेवीतनयाप्यलाभि सरसैरङ्गैरपाङ्गैरपि ।
सद्धर्मद्युतिहर्म्यनिर्मितलसन्नर्मोत्थशुद्धोदयः
श्रीरामो मम मानसे विलसतात् सीतासहायः सदा ॥

सज्जनाम्भोरुहपुषे वेदव्यासाभिधाजुषे ।
तमःस्तोममुषे तस्मै परस्मै ज्योतिषे नमः ॥

आमोदं यो व्यतानीत् रघुकुलतिलके सेवया श्रीहनूमान्
भीमात्मा कृष्णदेवे प्रबलधरणिपव्याजवैरीन्द्रहत्त्या ।
मध्वाख्यो ब्रह्मसूत्रप्रभृतिकृतिकृतान्योक्तिभाष्यादिकृत्या
श्रीवेदव्यासदेवे स दिशतु सुदृशं श्रीमदानन्दतीर्थः ॥

यस्मादभ्युदयादृशप्रकरणी मन्दारवल्लीमणि-
श्रेणीमेयसुदीपिकादिकृतिरा . . . बुधैः सा सुधा ।
वादावल्यमृतांशुमूर्तिरमला तत्त्वप्रकाशेन्दिरा
कुर्याज्छ्रीजयतीर्थदेशिकपयोम्भोधिर्विभूत्यै स मे ॥

श्रीमध्वशास्त्रदुग्धाब्धिमामथ्योद्धृतमादरात् ।
ग्रन्थत्रयामृतं येन व्यासराजं तमाश्रये ॥

श्रीराघवेन्द्रतीर्थश्रीचरणामरभूरुहम् ।
कामिताखिलकल्याणकलनोन्मुखमाभजे ॥

भूरिमनीषागमचितकरणान्
श्रीजयतीर्थव्रतिकृतिशरणान् ।

संततमीडे सुचरितवरणान्
वेङ्कटनारायणगुरुचरणान् ॥

अथ तत्कृपया श्रीमज्जयतीर्थार्यनिर्मिताम् ।
श्रीमद्गीताभाष्यटीकामहं सेवे यथामति ॥

श्रीमान् जयतीर्थार्यः प्रारिप्सिताविघ्नपरिसमाप्त्यादिप्रयोजनं विशिष्टेष्टदेवतागुरुप्रणामरूपं मङ्गलं ग्रन्थादौ निबध्नाति—गुणगणेति । देवतावन्दनानन्तरं गुरुतारतम्यसमानं वेदव्यासं वन्दते—वासवीसूनुमिति । वसोरपत्यं स्त्री वासवी सत्यवती । तस्याः सूनुं सुतं वेदव्यासमित्यर्थः । जगदघहननं तत्त्वोपदेशेन सल्लोकमोक्षदमिति यावत् । चशब्दः गुणगणनिलयत्वस्य रमापतित्वस्य चानुकर्षणार्थः । पूर्णबोध सर्वज्ञाचार्यम् । मे मम । गुरुम् अक्षोभ्यतीर्थम् । परमगुरुं माधवतीर्थम् । इदं च पद्यं भाष्याद्यपद्यत्रिपादीव्याख्यानरूपम् । गुणगणनिलयमिति परिपूर्णपदस्य, रमायाः पतिमिति नारायणपदस्य, जगदघहननमिति सर्वदोषवर्जितपदस्य, वासवीसूनुमिति आनितिपदस्य, गुरुमपि परमं गुरुमिति गुरूनित्यस्य, वन्दत इति नत्वेत्यस्य च स्पष्टीकरणात् ॥

End:

भोक्तारं सर्वलोकमहेश्वरं च सर्वेषां लोकानां महान्तमीश्वरं सर्वभूतानां सुहृदं प्रत्युपकारानपेक्षितयोपकारिणं शान्ति मोक्षसाधनं मां भगवन्तं ज्ञात्वा ध्यात्वा ऋच्छति साक्षात्करोतीति ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमद्भगवद्गीताभाष्यटीकायां भावरत्नकोशसमाख्यायां श्रीमत्सुधीन्द्रतीर्थपूज्यपादशिष्यसुमतीन्द्रयतिविरचितायां पञ्चमोऽध्यायः ॥

श्रीमद्गीताभाष्यटीकापञ्चमाध्यायसेवया ।
गुणिनः परितुष्यन्तु गुणग्रहणभूषणाः ॥

R. No. **9.**

Paper. 13⅝ × 8⅜ inches. Foll. 403. Lines, 20 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of M. O. Anandāḻvār of Bangalore.

चान्द्रिकाखण्डनम्.

CANDRIKĀKHAṆḌANAM.

This is in refutation of Vyāsatīrtha's Candrikā which is a criticism on Śrutaprakāśikā : by Rāmānujadāsa *alias* Ramyajāmātṛmuni, a disciple of Vēnkaṭācārya of Vādhūla family.

This work is also called Rāmānujasiddhāntavijaya. Contains the first Adhyāya complete and the second incomplete.

Beginning :

निखिलजगदधीशं निर्गताशेषदोषं
श्रितजनकृतमोदं सूरिसंसेव्यपादम् ।
करिगिरितटभाजं सर्वदेवेन्द्रदेवं
वरदमहमुपासे वाञ्छितार्थाभिवृद्ध्यै ॥
अविद्यानलसंतप्तजीवजीवातुरच्युत. ।
कृष्णद्वैपायनो व्यासः स्वसूक्त्यमृतदानतः ॥
वैदिकोत्तमसिद्धान्तप्रतिष्ठापनभाष्यकृत् ।
जयतां जयतां नित्यं जयतात् जयतात् परम् ॥
व्यासाचार्यो विजयतां भाष्यव्याख्याविशारदः ।
यदुक्तयोऽभवन् वेदमौलिमङ्गलदीपिकाः ॥
निगमान्तगुरुर्जीयात् निगमान्त इवापरः ।
यत्सूक्तयः श्रीभाष्यस्य जीवातव इवाभवन् ॥
कृत्याकृत्यविवेकशून्यहृदयं नाथः स्वयं भूयसा
प्रेम्णा वीक्ष्य दयासुपात्रमकरोद्यो मां दयाशेवधिः ।
वाधूलान्वयवार्धिकौस्तुभमणिः श्रीवेङ्कटाख्यो गुरुः
सोऽसौ मे हृदयं विशत्वनुदिनं नेतापवर्गाध्वनः ॥

येनेदं मम दर्शितं यतिपतेः पादद्वयं रक्षकं
येनेयं दयया यतीन्द्रफ(भ)णितिर्व्यक्तं ममाध्यापितम् ।
यस्याभूत्कनकापगान्तरलसद्रङ्गस्थली वासभूः
यो रङ्गेशपदैकसक्तहृदयस्तं वेङ्कटार्यं भजे ॥

पक्षे लक्ष्मणदेशिकाभ्युपगते प्राग्भिः परैर्दूषणा-
भासावल्युदिता निरासि गुरुभिर्व्यासादिपर्यायिभिः ।
अर्वाग्भिः पुनरत्र यान्यपटुभिर्दुर्वादिभिर्दूषणा-
न्युद्गीर्णानि वयं तु तन्निरसनारम्भाय जृम्भामहे ॥

न वेदार्थान् विद्मो न खलु कविताव्याकृतिपथं
न तर्केष्वभ्यासं न परमतभङ्गीपरिचयम् ।
अथापि श्रीरामावरजमुनिवर्योक्तिनिचय-
प्रकामाभ्यासो मे प्रकटयति सर्वत्र धिषणाम् ॥

न्याया भाष्यादिसिद्धास्तदनुगुणपदावल्यपि प्राक्प्रसिद्धा
शब्दानां संकलय्य ग्रथनमपि परस्वान्तरात्मेशकृत्यम् ।
बालोऽयं द्वारभूतः परिमितबलधीरित्यमुं न त्यजेयु-
र्गृह्णीयुर्भाष्यनिष्ठा भगवति च परप्रेमयुक्ताः प्रबन्धम् ॥

श्रीरामानुजसिद्धान्तविजये माध्वखण्डने ।
आदौ श्रीभाष्यतद्व्याख्यातात्पर्यार्थौ निगद्यते ॥

तिरोभावितदोषाणामस्पर्शस्तदनन्तरम् ।
अथ तत्कृतसूत्रार्थयोजने दोष उच्यते ॥

वेदविद्याविहारेण कालक्षेपपरा बुधाः ।
साधारणविशेषज्ञाः सम्यक् पश्यन्तु सज्जनाः ॥

श्रियः पतिः परमकारुणिको भगवान् सर्वेषां पुरुषाणां सकलाभीष्टतदुपायतदाभासविवेकाय ।

हर्तुं तमस्सदसती च विवेक्तुमीशो
मानं प्रदीपमिव कारुणिको ददाति ।

इत्युक्तविधया वेदाख्यप्रमाणं प्रदायावतारादिमुखेन तदर्थविषयकज्ञानं चोत्पाद्य ।

End:

वैशेष्यात् तद्वादस्तद्वादः । वैशेष्यं विशेषभावः । त्रिवृ . . . . कैकस्मिन्नन्नाद्याधिक्यरूपं विशेषभावादन्नानिवादः । द्विरुक्तिरध्यायपरिसमाप्तिद्योतनार्था ॥

Colophon:

इति श्रीवाधूलकुलतिलकवेङ्कटाचार्यपादपङ्कजषट्पदा . . . कैङ्कर्यसाम्राज्येन तद्वंश्यश्रीभूतपुरी. . . . . कृपालब्धशारीरकमीमांसाभाष्यहृदयेन तत्प्रसादलब्धरम्यजामातृमुनिनामधेयेन रामानुजदासेन विरचिते श्रीभगवद्रामानुजासिद्धान्तविजयाख्यचन्द्रिकाखण्डने द्वितीयाध्यायस्य द्वितीयः पादः ॥

R. No. **10.**

Paper. 8⅝ × 6¾ inches. Foll. 56. Lines, 11 to a page. Dēvanāgarī. Good.

Transcribed in 1910–11 from a MS. of **M.** O. Anandāḻvār of Bangalore

छन्दस्सूत्रवृत्तिः.

CHANDASSŪTRAVṚTTIḤ.

This is a commentary by Bhaṭṭa Halāyudha on Piṅgalanāga ' Chandassūtra

Contains Adhyāyas 1 to 6.

Beginning:

इह खलु यो ह वाविदितार्षो यथाछन्दोदैवतं ब्राह्मणेन मन्त्रेण योजयति वाध्यापयाति वा स स्थाणुं वर्च्छति गर्तं वा पतति प्रमीयते

पापीयान् भवतीति छन्दसामपरिज्ञानस्य निन्दितत्वात् त्रैवार्णिकानां वेदाङ्गत्वात् छन्दःपरिज्ञानमावश्यकम् इत्येतदर्थं छन्दःशास्त्रमारभ्यते ।

मयरसतजभनलगसंमितं भ्रमति वाङ्मयं जगति यस्य ।
स जयति पिङ्गलनागः शिवप्रसादाभिशुद्धमतिः ॥
त्रिगुरुं विद्धि मकारं लघ्वादिसमन्वितं यकाराख्यम् ।
लघुमध्यमं तु रेफं सकारमन्ते गुरुनिबद्धम् ॥
लघ्वन्त्यं हि तकारं जकारमुभयतो लघुं विजानीयात् ।
आदिगुरुं च भकारं नकारमिह पैङ्गले त्रिलघुम् ॥
दीर्घं संयोगपरं तथा प्लुतं व्यञ्जनान्तमूष्मान्तम् ।
सानुस्वारं च गुरुं क्वचिदवसानेऽपि लघ्वन्त्यम् ॥
त्रिविरामं दशवर्णं षण्मात्रमुवाच पिङ्गलः सूत्रम् ।
छन्दोवर्गपदार्थप्रत्ययहेतोश्च शास्त्रादौ ॥

धीश्रीस्त्री म् ।

भ्यादिवर्णत्रयोपलक्षितत्रिगुरोः समुदायस्य मकार इति इह शास्त्रे संज्ञा । एवमुत्तरसूत्रेष्वपि बोध्यम् ॥

* * *

श्रीभट्टहलायुधकृतौ छन्दस्सूत्रवृत्तौ प्रथमोऽध्यायः ॥

End:

इष्टं कृत्वार्थं पत्रिणः शार्ङ्गपोर्णे-
रेत्यायोमुख्यं प्राविशन् भूमिमाशु ।
शुद्ध्या युक्तानां वैरिवर्गस्य मध्ये
भर्त्रा क्षिप्तानामेतदेवानुरूपम् ॥
वाहिनी मौ भ्यावृषिकामशराः । नवमालिनी न्जौ भ्यौ ।

Colophon:

इति छन्दोविचितौ षष्ठोऽध्यायः ॥

प्रहर्षिणी म्नौ (म्नौ) ज्रौ गु । चतुष्कनवकौ मत्तमयूरं म्तौ य्सौ गु (सुभौ गू) ॥

R. No. **11.**

Paper. 13⅝ × 8⅜ inches. Foll. 115. Lines, 20 to a page. Grantha. Good.

Transcribed in 1910–11 from a MS. of Raṅgarāmānujācāriyar of Nellore

जानकीराघवम्.

JANAKĪRĀGHAVAM.

This is a drama with the story of the Rāmāyana for its plot: by Varadakavi of Ātrēyagōtra, son of Śrīnivāsayajvan, who was the son of Varadaryadīkṣita and the nephew of Tātācārya of Conjeevaram. It is further understood from the MS. that the work was composed at the request of Vēlikōti Śiṅgabhūpāla, son of Kastūriraṅganarapati.

Incomplete.

Beginning:

लक्ष्म्या पाणिधृताब्जया निजदयास्तन्येन संवर्धितं
नित्यं कौस्तुभरत्नगुच्छकुतुकान्निष्पन्दनेत्रस्रजम् ।
नाभीमण्डलपुण्डरीकतलिमे खेलन्तमाधोक्षजे
बालं लालयितुं कृतं मधुकरैर्गीतं कलं पातु वः ॥

किं च—

वर्षारम्भवलाहकं भगवतो मत्वा वपुः शार्ङ्गिणः
विद्राणादवतीर्य हंसतिलकाद्दूरं द्वियुग्मानने ।
आरूढे सह षण्मुखेन शिखिनं सेवार्थमभ्यागते
लक्ष्म्या पाङ्क्तिमुखभ्रमाद्धरिपरीरम्भः शिवायास्तु वः ॥

नान्द्यन्ते सूत्रधारः—(सप्रश्रयम्) भो भोः सकलमहीपालमुकुटकुरुविन्दचक्रवालबालारम्भपरीरम्भसंभावितचरणाम्भोरुहस्य रणतलाविहितविमतराजलोकनिबिडितनाकलोकनिरवकाशनिलिम्पकदम्बकवाहनधुरंधराहिताभिनिरन्तराग्रहारभूवलयवलशासनस्य निरातङ्कभुजाविटङ्कविटपवेल्लितविजयलक्ष्मीवितानस्य कस्तूरीरङ्गनरपतिभागधेयस्य वेलिकोटिशिङ्गभूपालस्य कुलदैवतं कल्हारपुरनाथं रघुनाथमासेवितुमभ्यागताः सभास्ताराः . . .

सूत्रधारः --अयि पण्डितमानिनि प्रसिद्धार्थं विनैव सर्वं जानासि। अयं नाम तुण्डीरमण्डलमण्डनायमानकाञ्चीनगरनायकताताम्भागिनेयस्य श्रीमदत्रिगोत्रपवित्रजन्मनः वरदार्यदीक्षितभागधेयस्य वाजपेययाजिनः श्रीनिवासयज्वनः तृतीयऋणविमोचनमहाधनं तरुणाग्निहोत्री श्रोत्रियचूडामणिः वरदकविर्न ते कर्णपथमवतीर्णः ॥

* * * *

यत्स्वप्नसन्दृष्टरामचन्द्रसन्देशवशंवदः शिङ्गविभुस्समस्तमपि रामचरितं वस्तुमिश्रमाकलय्य शृङ्गारस्थायिकं परिकल्प्यानल्पनादकशिल्पकल्पनाविशारदं प्रतिकविहंसनीरदं वरदमाहूय एवमवोचत्।

End :

साधयामो वयं साकेतं प्रति। युवामपि निजनिजनिलयं गत्वा बालवकुलमाश्वास्यानुपदमेवागच्छतमिति निष्क्रान्तास्सर्वे ॥

Colophon :

इति महावीरराघवो नाम नवमोऽङ्कः ॥

ततःप्रविशति विमानेन रामो लक्ष्मणो हनूमांश्च।

ल--

प्रसादो देवानां यदयमुपलब्धो यदपि वा
निरस्ताः प्रत्यूहाः दशवदनविध्वंसविषयाः।
यदप्याविर्भूता रघुकुलभुवां दिव्यनगरी
पदं सीतायास्तत्प्रभवति शुभेयं परिणतिः ॥

* * * *

रा—कथमियमेवाग्रतोऽयोध्या ; या किल.

R. No. 12.

Paper. 13¼×8¼ inches. Foll 182. Lines, 20 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of M. O. Anandālvār of Bangalore.

ज्ञानार्णवः.

JÑĀNĀRNAVAḤ.

Gives the details relating to several Mantras.

Contains Patalas 1–130 complete; and the 131st incomplete.

Beginning:

वर्धमानस्य यस्यासीत् बलिनो निग्रहेऽम्बरम् ।
मेघजालं मेऽघजालं व्यपोहतु स माधवः ॥

पुरा कैलासशिखरे नानारत्नविचित्रिते ।
नानाकल्पद्रुमाकीर्णे नानाधातुमनोहरे ॥

* * * *

प्रणम्य पार्वती प्राह लोकानुग्रहकाङ्क्षया ।
भगवन् भक्तसुलभ शिव सर्वज्ञ शङ्कर ॥

* * * *

प्रश्नानुरूपं देवेश दत्वोत्तरमिह प्रभो ।
सकामां कुरु मां क्षिप्रं यद्यस्ति करुणा मयि ॥

Colophon:

इति श्रीज्ञानार्णवाख्ये महातन्त्रे वैष्णवपीठप्रकरणे शिवं प्रति पार्वतीप्रश्नो नाम प्रथमः पटलः ॥

End:

श्रीशिवः—

शृणु देवि प्रवक्ष्यामि मन्त्रमष्टार्णमुत्तमम् ।
मन्त्रं श्रीकृष्णदेवस्य रहस्यं पापनाशनम् ॥
अनङ्गबीजमुच्चार्य कृष्णायेति पदं ततः ।
गोविन्देति पदं ङेऽन्तमष्टार्णो मनुरीरितः ॥
नारदोऽस्यर्षिराख्यातो गायत्री छन्द उच्यते ।
श्रीकृष्णो देवता प्रोक्तो विनियोगो यथारुचि ॥
मान्मथेन स्वरयुजा बीजेनाङ्गक्रिया मता ।
ध्यानमस्य प्रवक्ष्यामि शृणु कल्याणि सादरम् ॥
पञ्चवर्षमतिदृप्तमङ्गणे धावमानमलकाकुलेक्षणम् ।
किङ्किणीवलयहारनूपुरैरञ्चितं नमत गोपबालकम् ॥

R No **13.**

Paper 11 × 8¾ inches Foll 374. Lines, 16 to a page. Dēvanāgarī. Good.

Transcribed in 1910-11 from a MS. of Ramakrsnakavi of Vanaparti.

ब्रह्मसूत्रव्याख्या—तत्त्वमार्ताण्डः.

BRAHMASŪTRAVYĀKHYĀ: TATTVAMĀRTAṆḌAḤ.

Same work as the one described under No. 4894 of the D.C.S. MSS., Vol. X.

Contains the second Adhyāya only.

Beginning:

श्रियः पतिश्चिन्मयसद्गुणोदयः त्रयीशिरःसंततिचिन्तितावधिः ।
परिस्फुरद्बाधविरोधशान्तिदः प्रसीदतान्नो हरिरिष्टसिद्धये ॥

उक्ता हरेस्त्रयीशृङ्गशृङ्गाटकविहारिता ।
कण्टकोल्लङ्घनेनैषा निःशेषात्र विशोध्यते ॥

एवं प्रथमेनाध्यायेन प्रतिपादितस्य परस्य ब्रह्मणः निखिलजगत्कारणत्वस्य संभावनीयसमस्तप्रकारदुर्धर्षणत्वख्यापनाय द्वितीयोऽध्याय आरभ्यते। तत्र प्रथमे पादे परोद्भावितकारणविषयकदोषोऽशेषो विधीयते । द्वितीये च तत्पक्षप्रामाणिकत्वशङ्काकलङ्कितधियां स्वपक्षश्रद्धावैकल्यविध्वंसनाय तत्पक्षप्रतिक्षेपः । तृतीयचतुर्थयोस्तु सर्वकारणत्वघटकचिदचिद्गतकार्यत्वानुपपत्तिनिमित्तदोषविशेषोद्धारः । तत्रापि भोग्यभोक्तृवर्गकार्यत्वानुपपत्तिस्तृतीये भोगोपकरणस्थाननिरासश्चतुर्थ इति विवेकः ।

End:

यत्त्वस्मत्पक्षे जीवेनात्मनेत्यत्र सामान्यवाचिनो जीवशब्दस्य हिरण्यगर्भमात्रपरत्वमयुक्तमिति दूषणं तत् प्रागेव तद्धेतूपन्यासेन सर्वमुपपादितमिति न किंचिदनुपपन्नम् । तस्मादस्मदाचार्यप्रोक्तप्रकार एव सूत्रार्थः पूर्वोत्तरपक्षवर्णनप्रकारश्च निर्दुष्ट इति सर्वं समञ्जसम् ॥

त्रयीमयपुरन्ध्रिकाचिकुरबन्धसैरन्ध्रिका-
मवन्ध्यगुणबन्धुरां यतिपुरन्दरोक्तिं मुहुः ।

सुधामिव बुधैः समं समनुभूय भूयस्तरां
कृतिं कृतचमत्कृतिं व्यतनवं सतां प्रीतये ॥
गम्भीरे यतिसार्वभौमकथिते भाष्येऽप्यदूष्येऽसुरैः
दोषारोपणचापलोपल(नि)हतप्रेक्षाविलक्षान्विताः ।
यद्यप्येवमथापि तन्मतिकृतव्यामोहमुह्यज्जन-
भ्रान्तिच्छेदकृते कृतां मम कृतिं पश्यन्तु हृष्यन्तु च ॥

* * * *

इति मितमातिना मया निबद्धां
कृतमतयः कृतिमादरात् समीक्ष्य ।
यतिपतिमतसंमतिं प्रतीत्य
स्खलिततातिं प्रति(विनि)वर्त्य सन्तु हृष्टाः ॥

Colophon:

इति श्रीशैलकुलतिलकश्रीसर्वतन्त्रस्वतन्त्रश्रीनिवासताताचार्यनन्द-नेन लक्ष्ममाम्बागर्भशुक्तिमुक्तामणिना कौण्डिन्यश्रीनिवासदीक्षितकृपाकटाक्ष-वीक्षाशिक्षितमीमांसाद्वन्द्वनिर्द्वन्द्वमतिना निजाग्रजाण्णयाचार्यदीक्षितानुग्रह-गृहीतचतुस्तन्त्रनियन्त्रितस्वान्तेन श्रीनिवासेन विरचिते तत्त्वमार्तण्डे द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

R No **14**.

Paper. $13\frac{3}{8} \times 8_8$ inches. Foll. 74. Lines, 20 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of Subbarāyācār of Śrīrangam

तत्त्वोद्योतटीकाविवृतिः—भावदीपः.

TATTVŌDYŌTAṬĪKĀVIVṚTIḤ: BHĀVADĪPAḤ.

This is a commentary by Rāghavēndrayati (a disciple of Sudhīndraguru) on Jayatīrtha's Tattvōdyōtaṭīkā, which is again a commentary on Ānandatīrtha's Tattvōdyōta, a work on the condition of the individual soul after emancipation—*Vide* also No. 4791 of the D.C.S. MSS., Vol. X.

Complete.

At the end of the MS. it is said that the work was transcribed by Rāma on Thursday, the thirteenth day of the dark fortnight in the month of Śrāvaṇa in the year Dundubhi.

Beginning:

जगज्जन्मस्थेमलयनियमा यदपाङ्गतः ।
तं वन्दे परमानन्दमिन्दिरामन्दिरोरसम् ॥
प्रणम्य श्रीमदानन्द . . . . . ।
. . . . . तत्त्वोद्योतस्य पञ्जिकाम् ॥

ग्रन्थादौ मङ्गलाचारपूर्वं चिकीर्षितं प्रतिजानीते—विश्वेति । मूले चिच्चेत्यपदेन (न) यत्किञ्चिच्चेतनाचेतनग्रहोऽपि तु कृत्स्नस्येति . . . . दर्शनाय वा विश्वेत्युक्तिः । यन्तेति नियमनमुपलक्षणमिति भावेनोक्तम् ।

End:

ग्रन्थान्ते मङ्गलमाचरति श्रीमदिति; कमलाश्लेषरसिकत्वोपपादनम् । परः पुमानिति ।

तत्त्वोद्योतस्य टीकाया भावदीपो यथामति ।
राघवेन्द्रेण यतिना कृतो विष्णुप्रसत्तये ॥

Colophon:

इति श्रीमत्सुधीन्द्रगुरुपादशिष्येण सर्वतन्त्रस्वतन्त्रेण राघवेन्द्रयतीन्द्रेण विरचितः तत्त्वोद्योतटीकाभावदीपः समाप्तः ॥

दुन्दुभौ श्रावणे कृष्णगुरुवारत्रयोदशी ।
या तत्र रामस्संलिख्य भावदीपमपूरयत् ॥

R. No. 15.

Paper. 13¼ × 8⅜ inches. Foll. 230. Lines, 20 to a page. Grantha and Tamil. Good.

Transcribed in 1910-11 from a MS. of M. O Anandalvār of Bangalore.

रहस्यत्रयव्याख्या—तात्पर्यदीपिका.

RAHASYATRAYAVYĀKHYĀ: TĀTPARYADĪPIKĀ.

This is a commentary on Lōkācārya's Rahasyatraya: by Vīrarāghava, son of Rāmānujācārya of Śrīśaila family and a disciple of Śrīnivāsarāmanuja and Saṭhakōpaguru. The Rahasyatraya is a Tamil work containing the interpretation of the three Rahasyas, mystical doctrines of the Śrī-Vaiṣṇavas, namely, (1) the Mūlamantra, (2) the Dvaya and (3) the Caramaślōka which are considered to teach Prapatti or self-surrender as a means of salvation.

The MS. under notice contains the first Rahasya complete and the second incomplete.

Beginning:

श्रीश्रीनिवासमुनिवर्यशठारिसूर्यो-
रव्याजसिद्धकरुणापरिलब्धबोधम् ।
श्रीशैलवंशतिलकं श्रितपारिजातं
श्रीवीरराघवगुरुं प्रणमामि नित्यम् ॥

सर्वलोकोज्जीवनाय रहस्यत्रयं व्याचिख्यासुः परमकारुणिको लोकाचार्यः प्रथमं मुमुक्षोः व्याख्येयत्रयस्यावश्यापेक्षितत्वं दर्शयति முமுக்ஷுவுக்கு इत्यादि । मुमुक्षुः अविच्छिन्नभगवदनुभवप्रतिबन्धकसंसारनिवृत्तीच्छावान् । तेन कैवल्योच्छेदव्युदासः । एतस्यावश्यापेक्षितं रहस्यत्रयम ॥

* * * *

Colophon:

इति श्रीशैलकुलतिलकश्रीमद्रामानुजाचार्यसूनुना तच्चरणनलिनमकरन्दमधुव्रतेन श्रीनिवासरामानुजमुनिश्रीमच्छठारिगुरुवरनिर्व्याजकृपासमधिगतनिखिलार्थतत्त्वयाथात्म्येन श्रीवीरराघवदासेन विरचितायां रहस्यत्रयव्याख्यायां तात्पर्यदीपिकाख्यायां मूलमन्त्राधिकारः ॥

End:

अथात्र समस्तश्च श्रीमच्छब्द उदीर्यते ।
शरण्यशरणद्वन्द्वाविशेषणविवक्षया ॥

शास्त्राभियुक्तवचनात् शेषयुक्तः प्रतीयते ।
नारायणस्य चरणौ श्रीमन्ताविति (निर्ण)यः ॥
जन्मेदं सफलं श्रीमन्नारायण कृपालय ।
श्रीमत्त्वत्पादकमले प्रपद्ये शरणं विभो ॥

R. No. **16.**

Paper. $13\frac{3}{8} \times 8\frac{3}{8}$ inches. Foll 144. Lines. 22 to a page Grantha. Good.

Transcribed in 1910-11 from a MS. of M. O. Anandālvar of Bangalore

श्रुतप्रकाशिकाव्याख्या—तूलिका.

ŚRUTAPRAKĀŚIKĀVYĀKHYĀ: TŪLIKĀ.

This is a commentary by Śrīnivāsacarya, a disciple of Samarapuṅgava, on Śrutaprakāśikā of Sudarśanabhaṭṭa, son of Vāgvijayin, which is again a commentary on Bhagavadrāmanuja's Brahmasūtrabhāṣya

Contains the first three Pādas complete and the fourth incomplete in the first Adhyāya.

Beginning:

वन्देऽहं वेङ्कटाधीशं वात्सल्यादिगुणाकरम् ।
वारिजासनया सार्धं वाञ्छितार्थप्रदं नृणाम् ॥
श्रुतप्रकाशिकां श्रुत्वा सम्यक् समरपुङ्गवात् ।
वाधूलश्रीनिवासेन क्रियते तूलिका मया ॥
स्खलितं तु यदज्ञानादत्र लेखकदोषत. ।
तत्समाधाय विद्वद्भिः ग्राह्येयं वीतमत्सरैः ॥

वाग्विजयिसूनुस्सुदर्शनापरनामा भट्टार्यवर्यः श्रीमच्छारीरकभाष्यं व्याचिख्यासुः प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थमिष्टदेवतोपासनात्मकं मङ्गलमाचरति—वरदमिति ।

यद्यपि श्रीरङ्गनिवासिनः स्वस्य श्रीरङ्गनाथसमाश्रयणमेवोचितम्; तथापि करिगिरिपतेरर्थितार्थप्रदानदीक्षिततया स्वाभिलषिताविघ्नपरिसमाप्तिप्रचयगमनरूपार्थसिद्धिस्तत्समाश्रयणे अमोघेति मनीषया स्वस्य भाष्यार्थप्रदापयितृत्वेन उपकारकतया च करिगिरिपतिसमाश्रयणमुचितमिति मन्तव्यम्।

भाष्यव्याख्याने प्रवृत्तस्य भवतो भाष्यानन्तर्भूतश्लोकव्याख्यानमनुचितमित्यभिप्रायेण शङ्कते—ननु सूत्रार्थे इत्यादिना। अधिकर्तुं योग्ये-त्यभिधानं हि न शक्यमिति। निपातद्योत्यानां विशेषाणां पदान्तरान्वयानर्हत्वादिति भावः। इमे चाभ्युच्चययुक्ती इति। इमे अथातश्शब्द स्वारस्ये। अभ्युच्चययुक्ती इति पूर्ववृत्तसापेक्षतया सापवादत्वादिति भावः। अतश्शब्देन कर्मविचारस्य हेतुतयोक्तत्वात्कथं विशिष्टहेतुसिद्धिरित्या शङ्कय विशिष्टहेतुस्वरूपं दर्शयन् तस्मातश्शब्दोक्तार्थफलितत्वं दर्शयति—कर्मविचारानन्तरमित्यादिना।

End:

कर्मादि(ति)शयलब्धैश्वर्यजीवत्वशङ्काया अभावादिति भावः।

Colophon:

इति श्रीवाधूलश्रीनिवासाचार्यविरचितायां श्रुतप्रकाशिकातूलिकायां प्रथमस्याध्यायस्य तृतीयः पादः॥

आनुमानिकमित्येकेषामिति चेन्न।

* * * *

गायत्री वा इदं सर्वमित्यादिना व्याचष्टे—तथाहि गायत्री वा इदमित्यादिना।

R. No. **17.**

Paper. $11\frac{1}{8} \times 8\frac{7}{8}$ inches. Foll. 96. Lines. 18 to a page. Dēvanāgarī. Good.

Transcribed in 1910-11 from a MS. of E R. Śrinivasaraghavacarya of Kalyaṇapuram.

तैत्तिरीयोपनिषद्वृत्तिः—मिताक्षरा.

TAITTIRĪYŌPANIṢADVṚTTIḤ : MITĀKṢARĀ.

This is a commentary by Gōvindarāja of Kauśikagōtra, a disciple of Saṭhakōpadēśika, on Taittirīyōpaniṣad.

Complete

Beginning:

वेदाय वेदवेद्याय वेदव्यासाय विष्णवे ।
मुनये लक्ष्मणार्याय करोमि सततं नमः ॥
श्रीमल्लक्ष्मणयोगीन्द्रसूक्तिसूचितया दिशा ।
तैत्तिरीयोपनिषदां वृत्तिं कुर्वे मिताक्षराम् ॥

उक्तानि प्रथमे काण्डे दर्शपूर्णमासादीनि विश्वसृजामयनपर्यन्तानि कर्माणि । तदाराध्यतत्फलप्रदपरमात्मस्वरूपतदुपासनतत्फलानि निरूपयितुं द्वितीयमौपनिषदं काण्डमारभ्यते । उप ब्रह्मसमीपे निषीदन्तीत्युपनिषदः, परब्रह्मप्रतिपादिका विद्याः, तास्त्रय्यो भवन्ति—सांहित्यो याज्ञिक्यो वारुण्यश्चेति ।

End:

यथा स एवं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकमिति । उत्तरायणदक्षिणायनमृतयोः सूर्यचन्द्रप्राप्तिव्यवस्थातारतम्यादिति ज्ञेयम् । प्राधान्यं च उदगयने मृतस्य सूर्यादधिकोपचारः । दक्षिणायने मृतस्य चन्द्रादधिकोपचार इति ॥

चतुःषष्टितमोऽनुवाकः ॥

इत्थं श्रीशठकोपदेशिकपदद्वन्द्वारविन्दद्वयी-
सेवासौम्यरसानुभूतिविभवव्यक्तत्रयीतत्त्वधीः ।
श्रीमत्कौशिकवंशमौक्तिकमणिर्गोविन्दराजाभिधः
विद्वानुत्तमतैत्तिरयिकवचस्त्रय्यन्तवृत्तिं व्यधात् ॥

Colophon:

इति श्रीगोविन्दराजविरचितं तैत्तिरीयोपनिषद्भाष्यं समाप्तम् ॥

R. No 18.

Paper $8\frac{3}{4} \times 6\frac{1}{4}$ inches. Foll. 112. Lines, 12—14 to a page Grantha, Good.

(*a*) नव्यमतवादार्थः.

NAVYAMATAVĀDĀRTHAḤ

Restored in 1910-11 from an old MS. in the Library

Foll. 1*a*—57*a*.

This is a discussion on the subject that the Parāmarśa as understood by modern Tārkikas (logicians) leads to Anumiti or inference. Parāmarśa in logic indicates a knowledge of the minor premise in its connection with the major by Gadādhara.

Complete.

Beginning :

अनुमितिं प्रति पर्वतीयधूमव्यापको वह्निरित्याकारकपरामर्श एव हेतुः, न तु वह्निव्याप्यधूमवानयं पर्वत इत्याकारकः, तद्धेतुत्वे कारणतावच्छेदककोटौ व्यापकसामानाधिकरण्यरूपव्याप्तिघटकीभूतसामानाधिकरण्यादिपदार्थविषयताधिक्येन गौरवादिति तु व्यापकताज्ञानकारणतावादिनः ।

End :

एवं तादृशप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीकालेऽर्थापत्तिसामग्र्यावश्यकत्वेनार्थापत्तिसामग्र्यभावघटितानुमितिसामग्र्यभावेन तदानीमनुमित्यनुत्पादनिर्वाहेणानुमितौ तादृशसामग्र्याः प्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवमप्यनुमित्यादिकं प्रत्यर्थापत्त्यादिसामग्र्याः प्रतिबन्धकत्वकल्पनवादिमते अक्षुण्णमेवेत्याहुः ॥

Colophon :

इति नव्यमतवादार्थः ॥

Foll. 58 and 59 are left blank.

(*b*) दुष्करश्लोकव्याख्याटिप्पणी.

DUṢKARAŚLOKAVYĀKHYĀṬIPPAṆI.

Foll. 60*a*—112*a*

Transcribed in 1910-11 from a MS. of M. O Anandālvār of Bangalore.

Contains notes by Vīraraghava of Vādhūla family to the Tamil commentary of Periyavaccānpillai on the 53rd stanza of the 10th Sarga in the Rāmāyana (Kumbakonam edition) commencing with the word "Duskara," etc.

Complete.

Beginning :

महीसारपुराधीशो महनीयगुणाम्बुधिः ।
भक्तिसारो विजयते भुक्तिमुक्तिप्रदो नृणाम् ॥

इह खलु श्रीरामायणमुत्तमं काव्यमिति प्रसिद्धम् । उत्तमं काव्यं च ध्वनिप्रधानं काव्यमिति काव्यलक्षणविदः प्राहुः । यत्र वाच्यातिशायि व्यङ्ग्यं स ध्वनिरिति ध्वनिविदः समामनन्ति । समुद्रमिव रत्नाढ्यमिति वचनेन समुद्रे रत्नवत् श्रीरामायणे गूढार्था बहवः सन्तीत्यवगम्यते । रत्नदृष्टान्तेन चात्र प्रायशः प्रतीयमानानामर्थानां फेनबुद्बुदस्थानीयत्वं गूढार्थानां प्रकृष्टप्रयत्नलभ्यरत्नवत् समभिव्याहारादिव्यञ्जकसामग्रीरूपप्रकृष्टोपायावगम्यत्वं च सूच्यते ।

* * *

तत्र 'काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्' इति वचनेन सीताया मन्त्ररत्नस्थश्रीमत्पदाभिप्रेतपुरुषकारभावेनात्रोपबृंहणीयत्वावगमात् पुरुषकारभावे च भगवद्वशीकारहेतुवाल्लभ्योत्तम्भकाभिरूप्यादेरपेक्षितत्वात् काष्ठाव्यञ्जिकां सीताविश्लेषकालिकरामसत्ताप्रयुक्तरामगर्हारूपां हनुमत्कर्तृकां शिष्टगर्हां प्रतिपादयन्तं 'दुष्करं कृतवान्' इतिश्लोकं व्याचिख्यासवो भगवत्कृष्णपादा हनुमत्कृतगर्हायाः कामुकत्वादिनान्यथासिद्धिपूर्वकमुपदर्शिताभिरूप्यकाष्ठाव्यञ्जकत्वं प्रदर्शयन्तोऽवतारयन्ति—अन्यत्र भीष्मादित्यादिना ।

End :

अनया च शिष्टगर्हया सीताया वैलक्षण्यातिशयव्यञ्जनात् रामेण तदुक्तवचनतिलङ्घनप्रतीतेर्मन्त्ररत्नप्रथमपदाभिप्रेतपुरुषकारभावोऽनेन श्लोकेनोपबृंहित इति हृदयम् ॥

उत्तमं काव्यमित्यस्य समाख्यानानुरोधतः ।
इदं महार्थमित्युक्त्या रत्नाढ्याभ्युपमोक्तितः ॥

* * * *

लब्धानवश्यवक्तव्यांश्चारून् न्यायज्ञसंमतान् ॥
अर्थान् दिव्येन मनसा कृष्णपादगुरूत्तमाः ।
मद्विधेऽनुग्रहादित्थं दर्शयांचक्रिरे स्फुटम् ॥
मया मन्दधियाप्येते कथंचिद्विवृता इति ।
इमं दोषं जुषन्तां मे वत्सला मम देशिकाः ॥

Colophon :

इति श्रीवाधूलवरिराघवकृता दुष्करश्लोकटिप्पणी संपूर्णा

R. No. **19.**

Paper. 13½ × 8¼ inches. Foll. 205. Lines, 20 to a page. Dēvanāgarī. Good

Trascribed in 1910-11 from a MS. of M. O. Anandālvār of Bangalore

नञ्जराजयशोभूषणम्.

NAÑJARĀJAYAŚŌBHŪSANAM.

This is a work on Sanskrit poetics. The stanzas which illustrate the various figures of speech, etc., relate to the glorification of Nañjarāja, son of Vīrabhūpa : by Nṛsiṁhakavi *alias* Abhinavakālidāsa, a disciple and son of Śivarāma and a friend of Ālūr Tirumalakavi *alias* Abhinavabhavabhūti.

Contains the following Ullāsas :—

(१) नायकनिरूपणम्.
(२) काव्यनिरूपणम्.
(३) ध्वनिनिरूपणम्.
(४) रसनिरूपणम्.
(५) दोषगुणनिरूपणम्.
(६) चन्द्रकलाकल्याणम्.
(७) अलङ्कारनिरूपणम्.

Beginning :

वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥

यद्दीक्षाञ्चलकल्पिता हरिहरब्रह्मादयो निर्जराः
यस्यैक्यं समुपासते च कृतिचित् तत्त्वं महायोगिनः ।
विश्वाकारतया चिराय समभूदीशोऽपि यस्य त्विषा
तच्छम्भोरनपायधाम किमपि प्रस्तोतुमीशे हृदि ॥

चिदाकाराय शुद्धाय सर्वविद्याविधायिने ।
योगानन्दयतीन्द्राय सान्द्राय गुरवे नमः ॥

शिवरामसुधीसूनोर्नरसिंहकवेः कृतिः ।
नञ्जराजगुणग्रामैर्भूषितैर्भुवि दीप्यतु ॥

नवं वा प्राचीनं भवतु ननु काव्यं सुचरितं
रसस्यन्दि स्यात् तत् सहृदयचमत्कारि भवति ।
सुधापारावारो निवसतु चिरत्नोऽपि सरसा
न रुच्यः किं तस्मादपि जगति राकाहिमरुचिः ॥

रसालंकाराद्यैर्ध्वनिभिरपि कैश्चित् सुरभिलैः
प्रगीयन्ते काश्चित् भुवि कवयतां साधुकृतयः ।
इयं चास्माकीना भुवनजननीपादकमल-
प्रणामप्राचुर्याद्वहतु महतामादरभरम् ॥

शरत्फुल्लन्मल्लीविगलितमधूलीरसरमा
धुरीणा मद्वाणी सुखयतितरामेव सुधियः ।
विधत्ते किं तोषं जगति बधिराणामिह नट-
द्वधूटीसाटोपस्फुरितमणिकाञ्चीकलरवः ॥

गुणा भूषायन्ते सहजमधुरा नञ्जनृपतेः
कृतेरस्या एते(त्रि)जगति धुरीणा अपि तथा ।
ततः सैषा भूयः स्रागिव(नव) सौरभ्यभरिता
कवीनामानन्दं जनयतु जगद्रञ्जयतु च ॥
असंख्येयास्तेऽमी कथमपि गुणा नञ्जनृपतेः
परिष्कर्तुं को वा प्रभवति तदल्पेन मनसा ।
तथाप्युद्दामोऽयं गुरुवरकृपासारविसरः
समुद्वेलं मां (मन्तादुद्वेलं)मुखरयति मामेव बहुधा ॥

* * * *

अथैते नायकगुणा निरूप्यन्ते—

उदारता महाभाग्यं कुलीनत्वं विदग्धता ।
औज्वल्यं च तथा शौर्यं धार्मिकत्वादयो मताः ॥

तत्र,

विश्राणनैकशीलत्वमौदार्यं तन्निगद्यते ।

यथा—

पट्टग्रैवेयाद्यैः परिमृदितमाणिक्यघटितैः
कवीनां संदोहेष्वपि निजसमानेषु सदसि ।
सपक्षक्षोणीपाः क्षितिपतिलकं नञ्जनृपतिं
निरीक्ष्यासेवन्ते करतललसद्दानवलयम् ॥

End :

बाधकं यथा—

सर्वसुपर्ववधूटीसंततसंगीतगीयमानगुणः ।
नेता नञ्जनरेन्द्रः स्निग्धां पुष्णाति वसुमतीयुवतिम् ॥

अत्र वसुमती युवतीवेति उपमालंकारे स्निग्धामिति विशेषणं बाधकम् । ‘उपमितं व्याघ्रादिभिः सामान्याप्रयोगे’ इत्यनुशासनेन सामान्य-

प्रयोगस्य उपमितसमासनिरोधकत्वात् । अत्र पारिशेष्याद्रूपकालङ्कारः । एवमन्येषामलंकाराणां यथासंभवं संसृष्टिसंकरौ ।

संक्षोभ्यतामतिधनैर्मम तु प्रबन्धो
नान्यो यदत्र मधुरा बहवः पदार्थाः ।
आलोड्यते हि विबुधैर्विमलः पयोधिः
नान्यो वितीर्णकमलामणिकल्पभाजः ॥

आचन्द्रतारमखिलामरमञ्जुवाणी-
पुञ्जेन वर्णितगुणानि भवद्यशांसि ।
नञ्जक्षितीन्द्र नयमार्गविधूततन्त्र
भूयो जयन्तु भुवनानि चिरं जयन्तु ॥

वाणीयं भुवि वर्ततां बुधजनश्लाघ्या त्रिलोकीजुषां
सौभाग्यैकनिकेतनं च शशिनो वंशः सदा वर्धताम् ।
देवश्चन्द्रकलाधरश्च दयया निर्व्याजमाप्यायितो
नित्यं नञ्जमहीमहेन्द्रहृदये वासं विधत्तां मुदा ॥

आल्लूरातिरुमलकवेरभिनवभवभूतिनामबिरुदस्य ।
सुहृदा नृसिंहकविना कृतिरक्रृत नवीनकालिदासेन ॥

करुणारसकल्लोलकलितापाङ्गवीक्षणम् ।
कंदर्पजनकं धाम कल्याणानि करोतु नः ॥

Colophon :

इति श्रीपरमशिवावतारशिवरामदेशिकचरणारविन्दानुसंधानमाहिम-समासादितनिःसहायदैनन्दिनप्रबन्धनिर्माणसाहसिकनिखिलविद्वज्जनलाल-नीयसरससाहितीसंप्रदायप्रवर्तकनरसिंहकविविरचिते नञ्जराजयशोभूषणे अ-लंकारशास्त्रे अलंकारनिरूपणं नाम सप्तमो विलासः ॥

R. No. 20.

Paper. 13⅜ × 8⅜ inches. Foll 73. Lines, 20 to a page. Grantha. Good.

(*a*) शब्दखण्डसारमञ्जरी.

ŚABDAKHAṆḌASĀRAMAÑJARĪ.

Foll. 1*a*--24*a*.

Restored in 1910-11 from the MS. of the Library described under No. 4309 of the D.C S MSS., Vol. VIII.

Contains the कारकविवेचन portion only.

(*b*) विशिष्टान्तराघटितत्वविचारः.

VIŚIṢṬĀNTARĀGHAṬITATVAVICĀRAḤ.

Foll. 25*a*--32*b*.

Restored in 1910-11 from the MS. described under No. 4283 of the D.C S. MSS, Vol. VIII.

Complete.

(*c*) ब्रह्मसूत्रभाष्यटीकाव्याख्या— न्यायमौक्तिकमाला.

BRAHMASŪTRABHĀSYAṬĪKĀVYĀKHYĀ: NYĀYAMAUKTIKAMĀLĀ.

Foll. 33*a*—73*b*.

Transcribed in 1910-11 from a MS. of Subbarāyācār of Śrīrangam.

This is a commentary explaining Ānandatīrtha's Brahmasūtrabhāsya and Jayatīrtha's Ṭīkā thereon; by Vijayīndrabhikṣu, a disciple of Pūjanēndratīrtha.

Contains the Jijñāsāsūtra portion only.

Beginning:

ननु भगवत्पादैरनुव्याख्याने—

तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेप्यते ।

सर्वत्रानुगतत्वेन पृथगोंक्रियते (बुधैः) ॥ इति

अथातो ब्रह्मजिज्ञासेति सूत्रस्य तारशब्दितोङ्कारमूलत्वमुक्तम् । यथाथ . . . . मूलत्वं तत्रैव तारशब्दित ओङ्कारः

ओंतत्त्ववाचीत्योङ्कारः वक्तृत्यसौ तद्गुणौततताम् ।

इति व्याख्यातश्च । तत्र तारस्य मूलत्वं नाम नाथशब्दादिवत् सूत्रकृता तच्छरीरप्रविष्टतयोच्चारितत्वम्, मानाभावात् । प्रत्युत अथातो ब्रह्मजिज्ञासेत्येतावन्मात्रमेव प्रथमसूत्रमिति प्रसिद्धेः तदविरोधायापि न तस्य तथात्वं वाच्यम् । नापि सूत्रकृतः कर्तव्यवत् अध्याहार्यत्वेन तात्पर्यविषयत्वं वा, तदर्थनिरूपितसंसर्गप्रतीतार्थविषयत्वं वा, मानाभावादेव ।

End:

अतएवेतरेतरयोगे द्वन्द्वे स्वपदादुपस्थितयोः पदार्थयोर्विभक्त्यर्थद्वित्वान्वयसंभवे न शक्तिर्न वा लक्षणा । समाहारे तु एकवचनानुपपत्त्या च पाणिपादसाहित्ये विनिगमनाविरहात् . . . . द्वयोः प्रथमोपस्थितत्वात् पाणिपादे च लक्षणेत्याहुः ॥

इति श्रीविजयीन्द्राख्यभिक्षुणा प्रीतये हरेः ।
अथातो ब्रह्मजिज्ञासासूत्रव्याख्या कृताञ्जसा ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्सुरेन्द्रतीर्थपूज्यपादशिष्यस्य सर्वतन्त्रस्वतन्त्रस्य विजयीन्द्रभिक्षोः कृतौ भाष्यचतुष्टयतट्टीकार्थप्रकाशिकायां न्यायमौक्तिकमालासमाख्यायां जिज्ञासासूत्रव्याख्यानं समाप्तम् ॥

R. No. **21.**

Paper. 13¼ × 8¼ inches. Foll. 75. Lines, 20 to a page. Grantha. Good.

Transcribed in 1910–11 from a MS. of Raṅgarāmānujācārya of Nellore.

न्यासविद्यापरिष्कृतिः.

NYĀSAVIDYĀPARIṢKṚTIḤ.

Deals with the characteristics of what is known among the Śrīvaiṣṇavites as Prapatti, *i.e.*, delivering oneself up to God.

By Śrīnivāsadāsa of Yādavādri, son of Vēṅkaṭācārya, grandson of Varadācārya of Vādhūla family and a disciple of Pādukāsēvaka Rāmānuja.

Complete.

Beginning:

जयन्ति जगतां पत्युर्जगद्रक्षणसंमुखाः ।
मूर्ता इव दयापूरा ह्यस्मदाचार्यपङ्क्तयः ॥

पोपोष्टि ज्ञानदृष्टिं सततमविकलं चाकशीति प्रकाशैः
पेपेष्टचन्धं तम त् दिशि दिशि विबुधान् रञ्जयन् बोभवीति ।
वर्वष्टचानन्दधारां हृदि भुवि दिनकृत् कोपि वर्वर्ति शिष्यैः
वेवेष्टचवा यतीन्द्रोऽद्भुतमहिमनिधिः संततं जेजयीति ॥

जयति निगमचूडादेशिकेन्द्रो जगत्यां
कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ।
तुरगवदनहेषाधोरणी चेच्छिदीति
श्रुतिशिखरविपक्षान् यस्य सूक्तिच्छलेन ॥

तुरङ्गमोत्तमाङ्गसद्यचस्तराङ्गिणीधवो-
त्तमा(र)ङ्गभङ्गपूर्णिमाकुरङ्कलक्ष्मसूक्तिकः ।
दुरङ्गजादिसङ्गतिं नुदन्नपाङ्गलीलया-
स्तु रङ्गनाथयोगिराणमदन्तरङ्गरङ्गके ॥

यत्सूक्तिन्यासविद्याप्रतिकृतिरमला द्राविडीभाष्यरत्नं
भूषापेटी श्रुतीनां श्रुतिशिखरगुरोः सूक्तितात्पर्यरत्नम् ।
श्रीमच्छ्रीतत्त्वसिद्धाञ्जनमखिलकलासारसर्वस्वमग्र्यं
स श्रीवेदान्तरामानुजमुनितिलको मानसे संनिधत्ताम् ॥

वाधूलान्वयदुग्धाब्धिराकाचन्द्रमसोऽन्वहम् ।
श्रीमतो वेङ्कटार्यस्य चरणौ शरणं श्रये ॥
कवितार्किकसिंहस्य देशिकेन्द्रस्य सूक्तयः ।
दिशन्तु नित्यं प्रज्ञां मे न्यासयाथात्म्यगोचराम् ॥
निक्षेपदीपश्रीन्यासविद्यादर्पणदर्शिताः ।
स्फुरन्तु मेऽर्था निक्षेपचिन्तामणिविभूषिताः ॥
अस्मद्गुरुभ्य आरभ्य नत्वा गुरुपरम्पराम् ।
महतामाज्ञया कुर्वे न्यासविद्यापरिष्कृतिम् ॥

श्रीमन्न्यासविद्याया अङ्गानि आनुकूल्यसंकल्पप्रातिकूल्यवर्जनकार्पण्यमहाविश्वासगोप्तृत्ववरणरूपाणि पञ्चविधानि संनिपत्योपकारकाणि सर्वाधिकारिसाधारणानि । स्वरूपं रक्षाभरसमर्पणरूपम् । मोक्षार्थिनां तु स्वरूपभरफलसमर्पणरूपदलत्रयात्मकम् । सात्त्विकत्यागरूपाङ्गान्तरं तु अङ्गप्रधानसाधारणाङ्गमिति सिद्धान्तः ।

End:

न्यासविद्यापरिष्कृत्या परिष्कृतपदाम्बुजः ।
प्रीयतां श्रीहयग्रीवो दयन्तां मम देशिकाः ॥

Colophon:

इति श्रीमद्वाधूलकुलतिलकपदवाक्यप्रमाणपारावारपारदृश्वमूर्धन्यवेदान्तयुगलनिखिलरहस्यजालनिषद्यायितहृदयकमलश्रीवरदाचार्यात्मजश्रीवेङ्कटाचार्यतनयेन श्रीमत्संयमिसार्वभौमविजयस्थानापरनामधेयश्रीयादवाद्रिनिवासिना श्रीपादुकासेवकरामानुजसंयमीन्द्रकरुणाकटाक्षसमधिगतोभयवेदान्तनिखिलरहस्यहृदयेन तच्चरणारविन्दसमर्पितस्वात्मभरेण श्रीश्रीनिवासदासेन विरचिता श्रीन्यासविद्यापरिष्कृतिः संपूर्णा ॥

R. No. **22.**

Paper. $8\frac{7}{8} \times 5\frac{1}{2}$ inches. Foll. 152. Lines, 8 to a page. Dēvanāgarī Good.

Transcribed in 1910-11 from a MS. obtained through Mr. R. A. Narasiṁhācārya of Bangalore.

प्रमेयरत्नमाला—लघुवृत्तिसहिता.

PRAMĒYARATNAMĀLĀ WITH LAGHUVṚTTI.

Same work as the one described under No. 5174 of the D.C.S. MSS., Vol. XI.

Complete.

R. No **23.**

Paper. $11 \times 8\frac{3}{8}$ inches. Foll. 112. Lines, 18 to a page. Dēvanāgarī. Good.

Transcribed from a MS. of T. B. Rāmācārya of Bangalore.

गाथासप्तशती—सटीका.

GĀTHASAPTAŚATĪ WITH ṬĪKĀ.

This is a collection of 700 erotic stanzas in Prākṛt by Śatavāhana.

Contains the following seven Śatakas.

I. स्त्रीवर्णनसुरतानुरागवर्णनपद्धतिः.

II. विरहपद्धतिः.

III & IV. दूतीवचनग्रामीणकुलवधूपद्धतिः.

V. जरतीकुमारीपद्धतिः.

VI. प्रणयकलहपद्धतिः.

VII. प्रथमगर्भिणीदोहदवर्णनम्..

The text is accompanied by a gloss, apparently the same as the one attributed to Īśvara; by Barnell—*vide* 174*b* of the Tanjore Palace Library catalogue

Beginning:

पसुवइणो रोसारुण पडिमासंकन्दगोरिमुहअन्दम् ।
गहिअग्घपङ्कआविअ सन्धासलिलञ्जलिं णमह ॥

पशुपते रोषारुण प्रतिमासंक्रान्तगौरीमुखचन्द्रम् ।
गृहीतार्घ्यपङ्कजमिव संध्यासलिलाञ्जलिं नमत ॥

अनया गाथया सातवाहननरेन्द्रोऽविघ्नेन ग्रन्थपरिसमाप्तये इष्टदेवतानमस्कारं करोति ।

रहकेलिहिअणिअंसणकरजुअलणिरुद्धणअणजुअलस्स ।
रुद्दस्स तइअणअणं पव्वईपरिचुम्बिअं जअइ ॥
रतिकेलिहृतनिवसनकरयुगलनिरुद्धनयनयुगलस्य ।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ॥

End :

किं तस्स पावरेणं किमङ्गिणा किं व गब्भगरएण ।
जस्स उरम्मि णिसज्जइ वह्मान्तत्थणी जाअ ॥
किं तस्य प्रावरणेन किमग्निना किं वा गर्भगृहेण ।
यस्योरसि निषीदति ऊष्मायमाणस्तनी जाता ॥

Colophon :

इअ सत्तसईए खण्डिआवअणपुप्फबई
गब्भिणीवाहउदुव्वण्णणपद्धईणाम सत्तजं सअअं समत्तम् ॥

इह सप्तशत्यां प्रथमगार्भिणीदोहदवर्णनपद्धतिर्नाम सप्तमं शतकं समाप्तम् ॥

सातवाहनेन कृता प्राकृतसप्तशती संपूर्णा ॥

R No. 24.

Paper. 8½ × 6¾ inches. Foll. 208. Lines, 12 to a page. Grantha. Good.

Transcribed in 1910–11 from a MS. of M O. Anandāḷvār of Bangalore.

(*a*) सच्छूद्राचारनिर्णयः.

SACCŪDRĀCĀRANIRṆAYAḤ.

Foll. 1*a*—159*b*.

Deals with the rites and ceremonials prescribed in the Śāstars for the Śūdra community: by Cikkdēvarāja, son of Doḍḍadēvarāja and grandson of Dēvarāja of Mysore.

Complete in fourteen Adhikāras

Beginning:

जयतु भुवनजन्मस्थेममोक्षादिलीलं
सहजसकलकल्याणैकतानं महीयः ।
अपि च निखिलहेयप्रत्यनीकं तदेकं
वटदलशयनीयं ब्रह्म लक्ष्मीसहायम् ॥

* * * *

ययातिर्नहुषादासीद्ययातेर्यदुभूपतिः ।
द्वारकानगरोपान्ते सन्तता तस्य सन्ततिः ॥
तस्यां कृतावताराः कतिचन कर्णाटदेशमाजग्मुः ।
यदुगिरिशिखराभरणं नरनारायणमीक्षितुं रमारमणम् ॥
रामणीयकमालोक्य देशस्यास्य समुत्सुकाः ।
अत्रैव वसतिं चक्रुर्महीशूरपुरे वरे ॥
तेष्वासीदरिगोधूमघुरट्टो बेट्टचामराट् ।
प्रापा(पै)म्बरगण्डाख्यं प्राज्यं बिरुदमूर्जितम् ॥
सुतास्त्रयोऽस्य तेष्वाद्यस्तिम्मराजमहीपतिः ।

* * * *

आसीदनन्तरस्तस्य सोदरः कृष्णभूपतिः ।

* * * *

आसीदस्य कनीयांश्चामनृपस्सर्वसद्गुणगरीयान् ।
रेमटिवेङ्कटमाजावजयद्यो रामराजसेनान्यम् ॥
चत्वारोऽस्य कुमारा[नि]सदृशास्ते(ऽमी)परस्परं सदृशाः ।
जाता विजयसहायास्साक्षादिव साधनोपायाः ॥
तेष्वादिमो राजधराधिराजस्सङ्ग्रामभूमौ किल सप्रतिज्ञम् ।
गर्वोद्धतं कारुकहल्लिनाथमपोथयद्वाजिकशाभिघातैः ॥

जित्वा तिरुमलराजं हृत्वा श्रीरङ्गपत्तनमिहासौ ।
सिंहासनमधितिष्ठन्नन्वभवत्सार्वभौमसाम्राज्यम् ॥
तस्यानुजो बेट्टदचामराजः प्रतापसन्तापितवैरिराजः ।
यज्ञोपवीताकृतिभिः क्षतैर्द्राग्रणाङ्गणे येन गणेया(?) ॥
तस्यासीद्देवराजेन्द्रस्सोदरस्समनन्तरः ।
चन्नराजोऽनुजो यस्य जिष्णोर्विष्णुरिवाजनि ॥
अस्य श्रीदेवराजेन्दोरनुरञ्जयतः प्रजाः ।
चत्वारो जज्ञिरे पङ्क्तिस्यन्दनस्येव नन्दनाः ॥
दोड्डदेवराजनामा तेषामाद्यो रघूद्वहो नियतः ।

* * * *

लक्ष्मण इव द्वितीयस्तेषु श्रीचिक्कदेवराजेन्द्रः ।
चिक्कदेवमहीपालस्सच्छूद्रानुजिघृक्षया ।
प्रबन्धमकरोदेनं सच्छूद्राचारनिर्णयम् ॥
तत्र चादौ शूद्रजातिस्वरूपस्य निरूपणम् ।
शूद्राणां तत्समानां च शास्त्रवश्यत्वनिर्णयः ।
तेषां हि विद्यास्थानेषु चाधिकारानधिक्रिये ।
मुख्यधर्माश्च शूद्राणामापद्धर्मास्तथैव च ॥
निषेकादिषु कर्मस्वप्यधिकारानधिक्रिये ।
तथा श्रीपाञ्चरात्रोक्तदीक्षादिष्वप्यधिक्रिया ॥
ब्रह्मज्ञानेऽधिकारश्च सन्ध्याकर्मानधिक्रिया ।
सदसच्छूद्रभेदश्च सच्छूद्राह्निकनिर्णयः ॥
आशौचनिर्णयः कर्मप्रयोगस्य च पद्धतिः ।
उपोद्घाताधिकारेण सहैतानि चतुर्दश ॥

Colophon:

इति श्रीमन्महाराजाधिराजराजपरमेश्वरप्रौढप्रतापनप्रतिमवीरनरपति-श्रीचिकदेवमहाराजकृतिषु सच्छूद्राचारनिर्णये उपोद्घाताधिकारः ॥

जातकर्मादिषु निमित्तानन्तरं कालः । पृषदाज्येनाग्नौ करणम् । केचनाग्नौ करणं नेच्छन्ति । तत्र तत्तच्छाखाभेदो देशाचारश्च प्रमाणम् । अन्ये च विशेषाचारप्राप्ता यथायोगं स्वीकुर्युः ॥

Colophon:

इति श्रीमता यतिराजसंपत्कुमारेण . . संवर्धिते महति यादवकुले कृतावतरणस्य महीशूरनगराभरणस्य देवराजस्य पौत्रेण श्रीमदत्रिगोत्रपवित्रेण श्रीदोडदेवराजगर्भाम्बुधिकलाधरेण . . . . . . श्रीचिक्कदेवमहाराजेन प्रणीतेषु महाप्रबन्धेषु सच्छूद्राचारनिर्णये शूद्राणां कर्मप्रयोगाधिकारश्चतुर्दशः ॥

समाप्तश्चायं सच्छूद्राचारनिर्णयः ॥

(*b*) प्रायश्चित्तसूत्रम्.

PRĀYAŚCITTASUTRAM.

Foll. 161*a*—208*a*; foll. 160 is left blank.

Transcribed in 1910-11 from a MS. of T. B. Rāmacārya of Bangalore.

Prescribes the expiatory ceremonies to be performed in cases of omissions or deviations made in the conduct of sacrificial rites.

Incomplete.

Beginning:

अथातो मन्त्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्या(मः)—

सर्वत्रोपरिष्टान्मन्त्रकृतं यद्यधस्तान्निपतेत् । ब्रह्म प्रतिष्ठा मनसः इत्येतया प्रतिष्ठाप्यैतयैव स्रुवाहुतीर्जुहुयात् । हुत्वा वा प्रतिष्ठापयेत् । हुत्वानन्तरं कर्म नाद्रियेत ।

End:

पालाशः खादिरो वेध्मस्तयोरलाभे याज्ञिकानां वृक्षाणामन्यतमस्तेषामलाभे रुरुकापित्थकोविदारशल्मलश्लेष्मातक.

R. No. 25.

Paper 13¾ × 8¼ inches. Foll. 103. Lines, 20 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of M. O. Anandāḻvar of Bangalore.

भगवन्नामाचिन्तामणिः.

BHAGAVANNĀMACINTĀMAṆIḤ.

Deals with the beneficial results of repeating the names of God Viṣṇu: by Vēṅkaṭanāthasūri.

Complete in the following three Prakaraṇas:—

(१) प्रमाणसंग्रहः.
(२) अभ्युदयनिरूपणम्.
(३) पापनिवृत्तिनिरूपणम्.

Beginning:

तत्र चोदनालक्षणोऽर्थो धर्म इति सूत्रपर्यालोचनया बलवदनिष्टाननुबन्ध्यलौकिकश्रेयःसाधनत्वं धर्मलक्षणमवगम्यते । तच्च सामान्यतो विशेषतश्च भगवन्नाम्नामभ्युदयादौ विनियोगेन विष्णुधर्मादौ प्रपञ्चितम् । तथाहि अष्टषष्टितमे —

सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
तत्फलं समवाप्नोति कीर्तयित्वा जनार्दनम् ॥

त्रिसप्ततितमे—

कीर्तितः संस्तुतो ध्यातः पूजितः सेवितस्तथा ।
ऐहिकामुष्मिकां रक्षां करोति भगवान् हरिः ॥

End:

आवृत्तिस्तु वासनानुवृत्तौ वा भक्त्यभिवृद्धौ वा तत्तन्मनोरथसिद्धौ वा उपयुज्यते इत्यास्तिकानां पन्थाः । नामकीर्तनस्य पूर्वाघमात्रं कियदित्यलं विस्तरेण ॥

Colophon:

इति श्रीमद्वेङ्कटनाथसूरिविरचिते श्रीभगवन्नामचिन्तामणौ पापनिवृत्तिनिरूपणाख्यं तृतीयं प्रकरणम् ॥

R. No. **26.**

Paper. 13¼ × 8½ inches. Foll. 387 Lines, 20 to a page. **Grantha.** Good.

Transcribed from a MS of M O. Anandālvār of Bangalore.

भारतभावदीपिका.

BHĀRATABHAVADĪPIKĀ

Same work as the one described under No. 1964 of the D.C.S. MSS., Vol. IV. Contains Mōksadharma only in Śāntiparvan.

Beginning:

तरणिमुकुरनेत्रोत्तेजनाभां शरीर-
प्रतिकृतिमनुमाया भूम्नि चन्द्रान्तराभः ।
स्थिरदृगणुमसङ्गं यं नयत्यन्यथात्वं
तदभयममृतं सत् प्रत्यगीडे गवेन्द्रम् ॥

कणभक्षमक्षचरणं जैमिनिकपिलौ पतञ्जलिं च नुमः ।
श्रीमद्व्यासवचोम्बुधिनयशीकरवर्षिणो मुदिरान् ॥

सर्वविद्येशतामाविश्चिकीर्षू पूर्वपूरुषौ ।
श्रीनारायणधीरेशरूपौ हरिहरौ नुमः ॥

बहून् समाहृत्य विभिन्नदेश्यान्
कोशान् विनिश्चित्य च पाठमग्र्यम् ।
प्राचां गुरूणामनुसृत्य वाचं
व्याकुर्महे भारतमोक्षधर्मान् ॥

उत्तानेष्विह कोशविग्रहबलं पद्येषु नैवाश्रितं
गम्भीरेषु न सेतवो न विहिताः कूटा न न स्फोटिताः ।
नच्छिन्ना न तप(म)श्वराननप(त)तिभिक्तो न नाह्लादितो
नो दीनाश्च विभीषणा न विहिताः श्रीलक्ष्मणार्यश्रितैः ।

ननु मोक्षो नाम शरीरनाशादन्यो नास्ति, अशरीरं पावनं तं न प्रियाप्रिये स्पृशतः इति श्रुतेः । न च स्वयमेवोपनमतीति किं तदर्थशास्त्रेणेति चेन्न,

कर्तव्यमेव कर्मेह जानतामित्रकर्शन ।
अकर्माणो हि जीवन्ति स्थावरा नेतरे जनाः ॥
यावद्गोस्तनपानाच्च यावच्छायोपसेवनात् ।
प्राणिनः कर्मणावृत्तिं प्राप्नुवन्ति नरर्षभ ॥
इत्यारण्यके प्राक्कर्मसद्भावसाधनात् ।

End:

वेदान्ते लक्ष्मणार्यं क्रतुविधिविवृतौ तीर्थनारायणार्यं
तर्के धीरेशमित्रं फणिपतिभणितौ पोलगङ्गाधरार्यम् ।
वेदे साङ्गे पितृव्यं शिवमथ पितरं दक्षिणामूर्त्युपास्तौ
श्रौते चिन्तामणिर्यः शरणमुपगतो भूम्नि गोपालदेवम् ॥
व्याकरोन्मोक्षधर्मान् नीलकण्ठः समासतः ।
अनेन प्रीयतां देवो भगवान् गिरिजापतिः ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुरवंशावतंसस्य श्रीगोविन्द-सूरिसूनोः नीलकण्ठस्य कृतौ श्रीमन्महाभारतभावदीपे शान्तौ मोक्षधर्मः संपूर्णः ॥

अष्टाशीति(शत)तमोऽध्यायः ॥

R. No. **27.**

Paper. $10\frac{7}{8} \times 8\frac{3}{8}$ inches. Foll. 82. Lines, 18 to a page. Dēvanāgarī. Good.

Transcribed in 1910–11 from a MS. of M. O. Anandālvār of Bangalore.

यायातनाटकम्.

YĀYĀTANĀṬAKAM.

This is a drama having the story of Yayāti and Dēvayānī for its plot: by Rāmārya.

Contains only six acts. Incomplete.

Beginning :

लक्ष्म्या लीलाकलहकुतुकस्वापभाजो निचोलं
मोक्तुं मुक्तासरसृ(रु)चिमयं मोघयत्ने (मुरारौ) ।
* * * *
भिन्दन्मन्दस्मितनवशरच्चन्द्रलेखांशुरव्यात् ॥

अपि च,

वक्षस्यामुच्य(क्त)मुक्तपाटलपरिगतं कौस्तुभं कैटभारेः
तत्र प्रेक्ष्य स्वबिम्बैः सह कुचविगलत्तत्प्रातिच्छन्दबिम्बम् ।
. . . . संपद्यमानं
पत्युः प्रत्यामृशन्त्याः स्थितमवतु दरव्याकुलव्रीडिताक्षम् ॥

नान्द्यन्ते सूत्रधारः—(साशंसम्)

स्वस्ति स्वस्ति कविभ्यः स्वस्तिं पुनः स्वस्ति तेषु रसविद्भ्यः ।
सूनृतसूक्ति . . . . . . ॥
* * * *

नन्विदमेव प्रतिपन्नदासित्वां मामाश्वासयितुं प्रवृत्तं युष्मद्वचनं स्मारयति श्रीरामयकवेः कृतिं यायातं नाम नाटकम् ; यत्र शर्मिष्ठाया दासीत्वमपि श्लाघनीयम् ।

श्रीरामो यदि चारुशीतलगिरां सीता विधाता कवि
चित्रं वस्तु चरित्रमद्भुतगुणोदारं ययातेर्यदि ।
त्वद्गृह्यैः पटुभिः प्रयोगसरणौ. . . . . .
. . . . यशो लभ्यं विशुद्धं मया ॥

End :

चूडान्दोलितनीडदाडिमवनीकुञ्जान्तराले मना-
गुन्मीलत्कलविङ्कमण्डलगलद्रोणद्रुतप्रच्युतः ।
विष्वङ्मूर्छति पश्य विश्वविज . . . . र-
स्वैरह्लोत्कराकिङ्किणीकलकलात्कारानुकारी रवः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon :

इति रामार्यकृते यायाते षष्ठोऽङ्कः समाप्तः ॥

R. No. 28.

Paper. 13⅜ × 8⅛ inches. Foll. 175. Lines, 20 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of M O. Anandālvār of Bangalore.

लक्ष्मीतन्त्रम्.

LAKṢMĪTANTRAM.

Same work as the one described under No 5356 of the D.C.S. MSS., Vol. XI.

Complete.

R. No. 29.

Paper. 13½ × 8⅜ inches. Foll. 464. Lines, 22 to a page. Grantha. Good. Bound in two volumes.

Transcribed in 1910-11 from a MS. of M. O. Anandālvār of Bangalore.

वेदान्तकौस्तुभः.

VĒDĀNTAKAUSTUBHAḤ.

Same work as the one described under No. 5008 of the D.C.S. MSS., Vol. X.

Complete.

R. No. 30.

Paper. 13¼ × 8½ inches. Foll. 281. Lines, 22 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of M O. Anandāḷvār of Bangalore.

वेदान्तन्यायसुदर्शनम्.

VĒDĀNTANYĀYASUDARŚANAM.

A commentary on Brahmasūtra according to the Viśiṣṭādvaita philosophy: by Varadanārāyaṇa Bhaṭṭa.

From Adhyāya I to the end of Saṅkalpādhikaraṇa in Pāda 4, Adhyāya IV.

Beginning:

विश्वं जगद्वपुर्यस्य तमुदारगुणं हरिम् ।
निर्मलाविह्वलानन्तानन्दामृतनिधिं भजे ॥
यस्तूदास्त समस्तदेवदितिजैर्दर्पान्मृधेऽधः कृतैः
भूयो योद्धुममी मया विसदृशा इत्येव तं लीलया ।
यो लङ्केशमकम्पयत्कपिकुलैरुल्लोलकल्लोहलैः
कल्लोलाकुलसागरस्य दमकं तं राघवेन्द्रं स्तुमः ॥
येनोदग्रनिसर्गसर्गचिदचिज्जाताधिराज्यश्रियः
श्रीनाथस्य बलिष्ठदुष्टशमने शार्ङ्गासिचक्रादिवत् ।
स्वीयस्वामिविनिह्नवव्यसनिदुर्वादिप्रक्लृप्तान्यथा-
भावाभावकरायुतायितमयं जीयान्मुनिर्लक्ष्मणः ॥
ये लक्ष्मणार्यपादाब्जसेवानिष्णातमानसाः ।
तत्पादयुग्मरुक्माब्जपरागाणुत्वमाप्नुयाम् ॥
अहं लक्ष्मणमिश्रान्तेवासिक्रमसमागतम् ।
हृदि वेदान्तभाष्यार्थं ज्ञापयिष्याम्यनूक्तिभिः ॥

ओम् । अथातो ब्रह्मजिज्ञासा । अस्य शास्त्रस्य विषयो ब्रह्म । तन्निर्णयः फलम् । अत्र सर्वात्मशब्देन विशेषणं ब्रह्मस्वरूपं गुणरूप-विभवचेष्टित . . . . तदर्थः ।

* * * *

Colophon:

इति वरदनारायणभट्टविरचिते वेदान्तन्यायसुदर्शने प्रथमस्याध्यायस्य प्रथमः पादः ।

End:

बन्धो नामानिष्टानुभवः । स तु घटादेरिव जडत्वेनोपाधेर्न संभवति । अत उपाधिसंसृष्टस्यात्मन एवानिष्टवत ।

R. No **31.**

Paper. $13\frac{3}{8} \times 8\frac{3}{8}$ inches. Foll. 235. Lines, 20 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of M. O. Anandāḷvār of Bangalore.

वेदान्तविजयमङ्गलदीपिका.

VĒDĀNTAVIJAYAMAṄGALADĪPIKĀ.

Same work as the one described under No. 5021 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **32.**

Paper. $13\frac{1}{8} \times 8\frac{1}{4}$ inches. Foll. 26. Line , 20 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of T. B. Rāmācārya of Bangalore.

संप्रदायप्रदीपः.

SAMPRADĀYAPRADIPAḤ.

Same work as the one described under No. 5151 of the D.C.S. MSS , Vol. XI, wherein this has been named as संप्रदायकुलदीपिका.

Complete.

R. No. **33.**

Paper. 11 × $8\frac{5}{8}$ inches. Foll. 141. Lines, 20 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of Prasannācārya of Tiruppārkaḍal, North Arcot district.

सिद्धान्तकौमुदीव्याख्या—सुखबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ : SUKHABŌDHINĪ.

This is a commentary on Bhaṭṭōjidīkṣita's Siddāntakaumudi, by Nīlakaṇṭhavājapēyin, son of Varadēśvarayajvan, brother of Sundarēśvarayajvan and grandson of Rāmacandrādhvarin of Ātrēya family.

Wants beginning and end. Contains from Samjñāprakaraṇa to Acsandhi and from Avyayībhāva to Tatpuruṣa in Samāsa.

Beginning :

व्यावृत्तिराश्रयणीयेति न कौस्तुभग्रन्थासामञ्जस्यमिति ध्येयम् । एतेन न्यायसाम्यादिक्शब्दस्य स्थानित्वप्रसक्त्या इकारस्य स्थानिवत्त्वा . . . . . . कारसहित इत्यन्तो ग्रन्थो निरस्त इत्यपास्तम् ।

* * * *

Colophon :

इत्यात्रेयान्वयरत्नाकरकलानिधिश्रीरामचन्द्राध्वरिवरसूरेः पौत्रेण सर्वतन्त्रस्वतन्त्रस्य श्रीवरदेश्वरयज्वनः पुत्रेण सुन्दरेश्वरयज्वनोऽनुजेन नीलकण्ठवाजपेयिना विरचितायां सिद्धान्तकौमुदीव्याख्यायां सुखबोधिन्यां सञ्ज्ञाप्रकरणं समाप्तम् ॥

End :

एतच्च मिश्रग्रन्थे स्पष्टम् । फलानामिति करणस्यैव शेषत्वविवक्षया षष्ठी । न च न लोकेति षष्ठीनिषेध ।

R. No. **34.**

Paper. 13⅝ × 8⅜ inches Foll. 464. Lines, 22 to a page. Telugu. Good.

Transcribed in 1910-11 from a MS. of M. O. Anandālvār of Bangalore.

हरिमाहात्म्यदर्पणः.

HARIMĀHĀTMYADARPANAḤ.

Same work as the one described under No. 5410 of the D.C.S. MSS., Vol. XI.

Complete.

R. No. **35.**

Paper. 11 × 8⅜ inches. Foll. 150. Lines, 18 to a page. Grantha. Good.

Transcribed in 1910-11 from a MS. of E. R. Śrīnivāsarāghavācārya of Kalyāṇapuram.

(*a*) हरिहराद्वैतभूषणकारिका.

HARIHARĀDVAITABHŪṢAṆAKĀRIKĀ.

Foll. 1*a*—15*a*.

A treatise in verse establishing the identity of Śiva and Visnu; by Bōdhēndrasarasvatī, a disciple of Viśvādhikasarasvatī

Complete.

Beginning:

परानन्दं जगन्नाथं राममेव सदाश्रये ।
सकृत्प्रपन्नसंत्राणे जागरूकं कृपानिधिम् ॥
साम्बं सदाशिवं विघ्नराजं देवीं सरस्वतीम् ।
विश्वाधिकगुरुं चाहं वन्देऽभीष्टार्थसिद्धये ॥
शिवनारायणाभेदभूषा विद्वदभीप्सिता ।
श्रीरामकृपयैवेयं रच्यते न्यायरूपिणी ॥
महोपनिषदि स्पष्टं विष्णोः सर्वेशतोच्यते ।
नारायणः परं ब्रह्म लक्षणा ह्यन्यथा भवेत् ॥
पूर्वोत्तरविरोधाच्च बहुलिङ्गानुसारतः ।
उपक्रमाविरोधाच्च कथ्यते न तदन्यथा ॥

End:

श्रुतितात्पर्यविषयः संशयोऽत्र न कश्चन ।
श्रेयोऽर्थिभिर्वैदिकैर्हि कर्तव्यः सूक्ष्मबुद्धिभिः ॥

Colophon:

हरिहराद्वैतभूषणकारिका समाप्ता ॥

(*b*) हरिहराद्वैतभूषणकारिकाव्याख्या.

HARIHARĀDVAITABHŪṢAṆAKĀRIKĀVYĀKHYĀ.

Foll. 17*a*—150*a*; foll. 16 is left blank.

A commentary on the work described last; by the same author.

Complete.

Beginning:

सदानन्दात्मने सर्वसर्गस्थित्यन्तकारिणे ।
सर्वान्तर्यामिरूपाय श्रीरामायात्मने नमः ॥
श्रीशगौरीश्वराभिन्नरूपं राममहं भजे ।
सकृत्प्रपन्नसंत्राणे दीक्षितं सीतयाश्रितम् ॥
यस्य नामापि सर्वस्मादुत्कर्षं ख्यापयत्यहो ।
विश्वाधिकगुरोः पादपद्मं वन्दे मुदा सदा ॥
सर्वविघ्नहरं विघ्नराजं वन्दे सरस्वतीम् ।
सर्वशास्त्रमयीं वन्दे सर्वाभीष्टप्रदायिनीम् ॥
वेदान्तार्थाभिधानेन सर्वानुग्रहकारिणम् ।
यतिरूपधरं वन्दे शंकरं लोकशङ्करम् ॥
हरेर्हरस्य चाद्वैतभूषणं विद्वदीप्सितम् ।
श्रीरामस्य कृपादृष्ट्या क्रियतेऽद्य मया शिवम् ॥

अत्र महाविष्णुपरमशिवयोः श्रीगौरीकान्तयोः सर्वज्ञत्वसर्वशक्तित्वसत्यकामत्वसत्यसंकल्पत्वकरुणामृतवारिधित्वादिसकलकल्याणगुणैः साम्यं तथा सकलजगदुदयस्थितिलयहेतुभूतमायोपहितपरब्रह्मरूपेणैक्यं तथा तत्साम्यैक्ययोर्ज्ञानं सकलश्रेयोऽर्थिनामावश्यकमित्येतच्च श्रुतीतिहासपुराणादितात्पर्यविषयभूतमेवेति प्रतिपाद्यते—

End:

अतएव सर्वेषां ज्ञानैश्वर्यबलादिकल्याणगुणैः सर्वैः साम्यं च सिद्धमेवेति सर्वं सुस्थम् ॥

*   *   *   *

यत्कृपालवतो ज्ञातो मया रामः सुखाम्बुधिः ।
तं देशिकवरं वन्दे ख्यातं विश्वाधिकं शुभम् ॥
हरेर्हरस्य चाद्वैतभूषणाख्योऽयमुत्तमः ।
ग्रन्थो भूयात् सदा प्रीत्यै श्रीरामस्य कृपाम्बुधेः ॥

Colophon:

इति श्रीहरिहराद्वैतभूषणाख्यग्रन्थोऽयं संपूर्णः ॥

R. No **36.**

Paper. 11 × 8⅝ inches. Foll. 81. Lines, 18 to a page. Dēvanāgarī. Good.

Transcribed from a MS. of Yajñēśvara Śāstriyār of Mannārguḍi.

हाटकेश्वरमाहात्म्यम्.

HĀṬAKĒŚVARAMĀHĀTMYAM.

Deals with the importance of the shrine of हाटकक्षेत्र (?)
From Skāndapurāṇa. Pūrvabhāga complete.

Beginning:

स्कान्दे नागरखण्डे रम्ये श्रीहाटकेशमाहात्म्ये ।
प्रथमेऽध्याये कथितं शम्भोः पूज्यं तु लिङ्गमेवं कथम् ॥
नाङ्गान्तरमिति पृष्टे महर्षिभिः सूतवाक्यमित्थमभूत् ।
पूर्वं सतीवियोगादातुरभावं गतो नग्नः ॥
दारुकवनाश्रितेषु प्रभुरटति स्मायमीश्वरो भिक्षाम् ।
भिक्षां दातुं दर्व्या मुनिपत्न्यः संगतास्तरुण्यश्च ।

End:

श्रीमातृदेवताप्रसङ्गेन अम्बादेवीगुणचरितं यः शृणोति पठति अष्टमीचतुर्दश्योः स स परिगतिं प्राप्नोतीति सूत आहेति ।

इति श्रीहाटकेश्वरमाहात्म्ये एकोननवतितमाध्यायार्थसंग्रहः ॥

Colophon:

इति स्कान्दे पुराणे तृतीये परिच्छेदे नागरखण्डे हाटकेश्वरमाहात्म्ये पूर्वभागः परिपूर्णः ॥

R. No. **37.**

Paper. 11 × 8¾ inches. Foll. 25. Lines, 20 to a page. Dēvanāgarī. Good.

Restored in 1910-11 from an old MS. in the Library.

अष्टाङ्गहृदयव्याख्या—सर्वाङ्गसुन्दरी.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ : SARVĀṄGASUNDARĪ.

This is a commentary on Vāhata's Astāṅgahṛdaya, a well-known work on Medicine: by Aruṇa, son of Mṛgāṅka.

As the work has been printed at Bombay, the copying of the MS. was not completely done.

Beginning:

दीप्त्या यस्येन्द्रनीलोपलशकलरजोनीलया नीलिताभां
लक्ष्मीमुत्तप्तभास्वत्कनकरुचिमपि स्पर्शरोमाञ्चिताङ्गीम् ।
कालीमाशङ्कमानः स्फुरदधरपुटश्चक्रपाणिः किलाभूत्
भर्ता लोकस्य शश्वत् स भवतु भवतां भूतये पद्मनाभः ॥

को मत्सरिणि लोकेऽस्मिन् विद्वान् कश्चिच्चिकीर्षति ।
किं तु कश्चिद्भवेत्साधुःततोऽयं मत्परिश्रमः ॥

श्रीमन्मृगाङ्कतनयष्टीकामष्टाङ्गहृदयस्य ।
श्रीमानरुणः कुरुते सम्यग्दृष्टार्थबोधाय ॥

इह (हि शास्त्रारम्भे) शास्त्रपरिसमाप्तये सर्वंसहाभूषणभूता निखिल-(जनजनितप्रमोदसंदोहाः) रुचिरवचन(चन्दनचर्चितप्र)बन्धाः प्रबन्धरच-नप्रवराः इष्टदेवतानमस्कारं(तन्त्रकारा विदधुः ।) . . . . . इष्टदेवतानमस्कारपुरस्सरं तन्त्रमारिप्सुरिदमाह—

रागादिरोगान् सततानुषक्तान्
अशेषकायप्रसृतानशेषान् ।
औत्सुक्यमोहारतिदान् जघान
योऽपूर्ववैद्याय नमोऽस्तु तस्मै ॥

रागादित्यादि । रागः प्रसिद्धः । राग आदिर्येषां ते रागादयः । आदिशब्देन द्वेषलोभादिपरिग्रहः ।

End:

गुर्वादीनामितरेतरद्वन्द्वः । सह सूक्ष्मविशदाभ्यां वर्धन्ते ससूक्ष्मविशदाभ्याम् । एते च सविपर्यया.

R. No. **38.**

Paper. 11⅛ × 8¾ inches. Foll 146. Lines, 20 to a page. Dēvanāgarī. Good

Transcribed in 1908-09 from a MS of Vijayīndrācār of Coimbatore.

(*a*) चक्रमीमांसा.

CAKRAMĪMĀṀSĀ.

Foll. 1—52*a*.

A treatise on the necessity of undergoing the purificatory ceremony of a brand being with Cakred—a wheel-like weapon of God Viṣṇu: by Vijayīndrabhikṣu.

Incomplete.

Beginning:

सर्वतन्त्रस्वतन्त्रेण विजयीन्द्राख्यभिक्षुणा ।
क्रियते चक्रमीमांसा वैष्णवोल्लासकारिणी ॥

यद्यपि तप्तचक्रादिधारणं श्रुतिस्मृतीतिहासपुराणसदाचारादिसिद्धमिति तत्कर्तव्यतायां संशयाभावेन न विचारोऽस्ति तथापि प्रत्यक्षश्रुतीनां तत्परत्वे अन्यवाक्यानां श्रुतित्वे केषांचित्तदाचारस्य सदाचारत्वे च विवादात् श्रुतिपुराणादौ विधिवन्निषेधस्यापि दर्शनाच्च संशयसत्त्वादस्ति विचारावसरः । तत्र तु तप्तचक्रादिधारणस्य इदं प्रमाणमिति विशिष्य निरूपयितुं धर्मप्रमाणभूतानि विद्यास्थानानि निरूप्यन्ते ।

End:

न च नित्यत्वनैमित्तिकत्वादिकं विरुद्धम्; याजयित्वाप्रतिगृह्यानश्नन् स्वाध्यायं वेदमधीयीत त्रिरात्रं वा सावित्रीं यो यक्ष्य इत्युक्त्वा न यजते त्रिधा येन यजते इत्यादौ नित्ययोरेव यजनगायत्रीजपयोः क्रत्वर्थत्वस्य प्रायश्चित्तादिरूपत्वस्य दर्शनात्.

(*b*) अस्तिब्रह्मेतिश्रुतिविचारः.
ASTIBRAHMĒTIŚRUTIVICĀRAḤ.

Foll. 53*a*—77*b*.

Restored in 1910-11 from the MS. described under No. 4868 in the D.C.S. MSS., Vol. X.

This is incomplete though the original MS. is complete.

(*c*) खादिरगृह्यसूत्रभाष्यम्.
KHĀDIRAGṚHYASŪTRABHĀṢYAM.

Foll. 79*a*—146*b*; foll. 78 is left blank.

Transcribed in 1908-9 from a MS. of Naṭēśa Śāstrigaḷ of Kumbakonam.

A commentary on the Sūtras of Khādirācārya which deal with the conduct of domestic rites and ceremonies; by Rudraskandha.

Contains Paṭalas 1 to 4 complete.

Beginning:

अथातो गृह्यकर्माणि ।

अथ अनन्तरम् । कस्मादनन्तरम्? देव सवितरित्यादिमन्त्रवच्छा-स्वाध्ययनानन्तरम् । यतोऽनधीतवेदस्य मन्त्रापरिज्ञानाद्वक्ष्यमाणेषु वाक्येषु कर्मानुष्ठानयोग्यतया प्रतिपत्तुमशक्यम् अतस्तस्मादनन्तरमिति गम्यते । ननु मन्त्राध्ययनादपि शक्यं प्रतिपत्तुम्; सत्यं यदि मन्त्रमात्रेऽ-ध्ययनविधिस्स्यात् । विध्यभावे को दोषः? इच्छानिबन्धनमध्ययनं स्यात् । . . . .

Colophon:

इति रुद्रस्कन्धकृते खादिराचार्यकृतगृह्यव्याख्याने प्रथमः खण्डः ॥

End:

विवाहे अस्यैकवरं न प्रत्यागमनमृत्विग्विवाह्ययोर्वत्सरादर्वागपि यागे कन्यादाने च पुनर्यज्ञविवाहयोश्च पुनर्यज्ञविवाहयोश्च । प्रागपि वत्सरा-दागतानर्हयेत् । द्विरुक्तिः पटलसमाप्त्यर्था ॥

Colophon :

इति गृह्यव्याख्याने चतुर्थस्य चतुर्थः खण्डः । सम्पूर्णश्चायम् । खादिराचार्यकृतगृह्यस्य रुद्रस्कन्धकृता व्याख्या ॥

R. No. **39.**

Paper. 11 × 8⅝ inches. Foll. 222. Lines, 20 to a page. Dēvanāgarī. Good.

Restored in 1910-11 from an old MS. of the Library.

महाभाष्यप्रदीपव्याख्या.

MAHĀBHĀṢYAPRADĪPAVYĀKHYĀ.

This is a commentary on Kaiyaṭa's Mahābhāsyapradīpa which is a commentary on Mahābhāsya of Patañjali : by Nārāyaṇa Śastri, a disciple of Dharmarājādhvarin.

Contains from the first to the seventh Āhnika complete and the eighth incomplete, in the first Pāda of the first Adhyāya.

Beginning :

ओंकारममृतं ब्रह्म शिवमक्षरमव्ययम् ।
यमामनन्ति वेदेषु तं प्रपद्ये महेश्वरम् ॥

प्रारिप्सितस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय विशिष्टेष्टदेवतागुरुप्रणतिपुरःसरं चिकीर्षितं प्रतिजानीते— सर्वोकारमिति । जगदुपादानत्वं तल्लक्षणमित्यर्थः । तटस्थं चेदं लक्षणम् । परमात्मा शाखाग्रमिव तटस्थं जगदाकारेण परिणामि मृदादिकं बोध्यम् । प्रमाणं तत्रागमो द्रष्टव्यः ।

* * * *

Colophon :

इति श्रीमहोपाध्यायधर्मराजयज्वाशिष्यशास्त्रिनारायणकृतौ कैयटीयव्याख्यायां प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

अथ द्वितीयाह्निकम् ॥

अइउण् । वर्णविषयकविचारस्य गताह्निके कृतत्वात् आह्निकारम्भवैयर्थ्यमाशङ्क्याह--सर्वेति । अत्रेति आह्निके । स्वरूपेणेति । स्वरूपमुच्चरितव्यक्तिः । अनुकार्ये तु अकारत्वाद्या लिङ्गव्यक्तिरिति भेदः ॥

End:

नचैवं पदान्तविधित्वोपपादने भसंज्ञायां पदानुवृत्तिवैफल्यमिति वाच्यम्, असत्यां हि तदनुवृत्तौ सान्ते प्राप्तरुत्वादिनिवृत्त्युद्देशेन.

R. No. **40.**

Paper. 10⅜ × 8½ inches. Foll. 52. Lines, 18 to a page. Dēvanāgarī. Good.

Restored in 1910-11 from an old MS. of the Library.

कौषीतकगृह्यसूत्रवृत्तिः.

KAUṢĪTAKAGṚHYASŪTRAVṚTTIḤ.

This is a metrical commentary on Kausītaka's Gṛhyasūtra. Breaks off in Asthiniksēpa.

Beginning:

नत्वा कौषीतकाचार्यं शाम्बव्यं सूत्रकृत्तमम् ।
गृह्यं तदीयं संक्षिप्य व्याख्यास्ये बहुविस्तृतम् ॥
यथाक्रमं यथाबोधं पञ्चाध्यायसमन्वितम् ।
व्याख्यातं वृत्तिकाराद्यै श्रौतस्मार्तविचक्षणैः ॥
उत्थायोषस्यथाप्लुत्य सान्ध्यं कर्म समाप्य च ।
कुर्वीत नित्यं स्वाध्यायमारभ्याध्यान इत्यतः ॥
स्वस्ति नोऽन्तं क्रमात् सर्वं दुःस्वप्नदुरितापहम् ।
चत्वारः पाकयज्ञाः स्युर्हुतश्चाहुत एव च ॥
प्रह्व(हु)तः प्रासि(शित)श्चैते हुतास्तत्रानलक्रियाः ।
अहुता बलिकार्यास्तु प्रहुताः पितृसत्क्रियाः ॥

End:

तथा स्मृत्यन्तरे—

धेनुं दत्त्वाथ विप्राय अनुज्ञातो द्विजोत्तमैः ।
हिरण्येन ततः श्राद्धं कृत्वा पिण्डांस्तु निर्वपेत् ॥

अन्तर्दशाहं यस्यास्थि गङ्गायाः क्षिप्यते जले ।
गङ्गामरणतुल्यं तत् तस्येत्याचक्षते बुधाः ॥
कावेरी कृष्णवेण्या(णी) च तुङ्गभद्रा च गौतमी ।
भागीरथीति विज्ञाताः पञ्च गङ्गाः प्रकीर्तिताः ॥
तिस्रः पुण्या महानद्यः वेणी गोदा च जाह्नवी ।
गांवरीं (?) शाङ्का प्राप्तगङ्गा इति हि कीर्तिताः ॥

R. No. **41.**

Paper. $8\frac{1}{2} \times 6\frac{3}{8}$ inches. Foll. 173 Lines, 12 to a page. Grantha. Good.

Restored in 1910–11 from an old MS. of the Library.

दिव्यसूरिप्रभावदीपिका.

DIVYASŪRIPRABHĀVADĪPIKĀ.

A work on the greatness of Āḻvārs and Ācāryas ; by Vēdānti Rāmānuja, a disciple of Lakṣmaṇayōgīndra and Vādhūla Varadārya.

Complete.

Beginning :

श्रीमल्लक्ष्मणयोगीन्द्रवाधूलवरदार्ययोः ।
कृपासुपात्रं वेदान्तिरामानुजमुनिं भजे ॥
परः पद्माभर्तुः प्रथमपतिरन्यावयववान्
प्रपत्तौ भक्तौ च प्रातिनियतचित्तः कविवरः ।
हरिर्नित्यो यद्वा जनिमदवरो देशिकवरः
प्रतीतः पूज्योऽसावमृत इति वेदान्तिगमितिः ॥

इह खलु जगति कासारादिसूरिसेविते श्रीमत्पराङ्कुशमुनौ ज्ञानादि-माहात्म्ये जगदेकजीवातौ कैश्चिदभिनवकल्लोलितहृदयैरन्तःकुदृग्भिरुद्भाविताः शङ्काः परिहर्तुकामः तत्स्वरूपस्वभावाद्यनवधिकमाहात्म्यं सप्रमाणोप-पत्तिकमनेन पद्येन प्रदर्शयन् अर्थात् ताश्च निराचष्टे । तत्र ते ताव-देवं मन्यन्ते—तावदयं पूज्यो न भवति अदेवतात्वात् ।

End:

तत्रैव स्थलान्तरे च प्रकर्षविशेषवद्व्यक्तिविशेषप्रतिनियतानामेवानुष्ठेयाचाराणामितरसाधारण्यप्रतिपादनं च तैरेव निषिद्धं द्रष्टव्यमिति सर्वं समञ्जसम् ॥

दिव्यसूरिप्रभावस्य दीपिका सततं सताम् ।
भासतां हृदि वेदान्तिरामानुजमुनीरिता ॥

Colophon:

दिव्यसूरिप्रभावदीपिका संपूर्णा ॥

R. No. **42.**

Paper. 13½ × 8¼ inches. Foll. 281. Lines, 20 to a page. Grantha. Good.

Restored in 1910–11 from an old MS. of the Library.

नामामृतरसोदयः.

NĀMĀMṚTARASODAYAḤ.

A work on the importance and efficacy of repeating the names of God: by Bōdhēndrasarasvatī, a disciple of Viśvadhikasarasvatī. Complete in six Ullasas

Beginning:

सदा सर्वेष्टदं जन्तोः सर्वानिष्टनिवारकम् ।
श्रीरामनाम जयतु श्रेयोहेतुशिखामणिः ॥
सदानन्दः श्रीमाननवधिककारुण्यविवश
. . . . . श्रीहरिगिरिशरूपं विधृतवान् ।
अपर्याप्तं रूपं जगदवन एतत्पुनरिति
प्रभुर्जागर्ति श्रीहरिगिरिशनामात्मकतया ॥
सकलभुवनरक्षापेक्षया यः परात्मा
निरवधिदययैव स्वस्य . . . . . कः सन् ।

सुविलसति सदासौ सोऽनुकम्पासुधाब्धिः
मम भवतु तदात्मा सुस्थिरो वक्त्रपद्मे ॥

* * * *

शास्त्रार्थं सुविनिर्णेतुमिष्टदं सर्वदेहिनाम् ।
यतिरूपधरं नौमि शंकरं लोकशंकरम् ॥
श्रीरामस्य कृपादृष्ट्या तन्नामस्मृतिलब्धधीः ।
क्रियते जगदीशस्य नामामृतरसोदयः ॥

इह खलु जगदुदयस्थितिलयकारणस्य सर्वेश्वरस्य सर्वप्राणिशंकरस्य शिवस्यावताररूपाः श्रीशंकरभगवत्पादाचार्याः जगदीश्वरनामकीर्त(नस्य) वेदविहितत्वं सकलपापक्षयहेतुत्वं सकलपुरुषार्थहेतुत्वमङ्गराहित्यं कालदेशनियमराहित्यं सर्वाधिकारिकत्वं. . . . .
नामकीर्तने दृढश्रद्धारहितानां स्वल्पश्रद्धावतामविदितमीमांसावृत्तान्तानां कदाचित् संशयो भविष्यतीतितद्ग्रन्थाभासनिष्ठाभासत्वं विस्पष्टयितुं ग्रन्थोऽयमारभ्यते ॥

*

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वाधिकसरस्वतीचरणानां श्रीशिष्येण श्रीबोधेन्द्रसरस्वतीयतिना कृते श्रीभगवन्नामामृतरसोदये प्रथमोल्लासः संपूर्णः ॥

End:

" सर्वधर्मोज्झिता विष्णोर्नाममात्रैककल्पकाः ।
सुखेन यां गतिं यान्ति न तां सर्वेऽपि धार्मिकाः ॥ "

इति पाद्मपुराणवचने 'सुखेन यां गतिं यान्ति' इत्यनेन सकृन्नामसंकीर्तनस्य मुक्तिसाधन(त्व दर्शितमित्ययमर्थः) ॥

Colophon:

(इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वाधिक)महामुनिवरपादपद्मपरागोपजीविना श्रीबोधेन्द्रयतिना श्रीरामचन्द्रकृपाकटाक्षवीक्षणबलेन कृतनामामृतरसोदयः संपूर्णः ॥

R. No. **43.**

Paper. 13⅜ × 8⅝ inches. Foll. 61. Lines, 20 to a page. Grantha. Good. The last leaf is blank.

Restored in 1910-11 from an old MS. of the Library.

न्यायसिद्धान्ततत्त्वामृतम्.

NYĀYASIDDHĀNTATATTVĀMṚTAM.

A work giving the essence of the Nyāya philosophy: by Śrīnivāsa, great grandson of Anantayadēśika of Naidhruvakāśyapa family.

Complete.

Beginning:

. . . . . सरसिरुहलग्नचित्तः
दैत्येन्द्रसूनुरतिलङ्घितविघ्नजातः ।
जातस्तमिन्द्र(न्दु)धवलं वरदं भुजाभ्यां
देवं त्रिणेत्र(विनुतं) सततं भजामः ॥

श्रीमान्नैध्रुवकाश्यपान्वयसुधावारांनिधौ चन्द्रमाः
नप्तानन्तयदेशिकस्य तनयः श्री . . . . ।
ख्यातस्तर्कवितर्ककर्कशमहामोहान्धकारच्छिदा-
दक्षा यस्य विपक्षपक्षदृषदां टङ्का(यमाना)गिरः ॥

सिद्धान्ताक्षेपलेखासुरपरिमृदितालोचनाहीश (ब)द्ध-
प्रज्ञामध्वा(न्था)चलेन्द्रप्रमथन(कलितात्यन्त)संक्षोभभाजः ।
तर्काकूपारमध्यादमृतमुदहरन्न्यायसिद्धान्ततत्त्वं
. . . . श्रीश्रीनिवासो विबुधग(णनुत)स्तार्किकाणां वरिष्ठः ॥

पदार्थो द्विविधः—भावोऽभावश्चेति । भावः षड्विधः—द्रव्यगुण-कर्मसामान्यविशेषसमवायभेदात् ।

End:

तदुत्पत्तिविनाशाभ्यां तत्कार्यकारणभावानां तत्प्रतियोगिकतदनुयोगि-कभेदानां च ।

Colophon:

इति न्यायसिद्धान्ततत्त्वं श्रीनिवासाचार्यविरचितं संपूर्णम् ॥

R. No. 44.

Paper. 13 × 8½ inches. Foll. 145. Lines, 22 to a page. Dēvanāgarī. Good.

Restored in 1910–11 from the MS. described under No. 5354 of the D.C.S. MSS., Vol. XI.

रामानुजसिद्धान्तः.

RĀMĀNUJASIDDHĀNTAḤ.

Incomplete.

R. No. 45.

Paper. 18½ × 6¾ inches. Foll. 71. Lines, 14 to a page. Grantha. Good.

Restored in 1910–11 from the MS described under No. 4988 of the D. C. S. MSS., Vol. X.

रामानुजसिद्धान्तसङ्ग्रहः.

RĀMĀNUJASIDDHĀNTASAṄGRAHAḤ.

The first 4 folls. are blank.

Complete.

R. No. 46.

Paper. 8¾ × 5½ inches. Foll. 53. Lines, 16 to a page. Dēvanāgarī. Good.

Restored in 1910–11 from the MS. described under No. 15 in the Report on a Search for Sanskrit and Tamil MSS. for 1896–97, No. 1.

लक्ष्मीस्वयंवरः.

LAKṢMĪSVAYAMVARAḤ.

Incomplete.

R. No. 47.

Palm-leaf. 13½ × 1⅝ inches. Foll. 40. Lines, 7 to a page. Telugu. slightly injured.

Purchased in 1910–11 from R. Anantakṛṣṇa Śāstrigaḷ of Āryanāyakapuram, Tinnevelly.

(*a*) अनुभवोल्लासः.

ANUBHAVŌLLĀSAḤ.

Foll. 1*a*—2*a*.

An elementary treatise of philosophy dealing with the manner of regulating one's thoughts and actions so as to obtain Supreme bliss or Soul-salvation: by Śaṅkarācārya.

Complete.

Beginning:

पुत्रवित्तकलत्रादौ धीविकारे रिपौ सदा ।
ममत्वं परबुद्धित्वमुभयं ह्यङ्ग मा कुरु ॥

अनात्मकेष्वहंबुद्धिं देहप्राणेन्द्रियादिषु ।
प्राणान्तकेऽपि साधो त्वं जन्महेतुं हि मा कुरु ॥

End:

ब्रह्मात्मके च चिद्व्योम्नि ब्रह्मात्मकतयाखिलम् ।
संपश्यन् सततं साधो जीवन्मुक्तः सुखी भव ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितमनुभवो-ल्लासप्रकरणं संक्षेपकृतं समाप्तम् ॥

(*b*) तत्त्वानुभवः.

TATTVĀNUBHAVAH.

Foll. 3*a*—4*b*.

On the manner of identifying oneself with the Supreme Brahman and thereby denying one's relation with every manifested object in the world: by Gōvindēndrayati, a pupil of Nārāyaṇēndrayōgin.

Complete.

Beginning:

प्रत्यगात्मा परं ज्योतिः परमानन्दचिद्घनः ।
अहं नाहं न देहादि शिवोऽनन्तोऽहमद्वयः ॥
न स्त्री न षण्डो न पुमान् जडो नाहं मृषात्मकः ।
व्यक्तं नाहं न चाव्यक्तं तदाधारोऽहमद्वयः ॥

End:

अखण्डसच्चिदानन्दस्वरूपे स्वप्रभे चरे ।
को जीवः कुं(किं) जगद्वेशो ब्रह्मणः स्वे कुतोऽद्वये ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमन्नारायणेन्द्रयोगिशिष्यश्रीमद्गोविन्देन्द्रयतिवर्यविरचितं तत्त्वानुभवप्रकरणं संपूर्णम् ॥

(*c*) आनन्दानुभवः.
ĀNANDĀNUBHAVAḤ.

Foll. 5*a*—10*b*.

A work on Advaita philosophy dealing with the bliss derivable from a knowledge of the identity of the individual soul with the Supreme Soul.

Complete.

Beginning:

नमः कृत्वा गणेशानं कुमारं च महेश्वरम् ।
पार्वतीं शिवशक्त्यैक्यं सम्यङ्मीमांस्यतेऽधुना ॥
शिव एवेदमखिलं जगत्पूर्वं स ई(ऐ) क्षत[म्] ।
पतिपत्नीभवामीति तदात्मानं द्विधाकरोत् ॥
गुह्यानन्दात्मिका शक्तिः लिङ्गरूपः शिवः परः ।
तयोर्मिथुनकौशल्यं जगदानन्दकारणम् ॥

End:

आनन्दानुभवात्माख्यमिदं प्रकरणं मुदा ।
योऽनुसंदधते नित्यमानन्दात्मैव तिष्ठति ॥

(*d*) आत्मतत्त्वविवेकः.

ĀTMATATTVAVIVĒKAḤ.

Foll. 11*a*—16*a*. Fol. 16*b* is blank.

Another philosophical work on the nature and characteristics of the Soul.

Complete.

Beginning:

वर्णाश्रमाचारवतां विशुद्धमनसां नृणाम् ।
बुभुत्सूनां प्रयोगार्थमात्मतत्त्वं विविच्यते ॥
कस्मिन् ज्ञाते सुविज्ञातं चराचरमिदं जगत् ।
तदभेदेन सोऽस्यात्मा मृदि ज्ञाति (जात) घटादिवत् ॥
ओतं प्रोतं जगत्सर्वं यस्मिन्नखिलकारणे ।
तन्मात्रं तत्स एवात्मा तन्तुष्वेव पटो यथा ॥

End:

तादृशः परमो योगी शिवः साक्षादनूपमः ।
देवासुरमनुष्येषु तुलना केन जायते ॥

Colophon:

इति आत्मतत्त्वविवेचनं संपूर्णम् ॥

(*e*) द्वैतनिरासः.

DVAITANIRĀSAḤ.

Foll. 17*a*—21*b*.

This is a refutation of the view which enunciates a real difference between the individual soul and the Supreme Soul.

Incomplete.

Beginning:

सच्चिदानन्दरूपत्वादहं ब्रह्मैव नेतरत् ।
यदेवं न तदेवं नाप्यसद्वन्ध्याकुमारवत् ॥
अबाधितत्वात् सद्रूपो बाध्यो बाधावधेरहम् ।
तथैवाव्यभिचारित्वादबाध्यः शुक्तिकादिवत् ॥

End:

द्वैतासमर्पकं ज्ञानं कर्मशेषं न चार्हति ।
समूलमुपमृद्नत् तत् द्वैतं नोत्पद्यते पुनः ॥
अकर्तात्माश्रयं ज्ञानं कर्मकर्त्राश्रयं ततः ।
न शेषशेषिता वास्ति नाङ्गाङ्गीभावता [वा] तयोः ॥
तस्यैकविषयज्ञानं स्वतन्त्रं मोक्षसाधकम् ।
दग्ध्वा ज्ञानं स्वयं नष्टं शिष्टं सच्चित्सुखाद्वयः ॥

(*f*) अद्वैतानुभवोल्लासः.

ADVAITĀNUBHAVŌLLĀSAḤ.

Foll 22*a*—25*b*.

A treatise on Advaita philosophy: by Subrahmaṇyēndra, a pupil of Sōmēśvarabhagavatpāda.

Complete.

Beginning:

यस्मात् सर्वं संप्रभूतं यस्मिन् सर्वं प्रतिष्ठितम् ।
यत् सर्वममृतं सत्यं तदहं ब्रह्म शाश्वतम् ॥
गुरुं सोमेश्वरं लिङ्गं ध्यात्वा सोमस्थितं हृदि ।
अद्वैतानुभवोल्लासं कुर्वे सर्वार्थसंग्रहम् ॥
सर्वं खल्विदमात्मैव प्रागेतस्यामृतत्वतः ।
उत्पत्तेः पूर्वमात्मैव लीयमाने तथैव हि ॥

End:

यतः समस्तं जगदव्ययात्मके
न भासते मय्यमृते परात्परे ।
अतोऽहमानन्दरसैकचिद्घनः
यद्बीजमद्वन्द्वपरामृतं हि ॥

Colophon:

इति श्रीसोमेश्वरभगवत्पादभक्तियुक्तश्रीमच्छ्रीसुब्रह्मण्येन्द्रविरचितः अद्वैतानुभवोल्लासः समाप्तः ॥

(g) अष्टावक्रगीता.

AṢṬĀVAKRAGĪTĀ.

Foll. 27a—40b: fol. 26 contains a few stray lines.

Same work as the one described under No. 4545 of the D.C.S MSS., Vol. IX.

Complete.

R. No. **48.**

Palm-leaf. 20¼ × 1¼ inches. Foll. 28. Lines, 6 in a page. Grantha. Injured.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannār guḍi.

ओङ्कारवादार्थः.

ŌṄKĀRAVĀDĀRTHAḤ.

Same work as the one described under No. 4871 of the D.C.S. MSS., Vol. X.

Complete.

R No. **49.**

Śrītāla. 14⅛ × 2 inches. Foll. 134. Lines, 10 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr, Palghat.

(a) अग्निहोत्ररक्षामणिः—सव्याख्यः.

AGNIHŌTRARAKṢĀMAṆIḤ WITH COMMENTARY.

Foll. 1a—36b.

Same work as the one described under No. 1096 of the D.C.S. MSS., Vol. II.

Breaks off in the fourth Mayūkha.

(b) आचारनवनीतः.

ĀCĀRANAVANĪTAḤ.

Foll. 39a—130b; foll. 37 and 38 are left blank.

Same work as the one described under No. 2741 of the D C.S MSS., Vol. V.

Contains Ācāra and Śrāddha portion only. It is given at the end that the work was transcribed by Śēsādriyajvan, son of Paraśurāmayajvan, on Sunday, the 7th day of the bright fortnight in the month of Śrāvaṇa in the year Kālayukti.

Foll. 132*a* to 134*b* contain a table of the contents of this work.

The additional stanzas found in the beginning of this MS. are given below :—

गौरीमायूरनाथाङ्घ्रिपद्मेन्दीव(न्दिन्दि)रमानसः ।
अप्पाध्वरी वितनुते सदाचारस्य संग्रहम् ॥
धर्मशास्त्रसुधासिन्धोः स्वदयन्तु विपश्चितः ।
आचारनवनीतेऽस्मिन् धर्मशास्त्रनिबन्धने ॥
विविच्य लिख्यते सम्यक् श्राद्धकाण्डं विदां मुदे ।
धर्मशास्त्रसुधासिन्धोः अप्पाध्वरिसमुद्रिते ॥
आचारनवनीतेऽस्मिन् श्राद्धकाण्डं वितन्यते ।
वन्दे गुरूदय(सु)मूर्तिबुधाभिधानान्
यद्गोविजृम्भणमहो जगतस्तमोनुत् ।
तानप्पिलैशास्त्रभिलोकगुरोः (?) पुराण-
पुण्यानुभावकृतभूमितलावतारान् ॥

(*c*) नरपतनशान्तिः.

NARAPATANAŚĀNTIḤ.

Fol. 131.

Similar to the work described under No. 3349 of the D.C.S. MSS., Vol. VI.

Complete.

Beginning :

निद्रावसाने यो मर्त्यः मनुष्यो(ष्येषु)प[रि]तेद्यदि ।
कुजार्कवारजन्मर्क्षे शीतांशोरष्टमेऽपि च ॥

षण्मासान्मृत्युमाप्नोति बहुपीडा च जायते ।
तस्मात् तद्दोषनाशाय शान्तिं कुर्याद्विचक्षणः ॥
तदैव हि समुत्थाय सचेलः स्नानमाचरेत् ॥
नद्यां वा देवखाते वा तटाके वातिशोभने ॥

End:

ब्राह्मणान् भोजयेत् पश्चात् पायसैर्मधुसर्पिषा ।
एवं यः कुरुते शान्तिं स चिरायुः सुखी भवेत् ॥

Colophon:

नरपतनशान्तिः समाप्ता ॥

(*d*) गोमहिष्यादिशान्तिः.
GÔMAHIṢYĀDIŚĀNTIḤ.

Fol. 131*b* only.

If cows and buffaloes beget calves on certain Tithis and days of the week, it is considered to cause evil to their owners. This work deals with the propitiatory ceremonies to be performed by the owner to ward off the evil.

Complete.

Beginning:

अथ गोमहिष्यादिशान्तिरुच्यते—
अमाकृष्णचतुर्दश्यां गौर्गजो महिषी हयः ।
गोमहिष्योः (ष्यौ) प्रसूयेते भानुभार्गववासरे ॥

End:

एवं कृते दुष्टकाले गोमाहिष्यादिसूतके ।
एवं शान्तिविधानेन दोषं नाशयते ध्रुवम् ॥

Colophon:

इति पितामहोक्तगोमहिष्यादिशान्तिः समाप्ता ॥

R. No. 50.

Śrītāla. $7\frac{1}{8}\times 2$ inches. Foll. 149. Lines, 10 in a page. Grantha. Good.

Purchased in 1910-11 from S. Ramakrṣṇavadyar of Palghat.

(*a*) सोमप्रयोगविवरणम्.

SŌMAPRAYŌGAVIVARAṆAM.

Foll. 1*a*—48*b*.

A commentary on the work described under No. 1116 of the D.C.S. MSS., Vol. II.

Contains Rathantarapṛṣṭha only.

Beginning :

अथार्षेयकल्पो व्याख्यातः । तत्र च सर्वक्रतुप्रकृतिभूतस्य त्रिपर्वणो ज्योतिष्टोमस्य सर्वाहर्गणप्रकृतिभूतस्य व्यूढस्य द्वादशाहस्य च ब्राह्मणेनैव क्लृप्तिरुक्तेति तदुपजीवनेन क्रत्वन्तराण्येव कल्पितानि । अस्माभिः स्वस्य प्रबन्धस्य कात्स्न्यार्थं तयोस्तावत् प्रयोगः सूत्रब्राह्मणानुसारेण संगृह्य प्रदर्श्यते। तत्राग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य एवं प्रयोग :—ऋत्विगार्षेयोऽनूचानस्साधुचरण इत्यादिसूत्रोक्तलक्षणावृत्विग्याज्यौ यज्ञशर्मा ज्योतिष्टोमेनाग्निष्टोमेन रथंतरपृष्ठेन द्वादशशतदक्षिणेन सोमेन यक्ष्ये । तत्रौद्गात्रं भवता कर्तव्यमिति सोमप्रवाकेनाभ्यर्थितो यद्यार्त्विज्यमकरिष्यन् स्यात् तदा नमः सोमाय राज्ञ इत्युक्त्वा तं प्रत्याचक्षीत । यदि करिष्यन् महं मे वोच इति प्रतिमन्त्रयेत । आदिग्रहणेन मन्त्रविधिः पूर्वमन्त्रान्तस्योत्तरमन्त्रादिरूपलक्षणः । यदा सोमप्रवाकः पूर्वमेवौद्गात्रं ज्ञातमिति सोमप्रवचनमनुक्त्वा स्मरणाय केवलमागत्य तिष्ठति, तदागमनादेव सोमः प्रोक्तो भवतीति महं मे वोच इति मन्त्रं ब्रूयात् । आर्त्विज्यकरणेऽवसिते तदवधार्य यस्मिन्नावसथे सोमप्रवाको वसति तं प्रति तस्मै दधिमिश्रमन्नमाहारयेत् ।

उपांशु जपः पूर्वमुद्गातर्देवयजनं मे देहीत्युच्चैर्वचनेन देवयजनयाचने यजमानेन कृते देवयज(न)वान् भूयादित्युक्त्वा देवयजनकालात्प्राक् तत्तत्कर्मानुष्ठानार्थः। प्रस्तोतृसुब्रह्मण्यौ स्थापयित्वा स्वगृहं गच्छेत्।

End:

उदयनीयायां प्रधानयागकाले प्रस्तोता चोदस इत्युद्धृत् भार्गवं त्रिगायेत् भृगुर्जगति सोमः अनूबध्यास्थनिकायामामिक्षायां यज्ञाथेति स्वारंपयोनिधनमाग्नीध्रीयेऽवस्थाप(य)त्यृचे गायेत् वायुरनुष्टुप् मघवान् उदवसानीयायां प्रधानयागकाले पूर्णाहुतौ वा गायन्ति त्वेत्युद्गशीयन्त्यृचे गायेत् विश्वेदेव अनुष्टुबिन्द्रः ॥

Colophon:

इति रथंतरपृष्ठोऽग्निष्टोमः ॥

अथ बृहत्पृष्ठ :—

Fol. 48*b* contains some stanzas from Nrsimhamālāmantra.

(*b*) द्राह्यायणश्रौतसूत्रम्.

DRĀHYĀYANAŚRAUTASŪTRAM.

Foll. 49*a*—149*b*.

Same work as the one described under No. 1037 of the D.C.S. MSS., Vol. II.

Contains Paṭalas 1 to 31.

R. No. **51**.

Śrītāla. 14 × 2¼ inches. Foll. 177. Lines, 13-14 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr, Palghat.

(*a*) शिशुपालवधः— सव्याख्यः.

ŚIŚUPĀLAVADHAḤ WITH COMMENTARY.

Foll. 1*a*—18*a*; foll. 18*b* and 19 are left blank.

This contains the fifth Sarga of the well known work, also called Māgha, with Mallinātha's commentary.

Incomplete.

(*b*) प्रायश्चित्तशतद्वयी.

PRĀYAŚCITTAŚATADVAYĪ.

Foll. 20*a*—64*b*; foll. 20*a*—21*a* contain an index to the work: foll. 21*b* and 22 are blank

Same work as the one described under No. 1077 of the D.C.S. MSS., Vol. II.

Complete.

It is stated that the work was transcribed in the month of Śrāvaṇa in the year Nandana.

(*c*) सोमकारिका.

SŌMAKĀRIKĀ.

Foll. 65*a*—85*b*.

Same work as the one described under No. 1118 of the D.C.S. MSS., Vol. II.

Wants beginning.

(*d*) आपस्तम्बप्रयोगप्रदीपिका.

ĀPASTAMBAPRAYŌGAPRADĪPIKĀ.

Foll. 86*a*—173*b*; the next four foll. contain stray sacrificial Mantras.

Same work as the one described under No. 1070 of the D.C.S. MSS., Vol. II.

Contains Praśnas 10 to 14.

It is given at the end that the work was transcribed by Śēṣādrīśvara, son of Ayyādhvarin on Saturday, the second day of the bright fortnight in the month of Paṅguni of the year Nandana.

R. No. **52.**

Palm-leaf. 12¼ × 1⅜ inches Foll. 12. Lines, 5 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāl of Koḍuvāyūr.

अमासोमवारव्रतकल्पः.

AMĀSŌMAVĀRAVRATAKALPAḤ.

Similar to the work described under No. 8195 of the D.C.S. MSS., Vol. XVI.

Complete.

Beginning :

शुक्लाम्बरधरं . . . . ये ॥

मम . . . प्रीत्यर्थं समस्तपापक्षयार्थं त्रिकोटिशिवरात्रिसदृशे अमासोमवारपुण्यकाले लक्ष्मीनारायणप्रीत्यर्थमष्टोत्तरशतसंख्याप्रदक्षिणपूर्वकमश्वत्थमूले लक्ष्मीनारायणपूजां करिष्य इति संकल्प्य, कलशपूजाशाखापूजादीन् कृत्वा, ध्यानम्—

शङ्खचक्रधरं देवं वरदाभयपाणिन(क)म् ।
पीताम्बरधरं देवं वनमालाविभूषितम् ॥
श्रीवत्साङ्ग(ङ्क) चतुर्बाहुं श्रीधरं पुरुषोत्तमम् ।
आगच्छ जगदाधार कारुण्यामृतसागर ।
तुभ्यं नमोऽस्तु हरये कमलापतये नमः ॥

ओं भूर्भुवःसुवरोम् । अश्वत्थमूले लक्ष्मीनारायणमावाहयामि ॥

End :

अमासोमवारव्रतोद्यापनपूजान्ते अर्घ्यप्रदानं करिष्ये ।

अमेन्दुवारे सोमेश लोकनाथ नमोऽस्तु ते ।
इदमर्घ्यं प्रदास्यामि सर्वपापहराय भो(:) ॥

विष्णवे नमः ।

मया कृतान्यशेषाणि पापानि नुद मे विभो ।
बिल्वैः पुष्पैश्च सहितं गृहाणार्घ्यं सुरेश्वर ॥

कृष्णाय नम इदमर्घ्यम् । . . . .

व्रतसाद्गुण्यार्थं दश दानानि च कृत्वा भूरिदानम् आशीर्वादं दम्पतिपूजां च कुर्यात् । लक्ष्मीनारायणदम्पतिपूजा ॥

R. No. **53.**

Śrītāla. 16 × 2 inches. Foll. 261. Lines, 8 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

महार्णवः.

MAHĀRṆAVAḤ.

The work occupies foll. 1—254. The remaining seven foll. contain a list of contents of the work.

Another recension of the work described under No. 3495 of the D.C.S. MSS., Vol. VII. This work was composed by Viśvēśvarabhaṭṭa, son of Peddibhaṭṭa, and Ambikā, of Kauśikagōtra, at the instance of the king Māndhātṛ, son of Madanapāla.

Complete.

Beginning:

वागीशाद्याः सुमनसः . . . तं नमामि गजाननम् ॥

देवालये नदीतीरे वा स्नात्वाचम्य आर्द्रवासा दर्भेष्वासीनो दर्भान् धारयमाणः प्राणानायम्य नियतो मौनी भूत्वा महासंकल्पं कृत्वा सचेलं स्नात्वा ब्राह्मणानामग्रतः स्थित्वा पापपीडां स्मरन् साष्टाङ्गनमस्कारं कुर्यात् । तत उत्थाय यजमानः परिषदं गन्धपुष्पादिभिरभ्यर्च्य पापानुगुणां कल्पितपरिषद्दाक्षिणां तिलाक्षतकुशैः सहादाय परिषदं समस्तां त्रिः प्रदाक्षिणं कृत्वा नमो मह्द्भ्यो नमः सदस इति वा मन्त्रेण परिषद उपस्थाय साष्टाङ्गं प्रणिपतेत् ॥ . . . .

Colophon:

इति श्रीपाण्डितपारिजातकठोरमल्लेत्यादिबिरुदराजीविराजमानश्रीमदनपालपुत्रस्य मान्धातुर्निबन्धे महार्णवाभिधाने कर्मविपाके प्रथमस्तरङ्गः ॥

End:

मेषग्रहोद्देशेन बलिदानमन्त्रमाह—

प्रगृह्णीष्व बलिं चेमं मेषग्रह महाग्रह ।
आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महाबल ॥

माता पुण्यचरित्रकीर्तिविभवा यस्याम्बिका नामतः
शाकल्यापरमूर्तिरार्यचरितः श्रीपाद्दिभट्टः पिता ।
सोऽयं कौशिकवंशभूषणमणिः श्रीर(भट्ट)विश्वेश्वरो
वेदे स्मार्तमते नये च सपदे वाक्ये कृती वर्धते ॥

मतिर्येषां शास्त्रे प्रकृतिरमेणाया व्यवहृतिः
परा शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमियात्
इयं व्यासारण्यप्रचुरमुनिशिष्यस्य भणितिः ॥

कविराधुनिकश्चिरंतनो वा न विशेषः क्वचिदस्ति सज्जनानाम्
इयतै[र]व चितं मया यदेषामिह लोकेषु गुणेषु पक्षपातः ॥

महार्णवाख्ये महति प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य ।
सत्कर्ममाणिक्यगणेन पूर्णे पूर्णो विशालो दशमस्तरङ्गः ॥

Colophon:

समाप्तोऽयमर्णवग्रन्थः ॥

R. No. **54.**

Palm-leaf. $17\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 36. Lines, 8 in a page. Grantha. Good.

Purchased in 1910-11 from Gōpālasāmi Ayyaṅgār of Mannārgaḍi.

आकाशाधिकरणविचारः.

ĀKĀŚĀDHIKARAṆAVICĀRAH.

A disquisition on the आकाशाधिकरण (I-1-23) of the Brahmasūtra: by Anantācārya of Śēsārya family.

Complete.

It is given at the end that the work was transcribed by Śrīnivāsa on the 14th Māśi in the year Vyaya

Beginning:

कलशाब्धिकन्यकायाः पतिं यतीन्द्रं च सादरं नत्वा ।
आकाशनयाविचारं तनुते कुतुकादनन्तार्यः ॥

सदेवेत्यादिकारणवाक्यप्रतिपाद्यमचेतनाभिन्नम्, ईक्षणवत्त्वात्, चैत्रादिवत्; तज्जीवभिन्नम्, आनन्दविशेषवत्त्वात्, व्यतिरेके जीववत् इत्यनुमानाभ्यां कारणस्य चिदचिद्वैलक्षण्यमीक्षत्यधिकरणयोः स्थापितम् ।

End:

तस्मादुद्गातृशब्दो योगेन त्रितयपर इति सिद्धान्तितम् । आकाशपदं च शुद्धयौगिकमेवेति तत्त्वमार्ताण्डे उक्तम् । तथा च योगजन्यबोधस्य सर्वसिद्धत्वात् शाब्दप्रत्यक्षयोर्युगपदुत्पत्त्यङ्गीकारेण एकसामग्र्या अपरबुद्धिप्रतिबन्धकताविरहाच्च योगपक्षे न गौरवमिति दिक् ॥

R. No. **55.**

Palm-leaf. 19⅛ × 1⅝ inches. Foll. 193. Lines, 8 in a page Grantha. Fair.

Purchased in 1910-11 from E. R. Śrīnivāsācārya of Kalyānapuram.

गीताभाष्यव्याख्या—तात्पर्यचन्द्रिका.

GĪTĀBHĀṢYAVYĀKHYĀ: TĀTPARYACANDRIKĀ.

The last fol. contains a few stray stanzas on the superiority of Viṣṇu.

Same work as the one described under Nos. 4873-74 of the D.C.S. MSS., Vol. X.

Contains Adhyāyas seven to eighteen.

R. No. **56.**

Palm-leaf. 15¾ × 1⅝ inches. Foll. 158. Lines, 8 in a page. Grantha. Fair.

Purchased in 1910-11 from E R. Śrīnivāsācārya of Kalyāṇapuram.

गीताभाष्यव्याख्या—तात्पर्यचन्द्रिका.

GĪTĀBHĀṢYAVYĀKHYĀ: TĀTPARYACANDRIKĀ.

Fol. 157 contains footnotes to the work, and fol. 158 contains the commentary to a portion of the 9th Adhyāya.

Same work as the one described under Nos. 4873–74 of the D.C.S. MSS., Vol. X.

Contains Adhyāyas nine to fifteen.

R. No. **57.**

Palm-leaf. 16⅛×1¼ inches. Foll. 32. Lines, 7 in a page. Telugu. Injured.

Purchased in 1910–11 from R. D. Srīnivāsa Śāstriyār of Tanjore.

कणादसिद्धान्तचन्द्रिका.

KAṆĀDASIDDHĀNTACANDRIKĀ.

The last 2 foll. contain stray notes on the work.

This is a treatise in Kaṇāda's system of logic. This work forms the text of the commentary described under No 4332 of the D.C.S. MSS., Vol. VIII: by Gaṅgādharasudhī.

Complete.

It is given at the end that this work was transcribed by Gōpālakṛṣṇa, son of Subbābhaṭṭa, on Monday, the 13th day of the bright fortnight in the month of Jyēṣṭha in the year Pramādi.

Beginning:

नत्वा विशुद्धविज्ञानं दक्षिणामूर्तिमश्विरम् ।
कुर्वे कणादसिद्धान्तचन्द्रिकां बुधतुष्टये ॥

इह हि पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निश्रेयसहेतुरिति पदार्थतत्त्वं निरूप्यते । प्रमाविषयः पदार्थः । स द्विधा भावोऽभावश्चेति ।

तत्र भावः द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् षड्विधः । तत्र द्रव्याणि--पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव । सुवर्णस्यान्तर्भावो वक्ष्यते । अन्धकारस्तु न द्रव्यम्, तत्प्रतीतेः क्लृप्ताभावेनैवोपपत्तेः । रूपवत्ताप्रतीतिस्तु तस्मिन् भ्रम एव । चलनादिप्रतीतिरपि तस्मिन्नालोकगमनागमनाद्यौपाधिकी भ्रान्तिरेव । विस्तरस्त्वाकाशे द्रष्टव्यः । नातो विभागव्याघात ॥

End:

दीधितिकृतस्तु शक्तिसंख्याक्षणसादृश्यकारणत्वकार्यत्वविषयत्वविशेषणत्वादीन् अतिरिक्तपदार्थानभ्युपगच्छन्ति । यथा चैतत् तथा पदार्थखण्डनादौ सुव्यक्तीकृतमिति विस्तरभीतेर्नेह प्रत्य(त)न्यत इति सर्वमनवद्यम् ॥

वटस्य पु(प)त्रमूले च स्थितिर्येषां विकल्प्यते ।
सूरिभिस्तान् गुरून् वन्दे विश्वरूपब्ध्ययोगिनः ॥
तत्कृपापाङ्गनिर्धूतश(त)मा मा(नि)खिलशास्त्रवित् ।
सिद्धान्तचन्द्रिकामेतां गङ्गाधरसुधीर्व्यधात् ॥

R. No. **58.**

Palm-leaf. 17⅛ × 1⅛ inches. Foll. 104. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1910-11 from Gōpālasāmi Ayyaṅgār of Mannārgudi.

(*a*) संविदेकत्वानुमाननिरासः.

SAṀVII ĒKATVĀNUMĀNANIRĀSAḤ.

Foll. 1*a*—8*a*. Fol. 8*b* is blank.

Same work as the one described under No. 5056 of the D.C.S. MSS., Vol. X.

Complete

It is given that the work was written at Pudukota by Rāmānujadāsa on the 25 Puraṭṭāśi of the year Āṅgīrasa.

(*b*) निर्विशेषवस्तुप्रमाणनिरासविचारः.

NIRVIŚĒSAVASTUPRAMĀṆANIRĀSAVICĀRAḤ.

Foll. 9*a*—24*b*.

This is a refutation of the theory relating to the existence of a reality which is totally devoid of qualities or attributes: by Anantācārya of Śēsārya family.

Complete.

It is stated in the MS. that this work was transcribed by Māḍabhūsi Rāmānujadāsa on the 8th day of the bright fortnight in the month of Kanyā in the year Āngīrasa.

Beginning:

समाराध्य श्रीशं निखिलगुणवाराशिममलं
यतीनां सम्राजः पदयुगलमानम्य बहुधा ।
विधत्ते वादार्थं कमपि विशदं कौतुकवशा-
दनन्तार्यः श्रीमत्फणिपगुरुवंशाम्बुधिशशी ॥

यत्तावदुक्तं महासिद्धान्तारम्भे निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनि इदं प्रमाणमिति न शक्यते वक्तुम्, सविशेषविषयकत्वात् सर्वप्रमाणानामिति, तद्वाक्यार्थविशोधनायेदमारभ्यते । निर्विशेषे वस्तुनि प्रमाणं नास्तीति वचने सिद्ध्यसिद्धिभ्यां व्याघातो भवतीत्यभिप्रेत्य प्रमात्वव्यापकं सविशेषविषयकत्वमिति व्याप्तिमङ्गीकृत्य निर्विशेषविषयकं प्रमाणं निराकृतम्, सर्वप्रमाणानामित्यत्र सर्वशब्दस्य व्यापकत्वतात्पर्यग्राहकत्वेनोक्तव्याप्ति-बोधनात्तत्र प्रमाणपदस्य भावे व्युत्पत्त्या प्रमापरत्वात् ।

End:

सिद्धान्तिना तु प्रत्यक्षविरोधे शास्त्रप्राबल्यानाभिमतत्वात् प्रत्यक्षादि-निर्विशेषविषयकत्वव्युदासपूर्वकं तदविरोधेन वेदान्तवाक्यानि स्वरसतो व्याख्यायन्त इति सिद्धान्तस्य पूर्वपक्षक्रमाननुरोधित्वेऽपि न क्षतिरिति ॥

Colophon:

इति शेषाद्रिवंशतिलकस्य यादवाद्रिवासरसिकस्यानन्ताचार्यस्य कृतौ निर्विशेषप्रमाणनिरासवादः ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

(c) विधिसुधाकरः.

VIDHISUDHĀKARAH.

Foll. 25a—65a Fol. 65b is blank

Same work as the one described under No. 4477 of the D.C.S. MSS., Vol IX.

Incomplete.

(d) अपहतपाप्मत्वविचारः.

APAHATAPĀPMATVAVICĀRAH.

Foll. 66a—67b.

This is a disquisition on the interpretation of the epithet अपहतपाप्मा occurring in the सम्पद्याविर्भावाधिकरण in Ramānuja's Brahmasūtrabhāsya. This work was written by Anantācārya of Śēsārya family in answer to a question of Rāmānujācārya of Phaṇipuram.

Complete.

It is stated at the end that the MS. was copied by Ramanuja-dāsa of Tiruvendalūr on the 13th day of the dark fortnight in the year Āṅgirasa.

Beginning:

श्रीमद्रामानुजाचार्यैः फणीपुरविभूषणैः ।
पृष्टोऽनन्ताख्यदासोऽयं विज्ञापयति किंचन ॥

संपद्याविर्भाव इत्यधिकरणे श्रीभाष्ये अपहतपाप्मत्वादीनां प्रजापतिवाक्योदितानां स्वाभाविकानामेव संसारदशायां तिरोहितानां तिरोधाननिवृत्तिरूपाविर्भावो मुक्तिरित्युक्तम् । अपहतपाप्मत्वं च विहितकर्मनिषिद्धकर्मोभयनिष्ठफलजनकतावच्छेदकशक्तिप्रतिबन्धकत्वम् ।

End:

पुरुषभेदेन च विषयेषु ईश्वरः अनुकूलप्रतिकूलपरिणामान् जनयतीति प्रतिपादितमिति ॥

अत्र कश्चिद्गुणः स्याच्चेत् पूर्वाचार्यमुखोद्गतः ।
दोषश्चेन्मामकीनोऽयं क्षम्यतां च दयालुभिः ॥

(*e*) सिद्धान्तसिद्धाञ्जनम्.

SIDDHĀNTASIDDĀÑJANAM.

Foll. 68*a*—91*a*.

Same work as the one described under No. 5069 of the D.C.S. MSS., Vol. X.

Contains ईश्वरनिरूपणपरिच्छेद complete and नित्यविभूतिपरिच्छेद incomplete.

(*f*) मोक्षकारणतावादः.

MŌKSAKĀRANATĀVADAH

Foll. 93*a*—104*b*; foll 91*b* and 92 are blank.

Same work as the one described under No. 4983 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **59.**

Palm-leaf 5⅞ × 1½ inches. Foll. 160. Lines, 9 to a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṛsnavādhyār of Palghat.

(*a*) ब्रह्मसूत्रम्.

BRAHMASŪTRAM

Foll. 1*a*—16*b*

Same work as the one described under No. 4649 of the D.C.S. MSS., Vol. IX.

Complete.

(*b*) कैवल्योपनिषद्.

KAIVALYŌPANISAD.

Foll. 17*a*—19*b*.

Same work as the one described under No. 395 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(c) अद्वैतसिद्धान्तसङ्क्षेपः.

ADVAITASIDDHĀNTASAṄKṢEPAḤ.

Foll. 19b – 24b

A short treatise on Advaita philosophy.

Complete.

Beginning:

सृष्टेः पूर्वं सच्चिदानन्दस्वरूपं ब्रह्मैकमेवासीत् । तस्मिन् सत्त्वरजस्तमोगुणात्मिका अनृतजडदुःखरूपा अनिर्वचनीया मायाविद्यादिनामधेया अनादिस्तच्छक्तिः अग्नौ दाहप्रकाशशक्तिरिव विलीना सती स्थिता । सा सृष्टिकाले बहिर्निर्गता सती त्रेधा जाता । एका विशुद्धसत्त्वप्रधाना मायाख्या । द्वितीया मलिनसत्त्वप्रधाना अविद्याख्या । तृतीया तमःप्रधाना तामसाख्या ॥

End:

एवमध्यारोपापवादभ्यां पुनःपुनः ब्रह्म विचारणीयम् । तेनावश्यं ज्ञानं भवति । मुक्तिश्च भवति ॥

Colophon:

इति वेदान्तसिद्धान्तः संक्षिप्य प्रकाशितः ॥

(*d*) गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Foll. 25*a*—59*b*.

Same work as the one described under No. 1200 of the D.C.S. MSS., Vol. II

Complete. Contains 28 Adhyāyas

(*e*) अघपञ्चषष्टिः.

AGHAPAÑCAṢAṢṬIḤ.

Foll. 60*a*—71*b*.

Same work as the one described under No. 3000 of the D.C.S. MSS., Vol. V.

Complete.

(*f*) अघपञ्चषष्टिः--सव्याख्या.

AGHAPAÑCASAṢṬIḤ WITH COMMENTARY.

Foll. 72*a*--108*b*.

Same work as the one described under No. 3002 of the D.C.S MSS., Vol. V.

Complete.

(*g*) कुष्ठादिरोगप्रायश्चित्तप्रकारः.

KUṢṬHĀDIRŌGAPRĀYAŚCITTAPRAKĀRAH.

Foll. 109*a* --136*b*.

Deals with the expiatory ceremonies, etc, to be performed for getting rid of leprosy and certain other diseases

Complete

Beginning :

प्रथमं षडब्दकृच्छ्रानुष्ठानम् । ततो गृहशान्तिः । ततः कलशपूजापुरःसरं वेदपारायणम् । ततो वृषभदानम । ततो गोदानदशदानानि। तत्र षडब्दकृच्छ्रानुष्ठानप्रकारः . . . .

सर्वेषां पापानां मध्ये इह जन्मनि एतस्मिन् शरीरे परिदृश्यमानकुष्ठरोगनिदानभूतस्य सप्तसु जन्मसु अनुवृत्तिशालिनो दुरितस्यापनोदकं प्रायश्चित्तं धर्मशास्त्रपर्यालोचनया निर्णीय उपदिश इत्युक्त्वा ततः प्रणमेत्। परिषद्दक्षिणां दद्यात् । यजमानः विधायकान् गन्धादिभिः पूजयेत् ।

End :

एवं कृते यजमानः प्रमेहरोगान्मुक्तो भवति, दीर्घायुश्च भवति।

धेनुदानमन्त्रः—

चक्रं सुदर्शनं यस्य राजते न (स) तथैव हि।
प्रमेहं हन्तु मे क्षिप्रं विष्णुर्गरुडवाहनः ॥

अस्मै ब्राह्मणाय तुभ्यमहं संप्रददे ॥

(h) सन्तानगोपालमन्त्रः.

SANTĀNAGŌPĀLAMANTRAḤ.

Foll. 137*a*—138*b*.

Similar to the work described under No. 7472 of the D.C.S. MSS., Vol. XIV

Complete.

(i) रामावतारादिकालनिर्णयः.

RĀMĀVATĀRĀDIKĀLANIRṆAYAḤ.

Foll. 139*a*—143*b*.

Similar to the work described under No. 1909 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

Beginning:

इतः पञ्चमत्रेतायुगे श्रीरामावतारः । चैत्रे मासि नवम्यां तिथौ पुनर्वसूनक्षत्रे कर्कटकलग्ने श्रीरामस्य जन्म । नवमे वर्षे उपनयनम् । द्वादशे वर्षे विश्वामित्रेण गमनम् । तस्मिन्नेव विवाहः ।

End:

पञ्चम्यां रक्षोवानरसेनापरिवृतस्य रामस्य भरद्वाजाश्रमप्रवेशः । चतुर्दशसमाः पञ्चम्या सह गताः । षष्ठ्यामयोध्याप्रवेशः । चैत्रशुद्धपञ्चम्यां श्रीरामस्य पट्टाभिषेकः ॥

Colophon:

रामायणं संपूर्णम् ॥

(j) कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 145*a*—148*a*; fol. 144 contains the number of Granthas in each of the several Purāṇas.

Contains 108 eulogistic names of Kṛṣṇa.

Complete.

Beginning:

श्रीकृष्णः कमलानाथो वासुदेवस्सनातनः ।
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥

End:

पुण्यश्लोकस्तीर्थपादो वेदवेद्यो दयानिधिः ।
सर्वभूतात्मकस्सर्वग्रहरूपी परात्परः ॥

(*k*) मृत्युञ्जयत्र्यक्षरमन्त्रः—यन्त्रसहितः.

MṚTYUÑJAYATRYAKṢARAMANTRAḤ WITH YANTRA

Foll. 150*a*—154*b*; fol. 149 contains a few stray lines, the impressions of which are quite faded.

Similar to the work described under No. 6953 of the D.C.S. MSS., Vol XIII. Instructions as to the method of repeating the Mantra are given in Tamil.

Complete.

Beginning:

अस्य श्रीमृत्युञ्जयत्र्यक्षरीमहामन्त्रस्य कहोल ऋषिः, अनुष्टुप् छन्दः, अमृतमृत्युञ्जयरुद्रो देवता, सामित्याद्यङ्गन्यासकरन्यासः ।

End:

पच पच दावदान्तं पच एवं प्रवशमानयस्वाहा ॥

(*l*) सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Foll. 155*a*—157*b*.

Similar to the work described under No. 7527 of the D.C.S. MSS., Vol. XIV.

Foll. 158*a*—160*b* contain stanzas on the renunciation of worldly pleasures.

Complete.

R. No. 60.

Śrītāla. 7⅜ × 2 inches. Foll 32 Lines, 10 in a page. Grantha. Good

Purchased in 1910-11 from S. Rāmakṛṣṇavādhyār of Palgha

(*a*) अतिरात्रप्रयोगः.

ATIRĀTRAPRAYŌGAH.

Foll. 1*a*—19*b*.

Gives the manner of conducting the Atirātra sacrifice which forms one of the six Sōma sacrifices.

Complete.

Beginning:

अथातिरात्रप्रयोगः । आतिरात्रक्रतुस्तु देवा वा उक्तचान्यभिजित्ये त्यनुवाकद्वयेन विहितः । स च अषोडशिकः सषोडशिक इति पक्षद्वयम् । तथाच कल्पः—क्लृप्तो ज्योतिष्टोमोऽतिरात्रोऽषोडशिको यदि वा षोडशि· मानिति । तत्र सषोडशिकपक्षे प्रयोग उच्यते—वरणप्रभृति यज्ञायज्ञियच मसभक्षणान्तं भवति । अतएवात्रापि विश्वरूपाज्योतिर्गोनयोर्निवृत्तिः, नान्यत्र विश्वरूपा ज्योतिष्टोमात् प्रकृतिभूतादग्निष्टोमसंस्थादिति वचनात् ।

End:

तिसृभ्यो हिं करोति । सपराचीभिरिति विष्टुतिः कार्या । संधिषा· मत्रयस्यादौ पृथक् हिंकारः कार्यः । संधिचमसभक्षणे हार्यो(रियो)जने च तिरोऽह्नस्येति विशेष इत्यर्थः ॥

(*b*)

BRAHMATVAKḶPTIḤ.

Foll. 20*a*—32*a*.

Deals with the qualifications and functions of the person officiating as Brahma in आधान, पशुबन्ध and सोम sacrifices

Complete.

Beginning:

प्रणम्य विघ्नक(ह)र्तारं सर्वाभीष्टप्रदायकम् ।
आधानपशुसोमेष्टिब्रह्मत्वविधिरुच्यते ॥

ब्रह्मार्षेयादिगुणकोऽनादेशे पूर्वया विशेत् ।
सर्वत्रोदङ्मुखस्तिष्ठेद्धोमेभ्योऽन्येषु कर्मसु ॥
तत्तद्दक्षिणतः प्रायः प्राङ्मुखो होममाचरेत् ।
अध्वर्युणा वृतः कुर्यात् ब्रह्मत्वं सर्वकर्मसु ॥

अग्न्याधाने संभारहरणकाले निरस्तः परावसुरिति दक्षिणतस्तृणं निरस्याप उपस्पृश्य आवसोः सदने सीदामीत्युपविश्य भूर्भुवःस्वर्बृहस्पतिर्ब्रह्माहं मानुष इत्युपांशु ओमित्युच्चैर्ब्रूयात् ॥

End:

वाजिनां सामरथचक्रं परिवर्तयन् त्रिर्गायेत् । पुरउष्णिक् छन्दः ॥

Colophon:

ब्रह्मत्वक्लृप्तिः समाप्ता ॥

R. No. **61.**

Palm-leaf 16 × 1¼ inches Foll. 90. Lines, 68 in a page. Grantha Good.

Purchased in 1910–11 from Mīnākṣiyammāl of Koduvāyūr.

(*a*) **अभिश्रवणम्.**

ABHIŚRAVAṆAM.

Foll. 1*a*—26*b*

Same work as the one described under No. 235 of the D.C.S. MSS., Vol. I, Part II; contains also **पुरुषसूक्त** at the beginning and **गङ्गावतरणघट्ट** of the Rāmāyaṇa at the end.

Complete.

(*b*) **पुण्याहवाचनम्.**

PUṆYĀHAVĀCANAM.

Foll. 27*a*—29*b*.

Deals with the Vedic Mantras used in purifying objects under pollution.

Complete.

Beginning:

ओम् शान्तिः शान्तिः । दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत् प्र ण आयूंषि तारिषत् । आपो हि ष्ठा . आपो जनयथा च नः । हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।

End:

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः । शिवं शिवं भूर्भुवः सुवर्हरिः ओम् ॥

(*c*) **पञ्चशान्तिः.**

PAÑCAŚĀNTIḤ.

Foll. 30*a*—34*b*.

Same work as the one described under No 276 of the D.C.S. MSS., Vol I, Part II

Complete.

(*d*) **नवग्रहजपः.**

NAVAGRAHAJAPAH.

Foll. 34*b*—37*b*.

Contains the Mantras used in propitiating the Navagrahas, the nine planets of the Indian Astronomical system. *Vide* also No. 3644 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पते । आ नः शृण्वन्नूतिभिः सीद सादनम् महागणपतये नमः ।

आसत्येन रजसा वर्तमानो निवेशयन् अमृतं मर्त्यं च ।

End :

चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्रचन्द्राभिर्गृणते युवस्व । चित्रगुप्ताय नमः । आदित्यादिनवग्रहदेवताभ्यो नमः । . . . . यत्र देवैः सधमादं मदेम । नक्षत्रदेवतायै नमः ॥

(e) सूर्यनमस्कारः.

SŪRYANAMASKĀRAḤ.

Foll 37b—38b.

Subject-matter is the same as that of the work described under No. 7586 of the D.C.S MSS, Vol XIV.

Contains only the Vedic Rk.

Beginning :

उद्यन्नद्य मित्रमहः । मित्राय नमः । आरोहन्नुत्तरां दिवम् । रवये नमः । हृद्रोगं मम सूर्य । सूर्याय नमः । हरिमाणं च नाशय । भानवे नमः । शुकेषु मे हरिमाणम् । खगाय नमः ।

End :

अहं द्विषतो रधम् । मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्य सवितृकङ्क(त्रर्क)भास्करेभ्यो नमः ॥

(f) पञ्चसूक्तम्.

PAÑCASŪKTAM.

Foll. 39a—40b

Consists of the following portions taken from the Vēdas :-

		Mandala.	Sūkta.	Ṛk.
१. वरुणसूक्त.	Ṛgvēda.	1	24	15, 11 and 14.
२. रुद्रसूक्त.		4	5	10
		2	33	60
		2	1	6
		4	3	1
		4	2	8

		Aṣṭaka	Praśna	Anuvāka.	Pañcaśat.
३. ब्रह्मसूक्त.	Taittirīya Brāhmaṇa.	2	8	8	8, 9, 10

		Mandala	Sukta	Ṛk
४. विष्णुसूक्त.	Ṛgvēda	1	154	1, 5 and 2
	,,	7	99	1
	,,	7	100	1 and 3
		Praśna	Anuvāka	Pañcaśat
५. दुर्गासूक्त.	Taittirīya Āraṇyaka	6	1	11

Complete

(*g*) श्रीसूक्तम्.

ŚRĪSŪKTAM.

Foll. 40*b*—41*b*.

Same work as the one described under No 17 of the D.C.S. MSS., Vol. I, Part I

Complete

(*h*) आयुष्यसूक्तम्.

ĀYUṢYASŪKTAM.

Foll 41*b*—42*b*

This Sūkta is repeated in order to bring about longevity to children.

Complete

Beginning :

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवः स न आयुर्ददातु तस्मै जुहोमि हविषा घृतेन ॥

End :

विष्णो त्वं नो अन्तमः शर्म यच्छ सहन्त्या । प्र ते धारा मधुश्च्युत उत्संदुह्रते अक्षितम् ॥

(*i*) मृत्युसूक्तम्.

MṚTYUSŪKTAM.

Foll. 42*b*—43*b*.

This Sūkta is repeated with a view to ward off fatal diseases; and consists of the following portions culled from the Vēdas :—

	Astaka	Praśna.	Anuvāka.	Pañcāśat.
Taittirīya Brāhmana	3	7	11	4, 5
Taittirīya Brāhmaṇa	3	7	7	2 (last portion)
	Kanda			
Taittirīya Saṁhitā	4	1	7	4 (portion).
	Astaka			
Taittirīya Brāhmana	1	2	1	15 (portion).
Taittirīya Araṇyaka		3	15	1
	Kanda			
Taittirīya Saṁhitā	4	5	10	2
	Mandala		Sūkta.	Ṛk.
Ṛgvēda ..	1		121	7
	Astaka	Prasna.	Anuvāka.	Pañcāsat.
Taittirīya Brahmana	3	7	11	4 (portion).
	Mandala.		Sukta.	Ṛk.
Ṛgvēda ..	7		50	12
	Aṣṭaka.	Praśna.	Anuvāka.	Pañcāśat.
Taittirīya Brāhmaṇa	3	10	8	1
	Mandala.	Sūkta.	Ṛk.	
Ṛgvēda ..	1	99	1	
	Aṣṭaka.	Prasna.	Anuvāka.	Pañcāsat.
Taittirīya Brāhmana	3	10	5	1 (portion).

Complete.

(j) भाग्यसूक्तम्.

BHĀGYASŪKTAM.

Foll. 43*b*—44*a*.

The verses contained in this are repeated in order to obtain prosperity. They form the 41st Sūkta of the 7th Māṇḍala in the Ṛgvēda and the 12th verse in the 6th Khaṇḍa of the 2nd Praśna of Āpastamba Mantrapātha.

Complete.

(k) जीवसूक्तम्.

JĪVASŪKTAM.

Fol. 44*b* only.

Deals with the Mantras which are considered to be efficacious in warding off danger to life caused by consumption. This consists of the following portions :—

	Mandala.	Sūkta.		
Ṛgvēda	10	161		
	Aṣṭaka	Praśna.	Anuvaka.	Pañcāśat
Tattirīya Brāhmana	3	7	10	6

Complete.

(*l*) भूसूक्तम्.

BHŪSŪKTAM.

Foll 44*b*—45*b*.

Same work as the one described under No. 216 of the D.C.S. MSS., Vol. 1, Part II.

Complete.

(*m*) अश्वत्थपूजा.

AŚVATTHAPŪJĀ.

Foll. 45*b*—47*a*.

Deals with the manner of worshipping the Aśvattha tree with a view to get rid of diseases and to obtain longevity

Complete.

Beginning

शुक्ला . . . ये । ओं . . . राम् । अद्य पूर्वोक्तैवं-गुणाविशेषणविशिष्टायामस्यां प्रथमायां शुभतिथौ भानुवासरयुक्तायामश्वती नक्षत्रयुक्तायां शुभ . . स्यां प्र . . थौ मम . . . र्थं उत्तरफल्गुनीनक्षत्रे कन्याराशौ जातस्य शिवरामशर्मणः मम सहकुटुम्बस्य शरीरे वर्तमानवर्तिष्यमाणसमस्तरोगपीडापरिहारद्वारा क्षिप्रारोग्यसिद्ध्यर्थं दीर्घायुष्यसिद्ध्यर्थमश्वत्थनारायणप्रसादसिद्ध्यर्थमश्वत्थपूजां करिष्ये । . . . . अश्वत्थमूले लक्ष्मीनारायणं ध्यायामि । आवाहयामि । लक्ष्मीनारायणाय नमः । इदं पाद्यम् । इदमाचमनीयम् ॥

End:

शिवरामशर्माणं मां पालय पालय । मृत्योर्मोचय मोचय । सह(:) जुं ओं । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

आवृत्ति २८ । अं . . . वत् ।

Colophon:

समाप्तम् ॥

(*n*) काममन्युमन्त्रजपाविधिः.

KĀMAMANYUMANTRAJAPAVIDHIḤ.

Fol. 47*b* only

Deals with the Mantras used in the expiatory ceremony performed on the full moon day in the month of Śravaṇa on account of the non-performance in the month of Puṣya of the rites prescribed in connection with अध्यायोत्सर्जन or the periodical cessation of the study of the Vēdas.

Complete.

Beginning:

दर्भेष्वासीनः ऋध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः । पवित्रम् । दर्भान् धारयमाणः । शु . . . य । ओ . . . रोम् । त्रिः । . . . . र्थे तैष्यां पौर्णमास्यामध्यायोत्सर्जनाकरणप्रायश्चित्तार्थं षट्त्रिंशदुत्तरसहस्रसंख्यया काममन्युमहामन्त्रजपं करिष्ये ।

End:

उत्त . . . सुखम् । मित्र . . . यामि । कृष्ण १२ । आ . म्य प्रोक्ष्य । उपाकर्म जपसंकल्पम् ।

(*o*) शिवभुजङ्गः.

ŚIVABHUJAṄGAḤ.

Fol. 48.

Consists of stanzas in भुजङ्गप्रयात metre in praise of Śiva.

Incomplete

Beginning :

गलद्दानगण्डं मिलद्भृङ्गषण्डं चलच्चारुगण्डं जगत्त्राणशौण्डम् ।
कनद्दन्तकाण्डं विपद्भङ्गचण्डं शिवप्रेमपिण्डं भजे वक्रतुण्डम् ॥
अनाद्यन्तमाद्यं परं तत्त्वमर्थं चिदाकारमेकं तुरीयं त्वमेयम् ।
हरिब्रह्ममृग्यं परब्रह्मरूपं मनोवागतीतं महः शैवमीडे ॥

End :

न यत्ते भवेद्भक्तवात्सल्यहानिस्तदा मे दयालो सदा संनिधेहि ।
अयं दानकालस्त्वहं दानपात्रं भवान्नाथ दाता त्वदन्यं न याचे ॥

(*p*) रक्षोघ्नमन्त्राः.

RAKṢŌGHNAMANTRAH.

Foll. 49*a*—52*b*.

The repetition of this Mantra is considered to have the power of driving away Rākṣasas. This Mantra is repeated just before the Brahmins, selected to represent the Pitrs, etc., in Śraddhas, begin to partake of the food that is served to them. The Mantras consist of the following seven Anuvākas, out of which the first two are repeated by the performer of the ceremony and the remaining five by the Brahmins who take the food

(1 & 2)	Anuvākas one and two in the second Praśna of Taittirīya Āranyaka		
(3)	Do.	18	in Praśna V, Kanda 7, in Taittirīya Samhita.
(4)	Do	13	in Praśna VIII, Astaka 3, in Taittirīya Brāhmana
(5)	Do	3	in Praśna V, Kanda 4, in Taittirīya Samhita
(6)	Do.	18	in Praśna IV, Kānda 7, in Taittiriya Samhita.
(7)	Do.	5	in Praśna IX, in Aṣṭaka 3, in Taittirīya Brāhmaṇa.

Complete.

(*q*) इतिहासः.

ITIHĀSAH.

Foll. 53*a*—57*a*. Fol 57*b* is found blank.

Same work as the one described under No 298 of the D.C S. MSS., Vol. I, Part III

Complete.

(r) अग्निसन्धानम्.

AGNISANDHĀNAM.

Foll. 58a—61b

Deals with the manner of conducting the expiatory ceremony prescribed in case of omission to perform the daily ceremony of Aupāsana and with the manner of performing the Aupāsana itself.

Complete

Beginning :

दर्भेष्वासीनः दर्भान् धारयमाणः पत्न्या सह शुक्ला . . . ये। प्राणानायम्य संकल्पं करोति . . . .

धर्मपत्न्या सह विच्छिन्नौपासनाग्निसंधानं करिष्ये। द्विः दर्भानुत्तरतो निधाय, पत्न्यै तृणमुत्तरतो निधाय अप उपस्पृश्य द्विरुल्लेखनम्। श्रोत्रियगृहादग्निमानाय्याग्निं प्रतिष्ठाप्य प्रोक्ष्यं परिस्तरणम्।

End :

आत्मसमारोपणं करिष्ये।

या त अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छावसूनि कृण्वन् अस्मे नर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद। स्वां योनिं जातवेदो भुव आ जायमानः सक्षय एहि। त्रिः।

उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्। आयुः प्रजां रयिमस्मासु धेह्यजस्रो दीदिहि नो दुरोणे॥

(s) स्थालीपाकः.

STHĀLĪPĀKAH.

Foll. 61b—63b.

Similar to the work described under No. 8867 of the D.C.S. MSS., Vol. VII.

Complete.

It is given at the end that this work was transcribed by Śivarāma, on Wednesday, the eighth day of the bright fortnight and the 27th of the Āṣāḍha month in the year Hēvilambi.

Beginning:

दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य . . . . प्रथमायां शुभतिथौ ममोपात . . र्थं पौर्णमासस्थालीपाकेन यक्ष्ये। अनया मम धर्मपत्न्या सह पौर्णमासस्थालीपाकेन यक्ष्ये। द्विः।

End:

मन्त्र . . रम्। आचम्य॥

पौर्णमासस्थालीपाकः समाप्तः॥

दर्भे . . र्थं दर्शस्थालीपाकेन यक्ष्ये। अनया मम धर्मपत्न्या सह दर्शस्थालीपाकेन यक्ष्ये। द्विः। . . . . आ . म्य दर्शस्थालीपाकं तत्सत् ब्रह्मार्पणम्। औपासनपात्रादि। अ . ये शर्म अस्मि भोः। अग्निं प्रतिष्ठाप्य!

(*t*) कृष्णयजुर्वेदसंहिता.

KṚṢṆAYAJURVĒDASAṀHITĀ.

Foll. 64*a*—67*a*.

Same work as the one described under No. 71 of the D.C.S. MSS., Vol. I, Part II.

Contains the first Praśna of the first Kāṇda incomplete.

(*u*) उदकशान्तिः—कारिकासहिता.

UDAKAŚĀNTIḤ WITH KĀRIKĀ.

Foll. 68*a*—77*b*. Foll. 67*b* and 78 to 84 are blank.

Contains the Mantras used in sanctifying water for religious purposes. A bath taken with this water is considered to be efficacious in bringing about health and longevity.

Incomplete.

Beginning:

सावित्रवेदादिकृणुष्वपाजइन्द्रोऽनुवाकं यत इत्युभौ च।
महान् सजोषाश्च पुरःसराजीन् रक्षोहणः पश्च च आयुषश्च॥

Colophon:

इति उदकशान्तिकारिका समाप्ता ॥

End:

पिता पुत्रः पौत्रो वषट् स्वाहा नमो भूर्भुवः सुवर्वषट् स्वाहा नमः । इन्द्रो दधीचो अस्थभिः ।

(v) वरलक्ष्मीपुराणम्.

VARALAKṢMĪPURĀṆAM.

Foll. 85*a*—86*b*.

On the importance of Varalaksmīvrata and on the manner of observing the Vrata.

Complete.

Beginning:

कैलासशिखरे रम्ये नानागणनिषेविते ।
मन्दारविटपप्रान्ते नानामणिविभूषिते ॥

* * *

ईश्वर उवाच—

वरलक्ष्मीव्रतं पुण्यं व्रतानामुत्तमं व्रतम् ।
सर्वसम्पत्करं शीघ्रं पुत्रपौत्रप्रवर्धनम् ॥
शुक्ले श्रावणिके मासे पौ(पू)र्णिमोपान्तभार्गवे ।

End:

एतत्ते सर्वमाख्यातं व्रतानामुत्तमोत्तमम् ॥
य इदं शृणुयान्नित्यं श्रद्धाभक्तिसमन्वितः ।
तत्प्रसादेन सर्वार्था भविष्यन्ति न संशयः ॥

Colophon:

इति ब्रह्माण्डपुराणे वरलक्ष्मीव्रतपुराणं नाम विंशोऽध्यायः ॥

(w) वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ

Foll. 86*b*—88*a*.

Same work as the one described under No. 8493 of the D.C.S MSS., Vol. XVI.

Complete.

R. NUMBER 61.


(*a*) सुब्रह्मण्ययन्त्रम्.
SUBRAHMAṆYAYANTRAM.

Fol. 89*a* only. Foll. 88*b* and 89*b* are blank

Gives the Yantra relating to the Mantra addressed to Subrahmaṇya.

Complete.

Beginning and End :



श	र	व	ण	भ	व
र	व	ण	भ	व	श
व	ण	भ	व	श	र
ण	भ	व	श	र	व
भ	व	श	र	व	ण
व	श	र	व	ण	भ

पञ्चाक्षरयन्त्रम्.

य	न	म	शि	वा
वा	य	न	म	शि
शि	वा	य	न	म
म	शि	वा	य	न
न	म	शि	वा	य

---

(५) शूलिनीमन्त्रयन्त्रम्.

SŪLINĪMANTRAYANTRAM.

Fol. 90.


Gives the **Yantra** relating to the Śūlinīmantra.

Complete.

Beginning :

शूलिनीमन्त्रयन्त्रम्—

क्षां क्षीं क्षूं ज्वल ज्वल भूतप्रेतविनाशिनी.



End:

शूलिनी त्वं पाहि, समस्तरिपून् दुष्टग्रहान् हुं फट् स्वाहा ॥



R. No. **62**.

Palm-leaf. 15 × 1⅝ inches. Foll. 104. Lines, 8 in a page. Telugu
Injured.

Presented by Addēpalli Rāmaśēṣayya of Rēpalle, Guntur district.

ब्रह्मसूत्रभाष्यव्याख्या—भाष्यरत्नप्रभा.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: BHĀṢYARATNA PRABHĀ.

Same work as the one described under No. 4679 of the D.C.S MSS., Vol. IX.

Contains the first Adhyāya only.

R. No. **63**.

Palm-leaf. 14¼ × 1¼ inches. Foll 95. Lines, 8 in a page. Grantha Good.

Presented by S. Rāmakṛṣṇavādhyār of Palghat.

महाभारतम्—विराटपर्व.

MAHĀBHĀRATAM--VIRĀṬAPARVA.

Same work as the one described under No. 1931 of the D.C.S· MSS., Vol. IV, Part I.

Contains Adhyāyas 19 to 77. Wants beginning.

Contains a note saying that the work was copied by Rāma in the year Śārvari.

R. No. **64**.

Palm-leaf. 17¼ × 1⅞ inches. Foll. 123. Lines, 11 in a page. Grantha. Good.

भागवतव्याख्या—मुनिभावप्रकाशिका.

BHĀGAVATAVYĀKHYĀ; MUNIBHĀVAPRAKĀŚIKĀ.

Presented by E R. Śrīnivāsarāghavācārya of: Kalyāṇapuram

Same work as the one described under No 2229 of the D C S. MSS., Vol. IV, Part I.

Contains Adhyāyas 1—68 in the 10th Skandha.

R. No. 65.

Hritāla. 7⅞ × 2¼ inches. Foll. 188. Lines, 13 in a page. Grantha. Fair

Purchased in 1910-11 from S. Rāmakṛṣṇavādhyār of Palghat.

(*a*) आपस्तम्बापरप्रयोगः.

ĀPASTAMBĀPARAPRAYŌGAḤ.

Foll 1*a*—22*b*

A metrical treatise giving the manner of conducting the ceremonies connected with the death of a Brahmin and as observed by the followers of Āpastamba.

Complete.

Foll. 20*b*—21*b* contain Gṛhayajña, and the 22nd fol. gives the contents of the work

Beginning:

पैतृमेधविधिं वक्ष्ये बालानां श्लोकरूपकम् ।
प्राचीनावीतिना स्नात्वा सर्वस्येति शवासनम् ॥
अनुज्ञा चाग्निसंधानं परेय्वांसं ततश्चरुः ।
अङ्गुष्ठबन्धनं पश्चादिदं त्वा वस्त्रधारणम् ॥

End:

शीतलोदनदध्यन्नं शुण्ठिलवणसंयुतम् ।
पाथेयं पुण्डरीकाक्ष स्वर्गलोके महीयते ॥

इदं पाथेयं वृद्धप्रपितामह . . ददे। तक्रपानकदानं च कृत्वाशीर्वादम् (:) ॥

सपिण्डीकरणं समाप्तम् ॥

* * * *

कृष्णापिङ्गलध्वजाकारमण्डले प्रतिष्ठितान् दक्षिणाभिमुखान् भगवतः केतूनावहयामि । सर्वत्र इदमासनम् । सकलाराधनैः स्वर्चितम् ॥

(*b*) आपस्तम्बपूर्वप्रयोगः.

ĀPASTAMBAPŪRVAPRAYŌGAḤ.

Foll. 23*a*—64*b*.

A manual of the procedure relating to the various rites to be performed in connection with a Brahmin from his birth to the begetting of a child and as observed by the followers of Āpastamba.

Contains from जातकर्म to सीमन्त.

Beginning :

पुत्रे जाते पितुः स्नानं सचेलं तु विधीयते ।
जातकर्म ततः कुर्याच्छ्राद्धमभ्युदयं स्मृतम् ॥

विघ्नेश्वरपूजां कृत्वा संकल्पम्—पञ्चम्यां शुभतिथौ जातं मम कुमारं जातकर्मणा संस्करिष्ये इति द्विः संकल्प्य, जातं वात्सप्रेणाभिमृश्य ।

End :

प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य वत्समन्वारभ्य व्याहृतीश्च जपित्वा वाचं विसृजते । फलदानताम्बूलदानं च कृत्वा अभ्युपस्थानमाशीर्वादम् ॥

Colophon :

सीमन्तं समाप्तम् ॥

(*c*) स्थालीपाकः.

STHĀLĪPĀKAḤ.

Foll. 64*b*—67*b*.

Similar to the work described under No. 3867 of the D.C.S. MSS., Vol. VII.

Contains पूर्णमास, दर्श, and आग्रयण.

(*d*) आयुष्यहोमः.

ĀYUṢYAHŌMAḤ.

Foll. 67*b*--68*b*

Similar to the work described under No 3553 of the D.C.S. MSS., Vol. VII.

Complete.

(e) उपाकर्मप्रयोगः.

UPĀKARMAPRAYŌGAḤ.

Foll. 68b—71a.

Similar to the work described under No. 3576 of the D.C.S. MSS., Vol. VII.

Complete.

(f) दर्भसंस्कारविधिः.

DARBHASAṀSKĀRAVIDHIḤ.

Foll. 74a—78a.

Gives the manner of conducting the cremation rites in connection with persons who meet with unnatural death or whose bodies are not available for the performance of funeral rites

Complete.

Beginning:

चत्वारिंशच्छिरसि, दश ग्रीवं, विंशत्यूरु(रू), त्रिंशदुदरं, पञ्चाशत्पञ्चाशद्बाहुभ्याम्, पञ्चभिः पञ्चभिरङ्गुलयः, ... प्रेतमासु प्रतिकलेबरमावाहयामि । तं स्पृष्ट्वा जपेत्—शिरो मे श्रीः, यशो मुखम्, त्विषिः केशाश्च श्मश्रूणि ।

End:

चतुर्गुणषडब्दं चण्डालेन हतस्य, पञ्चषडब्दं दुर्मृतस्य, एतानि कृच्छ्राणि तत्संख्यापरिमितानि कृत्वा दग्ध्वा मृतिदोषात् पूतो भवति ॥

Foll. 78b—80b contain miscellaneous works like मार्कण्डेयपूजा, etc.

(g) आश्वलायनश्राद्धप्रयोगः.

ĀŚVALĀYANAŚRĀDDHAPRAYŌGAḤ.

Foll. 81a—94b.

Similar to the work described under No. 3568 of the D.C.S. MSS., Vol. VII.

Complete

(h) आश्वलायनोपाकर्मप्रयोगः.
ĀŚVALĀYANŌPĀKARMAPRAYÔGAḤ.

Foll. 95a--103a.

Similar to the work described under No. 3576 of the D.C.S. MSS., Vol. VII. Intended to be observed by the followers of Āśvalāyana.

Complete.

(i) बोधायनश्राद्धप्रयोगः.
BŌDHĀYANAŚRĀDDHAPRAYOGAḤ

Foll. 103a—107b.

Similar to the work described under No. 3822 of the D.C.S MSS., Vol. VII. As observed by the followers of Bōdhāyana.

Complete.

(j) आश्वलायनपूर्वप्रयोगः.
ĀŚVALĀYANAPŪRVAPRAYŌGAḤ.

Foll. 110a 144b. Foll 108 and 109 contain मृत्युलाङ्गूलहोम and आश्वलायनसंध्यावन्दनप्रयोग.

Similar to the work described under No. 3565 of the D.C S. MSS., Vol. VIII.

Complete.

(k) गृहवास्तुशान्तिः.
GṚHAVĀSTUŚĀNTIḤ.

Foll. 145a—146a.

Prescribes the propitiatory ceremonies to be performed in connection with newly built houses.

Complete.

Beginning:

विघ्नेश्वरपूजा । अनुज्ञा । शुभतिथौ गृहवास्तुशान्तिकर्म करिष्ये इति संकल्प्य, अपामार्गशीर्षैरुदुम्बरशाखया भद्रमिति तृणमिन्द्रवस्या·

दिभिः गृहं संमार्ष्टि । मा नो महान्तं मा नः स्तोक इति द्वाभ्यां पञ्च-गव्येन दर्भमुष्टिना गृहं प्रोक्षयति ।

End:

अन्तरतोऽगारं निवेशनं वा परिषिच्य नान्दीपुण्याहं कृत्वा गृह-यज्ञं कुर्यात् । ऋत्विगाचार्यदक्षिणां भूरिदक्षिणां च ददाति । अभ्यङ्ग-पूर्वकं ब्राह्मणान् भोजयेत् । आचार्याय गोमिथुनं दद्यात् । आशीर्वादम् ॥

(*l*) अश्वत्थोपनयनविवाहविधिः.

AŚVATTHOPANAYANAVIVĀHAVIDHIḤ.

Foll. 146*a*—147*a*. Fol 147*b* is blank.

Gives the manner of performing the Upanayana (investiture with the sacred thread) and the marriage ceremonies in relation to the Aśvattha tree (Peepul). The performance of these ceremonies is considered to enable one to obtain salvation.

Complete.

Beginning:

विघ्नेश्वरपूजां कृत्वा, अश्वत्थोपनयनं करिष्ये । उपनयनकर्माङ्गं हि . रिष्ये । तदङ्गं पु . ष्ये । सविता प्रियतामिति पु . यित्वा, पञ्चशान्तिपुरुषसूक्तेनाभिषिच्य, प्रतिसरबन्धं कृत्वा, अश्वत्थे वो निषदन-मिति अश्वत्थनारायणमावाह्य, प्रदक्षिणं कृत्वा, यज्ञोपवीतानुज्ञा, यज्ञोप-वीतधारणम् ।

End:

अश्वत्थस्य विवाहेन तत्फलं लभते नरः ।
एवं श्रुत्वा धर्मराजा(:) कृतवान्नैमिशे नव ॥
विवाहं पिप्पलस्यापि ततो मोक्षं जगाम सः ।

ऋषयः—

साधूक्तं भवता देव सर्वपापप्रणाशनम् ।
तत्तथैव करिष्याम इत्युक्त्वा ते दिवं ययुः ॥

(m) षष्टिपूर्तिशान्तिः.

ṢAṢṬIPŪRTIŚĀNTIḤ.

Foll. 148a—150b.

Regarding the propitiatory ceremonies to be performed by a twice-born who attains his sixtieth year. The performance is considered to confer longevity on him

Complete.

Beginning:

जन्ममासि जन्मतिथौ जन्मतारसमान्विते ।
तदलाभे क्षे(भ)मात्रेण कुर्यादायुर्विवृद्धये ॥
कृतकृत्यक्रियो विद्वान्नवशुक्लाम्बरावृतः ।
देवालये मठे वापि उद्याने च गुरोर्गृहे ॥
स्वगृहे च शुचौ देशे लिप्ते गोमयवारिणा ।

* * * *

सिंहस्कन्धगतां षष्टिं चतुर्हस्तां त्रिलोचनाम् ॥
शक्तिशूलगदापद्मधारिणीं चन्द्रमौलिनीम् ।
कुम्भोपरि प्रतिष्ठाप्य षष्टिदेवीं प्रपूजयेत् ॥

End:

द्वादशेषु च मासेषु चैकमासेऽथवा यदि ।
षष्टिदेवीप्रसादेन प्राप्नोति शरदः शतम् ॥

Colophon:

इति शौनकीये षष्टिपूर्तिशान्तिः समाप्ता ॥

(n) बृन्दालक्ष्मीव्रतोद्यापनम्.

BṚNDĀLAKṢMĪVRATODYĀPANAM.

Foll. 151a—155b.

Gives the performance of the Pūjā in connection with the completion of the Vrata which consists in worshipping the Tulasī plant which is considered to be as dear to Viṣṇu as Lakṣmī.

Complete.

Beginning:

विघ्नेश्वरपूजा । अनुज्ञा । समस्तपापक्षयार्थं चिन्तितमनोरथावाप्त्यर्थं पुत्रपौत्रधनधान्यसमृद्ध्यर्थमेभिर्ब्राह्मणैः सह कल्पोक्तप्रकारेण आचार्यमुखेन बृन्दालक्ष्मीव्रतोद्यापनकर्म कर्तुं . ण । संकल्पः, पुण्याहम्, ऋत्विग्वरणम्, तैः समं बृन्दां नित्यवत् संपूज्य, उपायनार्घ्यप्रदानप्रदक्षिणनमस्कारान्तं कृत्वा, पूजाप्रारम्भः ।

शुद्धस्फटिकसंकाशे महाविपिनसंभवे ।
ध्यायामि त्वां सदा देवि प्रसादं कुरु सर्वदा ॥

ध्यानम्—

बृन्दे लक्ष्मि नमस्तुभ्यं दयां कृत्वा मयि प्रिये ।
उद्यापनं करोमि त्वां प्रसीद भुवनेश्वरि ॥

End:

उद्यापनं प्रोक्षणमभिषेकः । ऋत्विग्भ्यो दक्षिणा, दशदानादि, ब्राह्मणान् भोजयेत् ॥

Colophon:

इति बृन्दाकल्पम् ॥

(*o*) **श्रीचक्रपूजा.**

ŚRĪCAKRAPŪJĀ

Foll. 158*a*—164*a*. Foll. 156, 157*b*, 160*b* and 164*b* are blank; and fol. 165 contains the characteristics of various Mudrās.

Similar to the work described under No. 5729 of the D.C.S. MSS., Vol. XII.

Incomplete.

(*p*) **परिषत्प्रायश्चित्तविधिः.**

PARIṢATPRĀYAŚCITTAVIDHIḤ.

Foll. 166*a*—175*b*. Foll. 176*a*—188*b* contain some miscellaneous matter in Tamil and Sanskrit.

Prescribes how certain expiatory ceremonies have to be performed in accordance with the orders of a Parisat or assembly of learned men. The work is irregularly written and occasionally self-contradictory.

Complete.

Beginning :

चत्वारः परिषद्विप्रास्त्रयो विप्रा विधायकाः ।
एकोऽनुवादको विप्र एवमष्टौ प्रकीर्तिताः ॥

उदङ्मुखी स्यात्परिषत्प्रत्यगास्या नुवाद(विधाय)काः ।
प्रागास्यः प्रत्यगास्यो वा तिष्ठेदेवानुवादकः ॥

* * * *

अशेषे . स्वीकृत्य, भारद्वाजगोत्रस्य नारायणशर्मणः मम जन्माभ्यासात् . अपनोदनार्थे . . . . पादांशपरिमिताब्दकृच्छ्रानुष्ठानं कर्मविपाकोक्तप्रतिमादानार्थं पूजाजपहोमदानं ब्राह्मणभोजनादिकं कर्म कर्तुं योग्य . ण । संकल्पम् ।

End :

पादः परिषदं गच्छेत् पादो गच्छेद्विधायकान् ।
पादोऽनुवादकं गच्छेच्छेषं कृच्छ्रेण शुध्यति ॥

देशकालं च पात्रं च द्रव्यं द्रव्यप्रयोजनम् ।
उपपत्तिमवस्थानं प्रायश्चित्तं प्रकल्पयेत् ॥

अशीत्यधिकसहस्रसंख्याकृच्छ्रात्मकं षडब्दम् ॥

R. No. **66.**

Palm-leaf. 8¼ × 1¼ inches. Foll. 16. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1910-11 from Mīnākṣiyammāl of Koḍuvāyūr.

अमासोमवारव्रतकल्पः.

AMĀSŌMAVĀRAVRATAKALPAḤ.

Same work as the one described under No. 8195 of the D.C.S. MSS., Vol. XVI.

Contains Kathā only.

R. No. **67.**

Śrītāla. 14¼ × 1⅞ inches. Foll. 131. Lines, 10 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

आपस्तम्बश्रौतसूत्रप्रयोगवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRAPRAYŌGAVṚTTIḤ.

By Tālavṛntanivāsin.

Same work as the one described under No 1073 of the D.C.S. MSS., Vol. II.

Contains Praśnas one to six and Paṭalas one to seven of the seventh Praśna complete; eighth Paṭala incomplete.

R. No. **68.**

Palm-leaf. 14½ × 1⅝ inches. Foll 42 Lines, 7 in a page. Grantha. Good

Purchased in 1910-11 from Gōpālasāmi Ayyaṅgār of Mannārguḍi.

ईक्षत्यधिकरणविचारः.

ĪKṢATYADHIKARAṆAVICĀRAḤ.

Foll. 1*a*—40*a*. Fol 40*b* is blank; and foll. 41 and 42 contain some of the stanzas of Mahānāṭaka and some passages relating to sacrifice.

A controversial tract on the interpretation of the Sūtra ईक्षतेर्नाशब्दम् (I-1-5) of the Brahmasūtras in favour of the Viśiṣṭādvaita system: by Anantārya

Complete.

Beginning:

नत्वा श्रीशपदाब्जे स्तुत्वा पङ्क्तिं गुरूणां च ।
ईक्षतिनीतिविचारं तनुतेऽनन्तार्यदासोऽयम् ॥

पूर्वोत्तरह्निकभेदभिन्ने शारीरकशास्त्रे प्रथमह्निकेन प्रमेयत्वव्यापककार्यतानिरूपितकारणत्वस्य ब्रह्मलक्षणत्वमुपपाद्यत इति तादृशलक्षणत्वोप-

पादनपरत्वं पूर्वद्विकस्योपाधिः । तस्य लक्षणत्वोपपादनं च असंभवातिव्याप्तिशङ्कावारकतया कार्यतायां प्रमेयत्वव्यापकत्वोपपादनेन चेति द्वेधा भवति ।

End:

सदेवेत्यादिवाक्यं जगत्कारणत्वनिष्ठप्रकारतानिरूपितप्रधाननिष्ठविषयताशालिबोधजनकम्, उपनिषदन्तरजन्यतात्पर्यविषयबोधनिष्ठविषयत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयताशालिबोधजनकत्वाभावादित्यपि बोध्यम् ॥

R. No. **69.**

Śrītāla. 9½ × 2 inches. Foll. 71. Lines, 8 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr

आह्निकसंग्रहः.

ĀHNIKASAṄGRAHAḤ

Foll. 1*a*—71*a*. Fol. 71*b* is blank.

Similar to the work described under No. 2834 of the D.C.S. MSS., Vol. V.

Complete.

R. No. **70.**

Śrītāla. 11¾ × 1⅝ inches. Foll. 22. Lines, 7 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

इष्टिप्रयोगः.

IṢṬIPRAYŌGAḤ.

On the manner of performing certain preliminary ceremonies with Hōma by those who take part in sacrifices.

Contains the second Adhyāya complete and the third incomplete.

Wants four leaves in the beginning.

Beginning:

तक्षणानामेव स्वरुं कुरुते । तक्षणानां स्वरुं कुर्यात् शकलांश्चाधि-मन्थनात् । अथास्यैषा पूर्वेद्युरेव पाशुबन्धिकी वेदिर्विमिता भवति ।

पूर्वाग्ने(न्ते) निहिते शङ्कौ पाशः स्यात् प्रक्रमद्वये ।
पाशुक्या. पाशतो वेद्याः पूर्वान्तो निहिते पदे ॥

* * * *

निरश्रीनामग्निवत् परिस्तृणाति । यजमानः जघनेन गार्हपत्यमुप-विश्य, देवा गातुविदः . ज्यताम् । ममोपात्तसमस्त . र्थं पश्वङ्गभूताग्नेयेष्ट्या यक्ष्ये । त्रिरुपांशुः, त्रिरुच्चैः, अस्या इष्टेः पञ्चदश सामिधेन्यः, वार्त्रघ्नावाज्यभागौ, अग्निः प्रधानदेवता ।

End:

तानि ऽयङ्गानि कुरुतात् । वनिष्ठुं च जाघनीं चावधत्तात् । बहु.

B. No. **71.**

बोधायनजयादिः समाप्तः ॥

(c) चौलप्रयोगः.

CAULAPRAYŌGAḤ.

Foll. 51a—53a. Fol. 50 is blank.

Similar to the work described under No. 3619 of the D.C.S. MSS., Vol. VII.

Incomplete.

Beginning:

विघ्नेश्वरपूजा । संकल्पः—जातस्य कुमारस्य चौलकर्माङ्गं हिरण्यरूपेणाभ्युदयं करिष्ये । जातं कुमा(रं)चौलकर्मणा संस्करिष्ये । पुण्याहवाचनं करिष्ये ।

End:

ये केशिन . . . सृज । यद्वा क्षुरः परिववर्जे . . . अथो वीर्येण । ऊर्ध्वच्छेदनम् ॥

Foll. 53b—55b give an index of the hymns recited in Jayādi and Prāyaścitta Hōmas.

R. No. 124.

Palm-leaf $11\frac{3}{4} \times 1\frac{3}{4}$ inches Foll. 36. Lines, 9 in a page. Grantha. Good.

Purchased in 1910–11 from S. Ramakrsnavadyar of Palghat.

वासुदेवमननसङ्ग्रहः.

VĀSUDĒVAMANANASAṄGRAHAḤ.

This gives a summary of the work called Vasudevamanana of Vāsudēvayati which deals with the doctrines of the Advaita Vēdānta.

Contains Varnakas one to twelve complete.

Beginning:

योऽवतीर्येह आचार्यरूपेण यतिनां मुदे ।
श्रमिन्नारायणं वन्दे तं हरिं करुणानिधिम् ॥
मननाख्यं प्रकरणं वासुदेवयतीश्वरैः ।
रचितं विस्तरेणाद्य सङ्ग्रहेण प्रकाश्यते ॥
बालानामु(प)काराय ममापि ज्ञानसिद्धये ।
तत्र श्रीबालगोपालकृष्णस्सन्निहितो भवेत् ॥

इह खलु धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां मध्ये मोक्ष एव परमपुरुषार्थः, नित्यत्वात् । न स पुनरावर्तत इति श्रुतेः । इतरेषां त्रयाणां न तथात्वमनित्यत्वात् । तद्यथेह कर्मचितो लोकः ।

End:

जडोऽहं दुःखीत्यविवेकेन पतितानां सकलजीवानां भ्रान्तिं निराकर्तुमेव, न तु सच्चिदानन्दपदानां भिन्नप्रतिपादनार्थम्; अपि(तु) आत्मानं द्रव्यत्वेनाङ्गीकृत्यात्मनस्सत्त्वं धर्माश्रित्त्वं सुखं च गुण इति वदन्ति । तन्निरासार्थश्चात्मनस्सच्चिदानन्दपदं लक्षणम् ॥

Colophon:

इति मनने द्वादशं वर्णकं समाप्तम् ॥

R. No. 125.

Palm-leaf. $17\frac{1}{4} \times 1\frac{1}{2}$ inches Foll. 19. Lines, 6 in a page. Grantha. Good.

Purchased in 1910-11 from Gōpālasāmi Ayyangār of Mannargudi

शास्त्रैक्यवादः.

ŚĀSTRAIKYAVĀDAḤ.

Same work as the one described under No. 5051 of the D.C.S. MSS., Vol. X

Complete.

R. No. 126.

Palm-leaf. $19 \times 1\frac{1}{2}$ and $16\frac{5}{8} \times 1\frac{5}{8}$ inches Foll. 31. Lines, 8 in a page. Grantha Good.

Purchased in 1910-11 from Gōpālasāmi Ayyangār of Mannargudi.

(*a*) समासवादः.

SAMĀSAVĀDAḤ.

Foll. 1*a*—14*a*. Fol. 14*b* is blank.

Same work as the one described under No. 5059 of the D.C.S. MSS., Vol. X.

Complete.

(*b*) समासवादः.

SAMĀSAVĀDAḤ.

Foll. 15*a*—31*a*. Fol. 31*b* is blank.

Same work as the above.

Complete.

R. No. 127.

Palm-leaf. $18\frac{1}{2} \times 1\frac{3}{4}$ inches. Foll. 363. Lines, 8 in a page. Telugu. Good.

Purchased in 1910-11 from Rāmānuja Rao of Triplicane.

ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: ŚRUTAPRAKĀŚIKĀ.

Same work as the one described under No. 4963 of the D.C.S. MSS., Vol. X.

Contains only the first Pāda of the first Adhyāya.

R No. **128.**

Palm-leaf. 17⅛ × 1⅛ inches Foll. 18. Lines, 6 in a page. Grantha. Slightly injured

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

Foll. 1 and 2 contain some notes on a portion of the Nyayabhāskara of Anantācārya

(*a*) विषयतावादः

VIṢAYATĀVĀDAḤ.

Fol 3 only.

Same work as the one described under No 5000 of the D.C.S. MSS., Vol. X.

Wants beginning.

(*b*) सामानाधिकरण्यवादः.

SĀMĀNĀDHIKARṆYAVĀDAḤ.

Foll 3*b*—18*b*.

Similar to the work described under No. 5030 of the D.C.S. MSS., Vol. X. By Anantrāya of Śēsārya family and a resident of Yādavādri.

Complete.

Beginning:

श्रीरमणचरणयुगलं ध्यात्वा नत्वा च सम्यगाचार्यान् ।
सामानाधिकरण्ये वादं वितनोत्यनन्तार्यः ॥

इह खलु सर्वं खल्विदं ब्रह्म, तत्त्वमसि, अयमात्मा ब्रह्मेति समानाधिकरणवाक्यार्थो विचार्यते—सामानाधिकरण्यं नाम अभेदसम्बन्धा.

वच्छिन्नप्रकारताकबोधजनकवाक्यत्वम् । स्तोकं पचतीत्यादिक्रियाविशेषण-स्थले सामानाधिकरण्यमिष्टमेव । अत्र वाक्यत्वनिवेशात् न तादृशबोध-जनकपदज्ञानादावतिव्याप्तिः ।

End:

अपृथक्सिद्धिसंसर्गतामतेऽपि ब्रह्मादिपदस्य ब्रह्मशरीरकत्वावच्छिन्नल-क्षणाग्रहदशायां तादृशयोग्यताज्ञानादीनां हेतुत्वस्य क्लृप्तत्वेन गौरवाभा-वात् । अधिकमन्यत्रानुसन्धेयम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon:

इति सामानाधिकरण्यवादस्समाप्तः ॥

R. No. **129.**

Palm-leaf. $14\frac{1}{2}\times 1\frac{3}{4}$ inches. Foll. 18 Lines, 6 in a page Grantha. Good

Purchased in 1910-11 from Gōpālasāmi Ayyangār of Mannargudi.

धर्मज्ञसमयप्रामाण्यप्रकाशिका.

DHARMAJÑASAMAYAPRĀMĀṆYAPRAKĀŚIKĀ.

Foll. 1*a*—16*a*. Fol. 16*b* is blank.

A dissertation on the superiority of the authoritativeness of the conduct of Śistas or persons who have full faith in the Vēdas over that of the Śastras. Tamil stanzas from Divyaprabandhas are also quoted. By Śrīnivāsadāsa of Vadhūla family and a disciple of Mahācārya.

Complete.

Beginning:

सगोदभक्तोचितसाक्षिकं मे स्वयं शिरस्यङ्घ्रियुगप्रदाता ।
सुसुन्दरस्सुन्दरयोगिवर्यस्समास्समस्ता जयतु क्षमायाम् ॥

श्रीमद्भक्तोचितैश्वर्यधुर्यसेनाश्वरायितान् ।
संश्रयामीह वाधूलश्रीनिवासमहागुरून् ॥

परं तद्गरुडारूढं तत्त्वं यस्य वशंवदम् ।
तथा स्थितिगती भेजे तमीडे घनदेशिकम् ॥

*   *   *   *

आलक्ष्मीनाथमास्माकीं नत्वा गुरुपरम्पराम् ।
धर्मज्ञसमयस्यात्र प्रामाण्यं सत् प्रकाश्यते ॥

श्रियःपतेः परमकारुणिकस्य सर्वेश्वरस्य स्वाभाविकसौहार्दबलात्कारकारितनिर्हेतुककटाक्षवीक्षाविशेषसन्धुक्षितमोक्षाभिलाषस्य संसारदवदहनदन्दह्यमानस्वस्वरूपसमुज्जीवनहेतुभूतालौकिकप्रमेयनिर्णयस्य प्रबलप्रमाणनिश्चयायत्तत्वेन प्रथमं तन्निश्चयः कर्तव्यः । तत्र तावत् धर्मज्ञसमय एव प्रबलं प्रमाणम्; धर्मज्ञसमयः प्रमाणं वेदाश्चेत्यापस्तम्बधर्मे तस्य प्रथमोपात्तत्वात् । तत्रान्वाचयार्थकचकारेण तदपेक्षया शास्त्रस्य दौर्बल्याभिधानाच्च ।

End :

तस्मात् भगवत्कटाक्षविशेषेण सञ्जातमोक्षाभिलाषस्य स्वस्वरूपसमुज्जीवनहेतुभूतसपरिकरभगवद्दास्यात्मकपरमधर्मरूपसकलशास्त्रतात्पर्यगोचरालौकिकप्रमेयविषये धर्मज्ञसमय एव प्रबलं प्रमाणमिति सिद्धम् ॥

श्रीवरवरमुनिचरणौ तरुणसरोजातमृदुलरमणीयौ ।
अपि मम शिरस्यकस्मात्करुणापरिणामदापितौ कलये ॥

Colophon :

इति श्रीवाधूलकुलतिलकश्रीमन्महार्यचरणयुगलभावितेन श्रीनिवासदासेन विरचिता धर्मज्ञसमयप्रामाण्यप्रकाशिका समाप्ता ॥

Foll. 17 and 18 contain miscellaneous passages.

R. No. 130.

Palm-leaf. 17⅛ × 1⅜ inches. Foll. 56. Lines, 8 in a page. Grantha. Slightly injured

Purchased in 1910-11 from Gōpālasāmi Ayyangār of Mannargudi.

सिद्धान्तसिद्धाञ्जनम्.

SIDDHĀNTASIDDHAÑJANAM.

Same work as the one described under No. 5069 of the D.C.S. MSS., Vol. X.

Contains Paricchēdas one to three complete and four almost complete.

R. No. **131.**

Palm-leaf. 14¼ × 1⅛ inches. Foll 16. Lines, 6 in a page. Grantha. Good.

Purchased in 191 -11 from Mīnākṣiyammal of Koḍuvāyūr.

वाञ्छाकल्पलता.

VĀNCHĀKALPALATĀ.

Foll. 1*a*—5*b*. The rest are blank.

A Mantra addressed mainly to Rudra with the object of securing the favour of Mahātripurasundarī. The repetition of the Mantra is intended to enable one to accomplish the desired objects.

Contains Paryāyas one to four complete.

Beginning:

अस्य श्रीवाञ्छाकल्पलताया आनन्दभैरवगणकानङ्गवसिष्ठकाश्यपविश्वामित्रसंवर्ता नाम ऋषयः, देवीगायत्रीनिचृद्गायत्रीत्रिष्टुप्जगतीपङ्क्तयश्छन्दांसि श्रीमहात्रिपुरसुन्दरीमहागणपती(ति)विद्यागणपती(ति)संवादाग्न्यमृतरुद्रा देवताः, ओं बीजं, ऐं शक्तिः, श्रीं कीलकं, श्रीमहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे वाञ्छितपुरुषार्थसिद्ध्यर्थे वाञ्छाकल्पलताजपे विनियोगः ।

End:

ओं ह्रीं वं ठं अमृतरुद्राय . वशमानय स्वाहा । दम(य)न्तीनलाभ्यां . संवादाग्ने प्रसीद मे ॥

इति चतुर्थः पर्यायः ॥

Fol. 5*b* contains also some prayers for the protection of the magician while invoking the deities

R. No. **132.**

Śrītāla. 13⅜ × 2⅛ inches. Foll 263. Lines, 9 in a page. Grantha. Good.

Purchased in 1910-11 from S. Rāmakrsnavādyār of Palghat.

(*a*) अनर्घराघवव्याख्यानम्—विक्रमीयम्.

ANARGHARĀGHAVAVYĀKHYĀNAM: VIKRAMĪYAM

Foll. 1*a*—192*a*.

This is a commentary on the Anargharāghava of Murāri: by Mānavikrama, a disciple of Karuṇākara, Pankajākṣa and Rama. The author seems to have lived in Calicut

Contains one to five Ankas complete and the sixth incomplete

Beginning:

वन्दे चन्द्रकलापीडं सर्वज्ञं सर्वभूतये ।
गौरीसहितवामाङ्कं ज्ञानरूपं कृपानिधिम् ॥
कुक्कटक्रोडगा लक्ष्मीरक्ष्य . . . . . ।
. . . . वासिन्यै तस्यै देव्यै नमो नमः ॥
वेदवाक्यप्रमाणेषु प्रवीणैर्ब्राह्मणोत्तमैः ।
प्रत्यब्दं सेव्यमानं तं स्थलीश्वरमुपास्महे ॥
देदीपीतु ममोपान्ते देवदानवपूजितम् ।
अन्तरायविघाताय दन्तावलमुखं महः ॥

* * *

करुणाकरसंज्ञांस्तान् पङ्कजाक्षाख्ययान्वितान् ।
रामाभिधांश्च वन्देऽहं गुरूनेतान् महामतीन् ॥
अनर्घराघवस्यास्य व्याख्यानं कर्तुमारभे ।
अनुगृह्णन्तु मामुच्चैर्विद्वांसो विमलाशयाः ॥

इह खलु स कविः 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्युक्तत्वात् नान्दीरूपेणेष्टदेवतां श्लोकद्वयेन नमस्करोति—निष्प्रत्यूह- मिति । भगवतः लोचने निष्प्रत्यूहं प्रत्यूहाभावायोपास्महे इति क्रिया- कारकसंबन्धः । निष्प्रत्यूहमित्यत्रार्थाभावेऽव्ययीभावः । 'नाव्ययीभावा-

दतोऽम् त्वपञ्चम्याः’ इति चतुर्थीविभक्तेर्लुम भवति । अमादेशस्तु भवति । ‘विघ्नोऽन्तरायः प्रत्यूहः’ इत्यमरः । कीदृशस्य भगवतः? तत्राह— कौमोदकीलक्ष्मणः ।

* * * *

Colophon:

इति श्रीमानविक्रमविरचितायां विक्रमीयाख्यायामनर्घराघवव्याख्यायां पञ्चमोऽङ्कः ॥

ततः प्रविशति माल्यवान् । सर्वतोऽवलोक्य सखेदं, लङ्कायाः तादृशदुर्दशादर्शनात् खेदः । सुग्रीवप्रेषितेन हनूमता कृतं लङ्कापुरदहनादिकं परिभवं दृष्ट्वा विषीदन्नाः —अहह कष्टं दग्धा इति ।

End:

विश्वामित्रसकाशादधीतान् पठितान् दिव्यास्त्रमन्त्रान् दिव्यास्त्रमन्त्रप्रयोगक्षममनुभेदान् । ध्यायति उपास्ते । असौ राक्षसेन्द्रो रावणः । इह युद्धे । ब्रह्मोपदिष्टां ब्रह्मणा परमेष्ठिनोपदिष्टामनुग्रहेण दत्तामस्त्रविद्यां समभ्यस्यति वशीकरोति । दिव्यास्त्राणि ध्यानमात्रेणैवोपतिष्ठन्ते, रावणा-(णस्य त्व)भ्यासेनेति भेदः ॥

Fol. 192*b* is blank.

Fol. 193*a* contains an index of a few stanzas in the first Act.

Foll 193*b* and 194 are blank

(*b*) अनर्घराघवम्.

ANARGHARĀGHAVAM

Foll. 195*a*—263*b*.

A well-known drama based on the story of the Rāmāyaṇa : by Murāri

Complete.

Beginning:

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः
कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ।
याभ्यामर्धविबोधमुग्धमधुरश्रीरर्धनिद्रायितो
नाभीपल्वलपुण्डरीकमुकुलः कम्बोः सपत्नीकृत॥

End:

तथापीदमस्तु—

समुन्मीलत्सूक्तिस्तबकमकरन्दैः श्रवणयो-
रविश्राम्यद्धारां सततमुपचिन्वन्तु कवयः।
न शब्दब्रह्माख्यं परिमलमनाघ्राय च जनाः
कवीनां गम्भीरे वचसि गुणदोषौ रचयतु ॥

अपि च—

देवस्यात्मभुवः कमण्डलुजलस्रोतांसि मन्दाकिनी-
गङ्गाभोगवतीमयानि पुनते यावत् त्रिलोकीमिमाम्।
तावद्वीरयशोरसायनमधुस्यन्दः कवीनामयं
जागर्तु श्रुतिशष्कुलीवलयितव्योमावगाही पुनः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

मुरारिः समाप्तः ॥

R. No. **133.**

Śrītāla 10¾ × 2 inches. Foll 50 Lines, 11 in a page Kanarese. Injured.

Purchased in 1910-11 from K Rāmasvāmi Ayyangar of Magadi, Mysore province.

(*a*) **कर्णाटकव्याकरणम्.**

KARṆĀṬAKAVYĀKARAṆAM.

Foll. 1*a*—18*b*

A treatise in Kanarese grammar by Nāgavarma.

Complete in ten Paricchēdas.

As the first leaf is very much injured, the extract given here is from the second leaf.

Beginning:

वर्णानां परस्परमन्योन्यं संनिकर्षः संश्लेषः सन्धिरुच्यते।

Colophon:

इति कर्णाटकव्याकरणे संज्ञाविधानं नाम प्रथमः परिच्छेदः ॥

सन्धौ । सन्धावित्ययमधिकारः । इत ऊर्ध्वं यत् विवक्ष्यते तत् पुनः सन्धौ भवत्यवगन्तव्यम् । स्वरे स्वरस्य लोपः । स्वरे परत्रावस्थिते पूर्वस्थितस्य स्वरस्य लोपो भवति । प्रयोग ।

End:

अय्यो अन्यायम् । स एवानुकम्पायाम् । स एव अय्योशब्दः अनुकम्पायां वर्तते निपातः ।

* * * *

कर्णाटक(स्य) शब्द(स्य) सूत्रा(णां) वृत्तिहेतवे ।
रचितानि स्फुटार्थानि कृतानि(तिना) नागवर्मणा ॥

Colophon:

इति कर्णाटकव्याकरणे निपातप्रकरणं नाम दशमः परिच्छेदः ॥

(*b*) ಶಬ್ದಮಣಿದರ್ಪಣ.

ŚABDAMAṆIDARPANA.

Foll. 19*a*—31*b*.

(*c*) ನಾಗವರ್ಮಛಂದಸ್.

NĀGAVARMACHANDAS

Foll 35*a*—39*a*. Fol. 39*b* is left blank

(*d*) ರತ್ನಪರೀಕ್ಷಾ.

RATNAPARĪKṢĀ.

Foll. 40*a*—50*b*. See the Telugu part of the Triennial Catalogue

R. No. **134.**

Śrītāla. 14¼ × 1¾ inches Foll 54. Lines, 8 in a page. Grantha. Good.

Purchased in 1910-11 from S. Rāmakṛṣṇavādyār of Palghat.

सामवेदगानम्—रहस्यम्.

SĀMAVĒDAGĀNAM : RAHASYAM.

Same work as the one described under No. 53 of the D.C.S. MSS., Vol. I, Part II.

Complete.

Foll. 52—54 give an index of the Sāmans of Rahasya.

R. No. 135.

Palm-leaf. 16 × 1½ inches. Foll. 23 Lines, 8 in a page. Grantha. Good

Purchased in 1910-11 from R Anantakṛṣṇa Śāstri of Harinayakapuram, Tinnevelly district

राघवयादवीयम्——सव्याख्यानम्.
RĀGHAVAYĀDAVĪYAM WITH COMMENTARY.

Foll. 1*a*—19*b*.

This is a poem on the stories of Rāma and of Kṛṣṇa. by Vēṅkaṭācārya of Ātrēyagōtra and son of Raghunāthācarya who is the son of Śrīnivāsācārya. The author lived at Conjeevaram. He very properly adds a commentary to the work which is otherwise unintelligible They refer to the story of Rāma when they are read as they are, and relates the story of Kṛṣṇa when read in the reverse order.

Incomplete. Contains only the first part.

Beginning:

किंचित् संचिन्तयो(ये) गोपीकिलिकिञ्चितवञ्चितम् ।
अञ्चितं ज्योतिरप(म)रैरञ्जनाद्रावुदाञ्चितम् ॥

भद्रोल्लासं भास्करापत्यवाहि-
न्यन्तर्दीव्यन्नस्तवैर्युग्रबाणः ।
नाथोऽहल्यानन्दहेतुः प्रदत्तां
राजीवाक्षो राघवो यादवो वा ॥

अनुवर्णितरामकृष्णवृत्तेरनुलोमप्रतिलोमवाचनाभ्याम् ।
कृतिमुल्लसितां विधाय पद्यैर्विवृणोति स्वयमेव वेङ्कटार्यः ॥

अनुलोमेन रामकथाप्रतिपादकैः प्रतिलोमेन पाठे कृष्णकथाप्रतिपादकैः पद्यैः परिष्कृतं राघवयादवीयाख्यमतिदुष्करं प्रबन्धमारभमाणः प्रारिप्सितप्रबन्धप्रत्यूहप्रशमनार्थमानुलोम्यप्रातिलोम्यपाठाभ्यां प्रबन्धविषयरामकृष्णवन्दनप्रतिपादकमङ्गलश्लोकमारचयति——वन्देऽहमिति ।

वन्देऽहं देवं तं श्रीतं रन्तारं कालं भासा यः ।
रामो रामाधीराप्यागो लीलामारायोध्ये वासे ॥

पदम्—वन्दे । अहम् । देवम् । तम् । श्रीतम् । रन्तारम् । कालम् । भासा । यः । रामः । रामाधीः । आप्यागः । लीलाम् । आर । आयोध्ये । वासे । रामाधीः रामायां सीतायां धीः बुद्धिः यस्य सः तथोक्तः सन् आप्यागः आप्तुं योग्याः आप्याः अगाः सह्यमलयादिपर्वताः यस्य स तथोक्तः सीतायां मनः प्रणिधाय सह्यादिपर्वतान् प्राप्तवानित्यर्थः ।

* * * *

अयमेव श्लोकः इत्थं प्रातिलोम्येन पठ्यते—

सेवाध्येयो रामालाली गोप्याराधी मारामोराः ।
यः साभालंकारं तारं तं श्रीतं वन्देऽहं देवम् ॥

पदम्—सेवाध्येयः । रामालाली । गोप्याराधी । मारामोराः । यः । साभालङ्कारम् । तारम् । तम् । श्रीतम् । वन्दे । अहम् । देवम् । मारामोराः माया लक्ष्म्याः आरामभूतं भोग्यस्थानभूतम् उरो वक्षो यस्य स तथोक्तः । 'उरःप्रभृतिभ्यः कप्' इति कप्प्रत्ययस्तु समासान्तत्वादनित्य एव । 'समस्तलोकविजयश्रीपूर्यमाणोरसम्' इति मुरारिप्रयागः ।

End :

प्रतिलोमपाठस्तु यातसीति ।

यातसी तदिताभाभागसंसारनरो न न ।
मोदिमानसया देव्या ह्यामरागमधामराः ॥

या । अतसी । तदिताभाभाक् । असंसारनरः । न । न । मोदिमानसया । देव्या । हि । आमरागमधामराः । या अतसी यदतसीकुसुमं तदिताभाभाक् तदिता प्राप्ता (आ)भा दीप्तिः तां भजतीति तथोक्तः; अतसीकुसुमगतदीप्तिशालीत्यर्थः । असंसारनरः संसाररहितपुरुषः श्रीकृष्णः। मोदिमानसया आनन्दयुक्तचित्तया देव्या सत्यभामया सह आमरागमधामराः अमराणां देवानां संबन्धी आमरः अगमः वृक्षः तस्मात् धाम

जन्म यस्य सः आमरागमधामा पारिजातजन्यः राः स्वर्णं यस्य सः तथोक्तः अभूदिति शेषः । हिशब्दः प्रसिद्धिद्योतकः । 'धामजन्मप्रभा-स्थानप्रभावसुखसद्मसु' इति रत्नमाला ।

महीसुतासुहृत्त्वेन ख्यातौ सत्यानुसारिणौ ।
दीप्येतां हृदये नित्यं देवौ यादवराघवौ ॥

Colophon:

इति श्रीमद्वाजपेयसर्वपृ[ति]ष्ठाप्तोर्यामादियाजि श्रीनिवासाचार्यनन्दन-रघुनाथाचार्यदीक्षिततनयस्य श्रीमत्काञ्चीनगरवसतेरात्रेयवेङ्कटाचार्ययज्वनः कृतिषु राघवयादवीयचरिताख्ये दुष्करकाव्ये प्रथमभागः ॥

Foll 20—23 contain a part of the same work over again.

R. No. **136.**

Palm-leaf. 16⅝ × 1⅜ inches. Foll. 110 Lines, 7 in a page. Grantha. Much injured.

Purchased in 1910-11 from Gōpālasami Ayyaṅgār of Mannargudi.

रहस्यत्रयसारार्थरत्नम्.

RAHASYATRAYASĀRĀRTHARATNAM.

A lecture on the contents of the Rahasyatrayasāra of Vēdantadēśika. It is a work in 32 chapters on Prapatti or self-surrender to God as a means of attaining salvation, and is written in Maṇipravāla (i.e., Tamil and Sanskrit combined).

Incomplete.

Beginning:

(प्रणिपत्य गया)म्नायमकुटीयुगलीगुरू ।
रहस्यत्रयसारार्थरत्नकोशो विधीयते ॥
प्रतितज्ञा(ज्ञाता)र्थसर्वस्वमधिकारेषु सर्वशः ।
संगृह्यते यथासारं . . . . नुसारतः ॥

तत्रोपोद्घाताधिकारे ருபகவேயான லரின்‌ஸ்வாகு इत्यादि । मणिवर इति श्लोकस्थशौरिशब्दोऽत्र व्याख्यातः । एतेन भगवन्नामसु

स . . . : . . पि तत्स्वरूपनिरूपकधर्मभूतश्रीविशिष्टभगवद्भिधायकत्वं सर्वेश्वरत्वं विशिष्टनिष्ठमित्युभयमपि स्वाभिमतं प्रधानप्रतितन्त्रमिति सूचितम् ।

End :

स्वाभाविकपरमकारुण्याधीनमित्येवं निरूपणेन निपुणानां शरण्यस्योपायान्तरस्थानोपनयप्रवाद इत्येवं शरण्यस्योपायान्तरस्थाननिवेशोक्तेरौपचारिकत्वेन निर्वाहस्य दर्शितत्वात् । प्रपत्तेर्मुक्तिस्थाने विधानं तु न क्वचिदपि क्लिष्टगत्या ।

R. No. **137.**

Śrītāla 26¾ × 2¼ inches. Foll. 137. Lines, 12 in a page. Kanarese. Good.

Purchased in 1910–11 from K. Rāmasvāmi Ayyaṅgār of Magadi, Mysore province.

Fol 1 contains the names of various mountains, towns, rivers, etc., referred to in Jaina religious works.

(*a*) पार्श्वनाथाष्टकम्—सव्याख्यानम्.

PĀRŚVANĀTHĀṢṬAKAM WITH COMMENTARY.

Fol. 2.

Eighteen stanzas full of alliterative rhyming syllables in praise of Pārśvanātha, one of the Tīrthankaras of the Jainas.

Complete.

Beginning :

लक्ष्मीर्महस्तुल्य सती सती सती प्रवृद्धकालो विरतोरतोरतोऽ ॥
जरा रुजापन्महता हताहता पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥

हे मित्र पार्श्वं पार्श्वजिनेश्वरं फण गच्छ यात्रां कुरु । इ इति संबोधने । क ? रामगिरौ गिरौ रामगिरिनाम्नि पर्वते । किंभूतस्त(स्त्व)म्-गिरा नाम्ना उपलक्षितः । ओ निश्चये, अव्ययपदमेतत् । एतावति कृते किं किं स्यात् ?—जरा रुजा आपत् त्वया हता । किंभूतेन ?— महता । किंभूता जरा रुजा आपत् ? (अहता) पूर्वमविनाशिता । किंभूतः ?–प्रवृद्धकालः प्रवृद्धे(के)सुखे आल उद्यमो यस्य स (प्र)वृद्धकालः ; अथवा—प्रवृद्धः कालो वयो

लक्षणो यस्य सः वृद्ध इत्यर्थः । पुनः किंभूतः ?— विरतः सर्वविरतः। अरतोरतः अरतं ब्रह्मचर्यं तस्य ऊ रक्षा तद्रतः । (अ इति संबोधने)। हे मित्र लक्ष्मीः सति पुरुषे सती उत्तमा भवति । हे महस्तुत्य उत्सववर्णनीय। किंभूता लक्ष्मीः ?—सती स्वरूपिणी । इ इति संबोधने । तस्मात् लक्ष्म्या वाचश्च फलं जिघृक्षुः श्रीपार्श्वयात्रां कुर्वित्यर्थः।

End :

ययाज नित्यं सकलाकलाकलाममारतृष्णोऽव्रजिनो जिनो जिनो।
सहारपूज्यं वृषभासभासभा पार्श्वे फणे रामगिरौ गिरौ गिरौ ॥

पार्श्वे फण। किं भूतम् ?—सहारपूज्यं सह हारैर्वर्तन्ते ये ते सहाराः श्रीमरितो(न्तो) देवनरदेवादयः, तैः पूज्यम् । हे वृषभासभासभ वृषेण अनडुहा भासते वृषभासः रुद्रः तद्वत् (भासा) देदीप्यमाना भा कान्तिर्यस्य हे वृषभासभासभ। (आ) अतिशयेन। उत्तरार्धं गतम्। यो भगवान् नित्यं रराज। किंभूतः ? – अमारतृष्णः निष्कामः । पुनः किंभूतः पार्श्वः ?— सकलाकलाकलां सकलः सत्प्रभावः, अकलः रागद्वेषादिकलारहितः, अकं दुःखं कुष्ठादिप्रभवं लान्तीति अकलाः तान् आमयति, अम द्रम आर्द्रीभावे, आत्मपार्श्वे गमयति यः; इन्न(ण्य)न्तात् क्विप्। सकलाकलश्चासौ अकलांश्चेत्यादिः कर्मधारयः । पुनः किंभूतः ?—अव्रजिनः निष्पापः। किंभूतः ? जिनः तीर्थंकरः। पुनः किंविशिष्टः ? जिनो जिनं कृष्णमपि अवति रक्षतीति ; सैन्यमारकं श्रीशंकेश्वरपार्श्वस्नपनजलाभिषेकेण न्यषेधत् प्रतिषेधयति स्म । ततश्च जिनः कृष्णो जयश्रीधानात् पार्श्वेण ररक्षे ॥

(*b*) महापुराणसंग्रहः.

MAHĀPURĀṆASAṄGRAHAH.

Foll. 3*a*—133*b*.

This is also called Uttarapurāna and is intended as a supplement to the Mahāpurāṇa of Jinasēna. In another MS. of this library this work contains Parvans 1 to 76, of which 1 to 42 are attributed to Jinasēna and 43 to 76 to Guṇabhadra.

It will be seen from the extracts that Amōghavarsa held Jinasēna, son of Vīrasēna and author of the Mahāpurāṇa, in high esteem, that Guṇabhadrācārya was the pupil of Jinasēna and his mate Dasarathaguru and that Gunabhadrācārya summarized what was left untold by Jinasēna. His pupi Lōkasēna is said to have consecrated this Purāṇa on Thursday, the 5th lunar day in the month of Mithuna of the year Piṅgala of Śaka 820, during the reign of Akālavarsa and that of his feudatory, Lōkaditya of the Cēllapatāka dynasty, then ruling the Vanavāsa country at Vaṅkāpura.

This MS. contains only Parvans 48—76

Beginning:

श्रीमान् जिनोऽजितो जीयात् यद्वचांस्यमलान्यलम् ।
क्षालयन्ति जलानीव विनेयानां मनोमलम् ॥
पुराणं तस्य वक्ष्येऽहं मोक्षलक्ष्मीसमागमः ।

* * * *

इह जम्बूमति द्वीपे विदेहे प्राचि विश्रुते ।
सीतासरिदवाग्भागे वत्साख्यो विषयो महान् ॥
सुसीमा नगरं तस्मिन् विभूत्या विस्मयावहम् ।
नाम्नास्य नृपतिः प्राभूत्प्रभुर्विमलवाहनः ॥

* * *

स जयति जयसेनो यो जितारातिसेनः
श्रुतयतिमहदादिर्यो बलः प्राक्तकल्पे ।
सगरसकलचक्री यो जिनो यश्च यश्च
प्रहतचरमदेहो देहमात्रात्मदेहः ॥

Colophon:

इत्यार्षे त्रिषष्टिलक्षणमहापुराणसंग्रहे भगवद्गुणभद्राचार्यप्रणीते अजिततीर्थकरसगरचक्रवर्तिपुराणं परिसमाप्तमष्टचत्वारिंशत्तमं पर्व ॥

End:

इति कतिपयवाग्भिर्वर्धमानं जिनेन्द्रं
मगधपतिरुदीर्णश्रद्धया सिद्धकृत्यः ।

गणधृतमपि मत्वा गौतमं धर्मधुर्यः
स्वपुरमविशदुद्यत्तुष्टिरागामिग्निद्धिः ॥
अनुष्टप्छन्दसा ज्ञेया ग्रन्थसंख्यास्य विंशतिः ।
सहस्राणां पुराणस्य व्याख्यातृश्रोतृलेखकैः ॥

Colophon :

इत्यार्षे त्रिषष्टिलक्षणमहापुराणसंग्रहे भगवद्गुणभद्राचार्यप्रणीते श्रीवर्धमानपुराणं समाप्तं षट्सप्ततितमं पर्व ॥

श्रीमूलसंघवाराशौ मणीनामिव सार्चिषाम् ।
महापुरुषरत्नानां स्थानं सेनान्वयोऽजनि ॥
तत्र वित्रासिताशेषप्रवादिमदवारणः ।
वीरसेनाग्रणीर्वीरसेनभट्टारको बभौ ॥

अभवदिव हिमाद्रेर्देवसिन्धुप्रवाहो
ध्वनिरिव सकलज्ञात् सर्वशास्त्रैकमुक्तिः ।
उदयगिरितटाद्वा भास्करो भासमानो
मुनिरनुजिनसेनो वीरसेनादमुष्मात् ॥
यस्य प्रांशुनखांशुजालविसरद्धारान्तराविर्भवत्पादाम्भोजरजःपिशङ्गमकुटप्रत्यग्ररत्नद्युतिः ।
संस्मर्ता स्वममोघवर्षनृपतिः पूतोऽहमद्येत्यलं
(स) श्रीमान् जिनसेनपूज्यभगवत्पादो जगन्मङ्गलम् ॥

दशरथगुरुरासीत् तस्य धीमान् सधर्मा
शशिन इव दिनेशो विश्वलोकैकचक्षुः ।
निखिलमिव(मत)मदीपि व्यापितद्वाङ्मयूखैः
प्रकटितनिजभावं निर्मलैर्धर्मसारैः ॥

प्रत्यक्षीकृतलक्ष्यलक्षणविधिर्विश्वोपविद्यान्तगः
सिद्धान्ताऽध्यवसानयानजनितप्रागल्भ्यवृद्धीद्धधीः ।
नानानूननयप्रमाणनिपुणोऽगण्यैर्गुणैर्भूषितः
शिष्यः श्रीगुणभद्रसूरिरनयोरासीज्जगद्विश्रुतः ॥

* * * *

कविपरमेश्वरनिगदितगद्यकथामातृकं पुरोश्चरितम् ।
सकलच्छन्दोऽलंकृतिलक्ष्यं सूक्ष्मार्थगूढपदरचनम् ॥
जिनसेनभगवतोक्तं मिथ्याकविदर्पदलनमतिलीलितम् ॥
सिद्धान्तोपनिबन्धनकर्त्रा भर्त्राचिराद्विनायासात् ॥
अतिविस्तरभीरुत्वादवशिष्टं संगृहीतममलधिया ।
गुणभद्रसूरिणेदं प्रहीणकालानुरोधेन ॥

* * * *

विदितसकलशास्त्रो लोकसेनो मुनीशः
कविरविकलवृत्तस्तस्य शिष्येषु मुख्यः ।
सततमिह पुराणे प्राप्य साहाय्यमुच्चैः
गुरुविनयमनैषीन्मान्यतां स्वस्य सद्भिः ॥

* * * *

अकालवर्षभूपाले पालयत्यखिलामिलाम् ।
तस्मिन् विध्वस्तनिःशेषद्विषि वीध्रयशोजुषि ॥
पद्मालयमुकुलकुलप्रकाशविकसत्प्रतापततमहासि ।
श्रीमति लोकादित्ये प्रध्वस्तप्रथितशत्रुसंतमसे ॥
चेल्लपताके चेल्लध्वजे(जा)नुजे चेल्लकेतनतनूजे ।
जैनेन्द्रधर्मवृद्धिविधायिनि विधुवीध्रपृथुयशसि ॥
वनवासदेशमखिलं भुञ्जति निष्कण्टकं सुखं सुचिरम् ।
तत्पितृनिजनामकृते (ख्याते) वङ्कापुरे पुरष्वधिके ॥

शकनृपकालाभ्यन्तरविंशत्यधिकाष्टशतमिताब्दान्ते ।
मङ्गलमहार्थकारिणि पिङ्गलनाम(नि)समस्तजनसुखदे ॥
श्रीपञ्चम्याम्बुदा(धा)र्द्रायुजि दिवसकरे मन्त्रिवारे बुधांशे (हिमांशौ)
पूर्वायां सिंहलग्ने धनुषि धरणिजे वृश्चिकार्कौ तुलायाम् ।
सर्पे शुक्रे कुलीरे गवि च सुरगुरौ निष्ठितं भव्यवर्यैः
प्राप्ति(प्ते)ज्यं सर्वसारं जगति विजयते पुण्यमेतत्पुराणम् ॥
यावद्धराजलनिधिर्गगनं हिमांशुस्तिग्मद्युतिः सुरगिरिः ककुभां विभागाः।
तावत् सतां[च] वचसि चेतसि पूतमेतत् स्रोतस्वतीस्थितिमुपैतु महा-
[पुराणम् ॥

श्रीजिनशासनजलधौ द्वीपायितकौण्डकुन्दना[मा]म्ना यः ।
रत्नानामिव राशिर्जज्ञे श्रीचन्द्रनन्दिसिद्धान्तगुरुः ॥
तस्य शिष्यो विदामासीत्पूजनीयोऽर्हनन्दिवाक् ।
तपोराशिर्गुणाधारो लोकज्ञत्वकुलालयः ॥

* * * *

कपु(ङ्ग)गेन्द्राख्यगणस्य नेता भूपालधीपालचरित्रपालैः ।
समर्चनीयः सकलागमज्ञः श्रीपालवाचंयमपो बभूव ॥

* * * *

तेनाकुमारं प्रतिवर्ध(र्ध्य)मानः
श्रीवीरनन्द्याख्यमुनेः सधर्मा ।
नामा(म्ना)र्हनन्दी गुणवान् महात्मा
सदा स देवव्रत उद्बभूव ॥

* * * *

महापुराणं गुरु(ण)भद्रदेवप्रणीतमेतज्जयवर्मनाम्ना ।
सदार्हनन्दी स ददौ विलिख्य श्रीवीरनन्दिप्रभवे मुनीशे ॥

Fol. 134*a* contains a few passages from some grammatical work. Fol. 134*b* is blank. Foll. 135 and 136 contain some information about Tīrthaṅkaras, and fol. 137 gives some Cāṭuślōkas.

The following list gives the titles of the various Parvans of this work :—

1. कथामुखव्यावर्णनम्.
2. कथोपोद्घातवर्णनम्.
3. पुराणपीठिकावर्णनम्.
4. महाबलाभ्युदयवर्णनम.
5. ललिताङ्गस्वर्गभोगवर्णनम्.
6. ललिताङ्गस्वर्गच्यवनवर्णनम्.
7. श्रीमतीवज्रजङ्घसमागमवर्णनम्.
8. श्रीमतीवज्रजङ्घपात्रदानानुवर्णनम्.
9. श्रीमतीवज्रजङ्घसम्यग्दर्शनोत्पत्तिवर्णनम्.
10. श्रीमदच्युतेन्द्रैश्वर्यवर्णनम्.
11. भगवद्वज्रनाभिसर्वार्थसिद्धिगमनवर्णनम्
12. भगवत्स्वर्गावतरणवर्णनम्.
13 भगवज्जन्माभिषेकवर्णनम्.
14. भगवज्जातकर्मोत्सववर्णनम्.
15. भरतोत्पत्तिवर्णनम्.
16 भगवत्साम्राज्यभोगवर्णनम्.
17. भगवत्परिनिष्क्रमणवर्णनम्.
18. धरणेन्द्रविजयार्थोपगमनम्.
19. नमिविनमिराज्यप्रतिष्ठापनवर्णनम्.
20. तीर्थकरानुभवः.
21. ध्यानतत्त्वानुवर्णनम्.
22. भगवत्समवसरणविनिवेशवर्णनम्.
23 भगवत्समवसरणवर्णनम्.

24. भगवद्धर्मोपदेशवर्णनम्.
25. भगवत्तीर्थविहारवर्णनम्.
26. भरतराजदिग्विजयोद्योगवर्णनम्.
27. भरतराजविजयप्रयाणवर्णनम्.
28. पूर्वार्णवद्वारविजयवर्णनम्.
29. दक्षिणा—
30. पश्चिमा—
31. विजयार्थगुहाद्वारवर्णनम्.
32. भरतोत्तरार्धवर्णनम्.
33. भरताधिराजकैलासादिगमनवर्णनम्.
34. भरतराजानुजदीक्षावर्णनम्.
35. कुमारबाहुबलिरणोद्योगवर्णनम्.
36. भरतभुजबलिविजयवर्णनम्.
37. भरतेश्वराभ्युदयवर्णनम्.
38. द्विजोत्पत्तौ गर्भान्वयक्रियावर्णनम्.
39. दीक्षान्वयकर्त्रन्वयक्रियावर्णनम्·
40. द्विजोत्पत्तौ क्रियामन्त्रानुवर्णनम्.
41. भरतराजस्वप्नसंदर्शनतत्फलोपवर्णनम्.
42. भरतराजवर्णाश्रमस्थितिपालनम्.
43. (गुणभद्राचार्यकृत) सुलोचनास्वयंवरमालावर्णनम्.
44. जयविजयः.
45. जयसुलोचनासुखानुभववर्णनम्.
46. जयसुलोचनाभवान्तरवर्णनम्.
47 वृषभतीर्थंकरभरतचक्रवर्तिपुराणम्.
48. अजिततीर्थंकरसगरचक्रवर्तिसमागमः.
49. शंभवतीर्थंकरपुराणम्.

50. अभिनन्दनस्वामिपुराणम्.
51. सुमतितीर्थंकरपुराणम्.
52. पद्मप्रभार्हत्पुराणम्.
53. सुपार्श्वस्वामिपुराणम्.
54. चन्द्रप्रभपुराणम्.
55. पुष्पदन्तपुराणावसितिः.
56. शीतलपुराणम्.
57. श्रेयस्तीर्थत्रिपृष्ठविजयाश्वग्रीवपुराणम्.
58. वासुपूज्यजिनपतिद्विपृष्ठाचलतारकापुराणम्.
59 विमलतीर्थंकरधर्मस्वयंभुमधुसंजयन्तमेरुमन्दरपुराणम्.
60. अनन्तजित्तीर्थंकरसुप्रभपुरुषोत्तममधुसूदनपुराणम्.
61. धर्मतीर्थंकरसुदर्शनपुरुषसिंहमधुक्रीडमघवसनत्कुमारपुराणम्.
62. अपराजितानन्तवीर्याभ्युदयवर्णनम्.
63. शान्तिचक्रधरतीर्थंकरपुराणम्.
64. कुन्थुचक्रधरतीर्थंकरपुराणम्.
65. तीर्थधरचक्रधरारसुभौमचक्रवर्तिनन्दिषेणबलदेवपुण्डरीकार्धचक्र-वर्तिनिशुम्भनामप्रतिशत्रुपुराणम्.
66. मल्लितीर्थंकरपद्मचक्रधरनन्दिमित्रबलदेवनामवासुदेवबलीन्द्राख्य-प्रतिवासुदेवपुराणम्.
67. दुर्मार्गप्रवर्तनप्रपञ्चव्यावर्णनम्.
68. मुनिसुव्रततीर्थंकरहरिषेणचक्रवर्तिरामबलदेवलक्ष्मीधरकेशवसीता-रावणपुराणम्.
69. नमितीर्थंकरजयसेनचक्रवर्तिपुराणम्.
70. नेमिस्वामिचरिते कृष्णविजयः.
71. नेमिस्वामिचरिते भवान्तरवर्णनम्.

72. नेमितीर्थंकरपद्मनाभबलदेवकृष्णनामार्धचक्रिजरासन्धप्रतिवासुदेवब्रह्मदत्तसकलचक्रवर्तिपुराणम्.

73. पार्श्वतीर्थंकरपुराणम्.

74. अन्त्यतीर्थंकरश्रोणिकाभयकुमारचरितवर्णनम्.

75. चन्दनार्यिकाजीवन्धरचरितम्.

76. श्रीवर्धमानपुराणम्.

R. No. **138.**

Palm-leaf. 19 × 1½ inches. Foll. 125 Lines, 9 in a page. Grantha. Good; only one leaf viz, fol 60, is injured at one end.

Purchased in 1910-11 from Rāmakrsnavādyār of Palghat.

सिद्धान्तकौमुदीव्याख्या—विलासः.

SIDDHĀNTAKAUMUDĪVYĀKHYA · VILĀSAḤ

Same work as the one described under No. 1446 of the D.C.S. MS., Vol. III.

Contains from Bahuvrīhi to the end of Pūrvārdha.

R. No. **139.**

Śrītāla. 15½ × 2⅛ inches. Foll 31. Lines, 9 in a page Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāl of Koduvāyūr.

(*a*) विवेकसारः.

VIVĒKASĀRAH.

Foll. 1*a*—18*a*.

Same work as the one described under No. 4725 of the D.C.S. MSS., Vol. IX.

Breaks off in the fifth Varṇaka.

Foll. 18*b* and 19 are left blank.

(*b*) मयूरशतकम्—सव्याख्यम्.

MAYŪRAŚATAKAM WITH COMMENTARY.

Foll. 20*a*—31*b*.

A century of stanzas in praise of the Sun-god: by Mayūrakavi. The name of the commentator is not known The work is here incomplete.

Beginning:

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सिक्ता इवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्त्या तुल्यकाला कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥

जम्भेति । एवंभूता भानवीया भानवः वः विभूत्यै भूयासुरिति संबन्धः । कीदृग्भूताः ?—अभिनवाः प्रातःकालीनाः रक्ताः । [कथं]कथमिवेति(व?)जम्भो नाम कश्चिदसुरः, तस्यारातिरिन्द्रः, तस्येभः, ऐरावत इत्यर्थः । तस्य कुम्भो(म्भ)उद्भव उत्पत्तिस्थानं यस्य जम्भारातीभकुम्भोद्भवम् । सान्द्रसिन्दूररेणुः सिन्दूरो नाम गजकुम्भेषु शोभार्थमाधेयः पाटलवर्णो द्रव्यविशेषः ।

End:

आयान्ती किं सुमेरोः सरणिररुणिता पाद्मरागैः परागै-
राहोस्वित् स्वस्य माहारजतविरचिता वैजयन्ती रथस्य ।
गाङ्गिष्ठी प्रष्ठवाहावलिविधूतशिरश्चामराली नु लोकै
राशङ्क्यालोकितैवं सवितुरघनुदे स्तात् प्रभातप्रभा वः ॥

* * * *

सवितुः सूर्यस्य प्रभातप्रभा पूर्वसंध्यायामुत्पन्ना दीप्तिः वः युष्माकम् अघनुदे स्तात् अघं पापं तस्य नुदे पापध्वंसाय ॥

R. No. 140.

Śrītāla. 7 × 1¾ inches Foll. 131 Lines, 9 in a page. Grantha. Good.

Purchased in 1910-11 from Ramakrsnavadvār of Palghat.

Foll. 1—5 are left unwritten.

अभिज्ञानशाकुन्तलव्याख्यानम्——दिङ्मात्रदर्शनम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM. DIN-MĀTRADARŚANAM.

Foll. 6*a*—131*b*.

This is a commentary on the Abhijñānaśākuntala the well-known drama of Kālidāsa: by Abhirāma, a disciple of Rudraguru.

Complete.

Beginning:

हेरम्बस्याङ्घ्रिकमलपरागपटली भृशम् ।
विशदीकुरुतामस्मदन्तःकरणदर्पणम् ॥
उद्भ्रान्तभाष्यामृतवक्त्ररन्ध्रकद्रूजविस्मापनवाग्विलासाः ॥
भद्राणि मह्यं महनीयशीला रुद्राभिधाना गुरवो दिशन्तु ॥

* * * *

अथ कविकुलपरमेश्वरः कालिदासः प्रभुसंमितेभ्यः श्रुतिस्मृतिप्रभृतिभ्यः . . . . नाटकं चिकीर्षुरविघ्नपरिसमाप्त्यर्थं तदारम्भोचितनान्दीद्वारा समुचितेष्टदेवतामनुसंदधाति——या सृष्टिरित्यादिना ।

या तनुः स्रष्टुः आद्या सृष्टिः सृज्यत इति सृष्टिः; या स्रष्टुः प्रथमसृज्यभूतेत्यर्थः । आदिसृज्यत्वमपामसाधारणो धर्मः ।

End:

अत्र महाकविना 'आरम्भे मङ्गलं कुर्यात् समाप्तावपि मङ्गलम्' इति दर्शनानुसारेणारम्भे या सृष्टिरित्यादिना समाप्तावनेन च मङ्गलाचरणं कृतमिति ॥

Colophon:

इत्यभिरामविरचिते अभिज्ञानशाकुन्तल(व्याख्याने)दिङ्मात्रदर्शने सप्तमोऽङ्कः ॥

R. No. **141.**

Palm-leaf. 16½ × 1⅜ inches. Foll. 23. Lines, 6 in a page. Grantha Slightly injured

Purchased in 1910-11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

विषयतावादः.

VIṢAYATĀVĀDAḤ.

Same work as the one described under No. 5000 of the D.C.S MSS., Vol X.

Complete

R. No. **142.**

Śrītāla. 7¼ × 1⅞ inches Foll. 31 Lines, 8 in a page Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāl of Koḍuvāyūr.

(*a*) **मृतसंजविनीमन्त्रः.**

MṚTASAÑJĪVANĪMANTRAḤ.

Fol. 1*a* Fol. 1*b* is blank.

This Mantra is addressed to the Sun-god, and its repetition is considered to be efficacious in counteracting the evil effects of deadly poisons.

Complete.

Beginning and **End** :

वामदेव ऋषिः, अनुष्टुप् छन्दः, पूषा देवता ।
सुवर्भानुर्महाविष्णुः कृष्णवर्णो महाबलः ।
उदरस्थं विषं नश्येदमृतं जायते हृदि ॥

Colophon :

इति मृतसंजीवनी ॥

(*b*) **शङ्करकवचम्.**

ŚAṄKARAKAVACAM.

Foll. 2*a*—7*b*.

This is in praise of Śiva, and its repetition is considered to secure protection to one.

Complete.

Beginning :

ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानामनाधारमविक्रियम् ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रमम् ।
अम्बिकापतिमीशानमनिशं प्रणमाम्यहम् ॥

*

महादेवं महानन्दं देवानामपि दैवतम् ।
शान्तं पवित्रमोङ्कारं ज्योतिषां ज्योतिरुत्तमम् ॥
शंकरो मे शिवः पातु ललाटं फाललोचनः ।
विश्वचक्षुर्दृशौ पातु रुद्रः पातु भ्रुवौ मम ॥

End .

नमो हिरण्यबाह्वादि पठेन्मन्त्रं तु भक्तिमान् ।
सद्योजातादिभिर्मन्त्रैर्नमस्कुर्यात् सदाशिवम् ॥

(c) वेदसारशिवसहस्रनामस्तोत्रम्.
VĒDASĀRAŚIVASAHASRANĀMASTOTRAM.

Foll. 7b—30a.

This occurs as the 89th Adhyāya of the Pādmōttarakhaṇḍa. It gives 1,000 names in praise of Śiva. They are purported to be a choice selection of the names of Śiva contained in the Vēdas.

Complete.

Beginning :

ततः सहस्रनामेदं पठितव्यं मुमुक्षुभिः ।
सर्वकार्यकरं पुण्यं महापातकनाशनम् ॥
सर्वगुह्यतमं दिव्यं सर्वलोकाहितप्रदम् ।
मन्त्राणां परमो मन्त्रो भवदुःखषडूर्मिहृत् ॥
ओं नमः शंभवे चेति षड्भिर्मन्त्रैः षडङ्गन्यासः ।

अस्य श्रीपरमदिव्यवेदसारशिवसहस्रनामस्तोत्रमहामन्त्रस्य श्री-भगवान् नारायण ऋषिः, अनु(ष्टु)प् छन्दः, परमात्मा श्रीमहादेवो देवता।

नमः पराय देवाय शंकराय महात्मने।
कामिने नीलकण्ठाय निर्मलाय कपर्दिने॥

End:

पिशाचस्य विनाशाय जप्तव्यमिदमुत्तमम्।
नाम्नां सहस्रेणानेन समं किंचिन्न विद्यते॥

Colophon:

इति श्रीपाद्मे पुराणे पञ्चपञ्चाशत्सहस्रिकायां संहितायामुत्तरभागे बिल्वकेश्वरश्रीकृष्णमार्कण्डेयव्यासादिसंवादे वेदसारसहस्रनाम एकोन-(न)वतितमोऽध्यायः॥

(*d*) वेदसारशिवसहस्रविशिष्टनामानि.

VĒDASĀRAŚIVASAHASRAVIŚIṢṬANĀMĀNI.

Fol. 30.

Such of the names as are considered to be important are selected from the work described above and given here.

Complete.

Beginning:

अस्मिन् वेदसारशिवनामसहस्रे विशिष्टनामानि लिख्यन्ते — पराय देवाय नमः। निःस्पृहाय स्वरूपिणे नमः। नित्याय यतये नमः।

End:

कारणानां भगवते इति श्लोके कारणानां कारणाय नम इति॥

Colophon:

अर्चनानाम॥

(*e*) ऋणमोचनरुद्रम्.

ṚṆAMŌCANARUDRAM

Fol 31*a*. Fol. 31*b* is left blank.

This Mantra is addressed to Rudra, and its repetition is considered to enable a person to free himself from debts.

Complete.

Beginning and **End**:

आं ह्रीं क्रों ज्ञानिनामपि चेतांसि देवी भगवती हि सा । एह्येहि परमेश्वरि बलादाकृष्य मोहाय महामायां प्रयच्छ[ति] स्वाहा । अरुण ऋषिः, जगती छन्दः, ऋणमोचनरुद्रो देवता । ओं नमो भगवते ऋणमोचन-रुद्राय अस्मिन् ऋणं नाशय नाशय हुं फट् स्वाहा ॥

Colophon:

इति ऋणमोचनरुद्रम् ॥

R. No. **143.**

Palm-leaf. 15⅜ × 1⅝ inches. Foll. 258. Lines, 9 in a page. Grantha. Good.

Purchased in 1910–11 from G. Śrinivāsa Rao of Mysore.

शाब्दिकाचिन्तामणिः.

ŚĀBDIKACINTĀMAṆIH.

Foll. 1*a*—125*a*. The remaining leaves are blank.

This is a commentary on the grammatical Sūtras of Pāṇini's Aṣṭādhyāyī. By Gōpālakṛṣṇa Śāstrin, son of Vaidyanātha of Vatsagōtra and pupil of Rāmabhadrādhvarin.

Wants beginning in the eighth Āhnika of the first Pāda of the I Adhyāya and breaks off in the first Āhnika of the third Pāda of the I Adhyāya.

Beginning:

(ए)वं च सर्वविभक्त्यन्तत्वमभिप्रेतम् । तथापि सर्वविभक्त्यन्तोऽ-ल्शब्दे(ब्द)रूपावयव(वोऽ)स्यास्तीति मत्वर्थीयाजन्तः सर्वविभक्त्यन्तशब्दः इहाश्रीयत इति न दोषः । सर्वविभक्त्यन्तत्वमवयवनिष्ठं समुदाये समास

उपचर्येत इत्यप्याहुः। सर्वशब्दश्चात्र बहुत्वपरः। न ह्यत्र सप्तापि विभक्तयः संभवन्ति।

* * * *

तस्मात् सू(त्र)मेव कर्तव्यम्। यत्तु तेन न सिध्यति तदर्थं ज्ञापकमाश्रयणीयम्। तच्च तुल्यजातीयापेक्षमिति सर्वमनवद्यम्॥

Colophon:

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्वभौमश्रीरामभद्राध्वरिगुरुचरणश्लाघितमतिकुशलस्य गोपालकृष्णशास्त्रिणः कृतौ शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य प्रथमे पादे अष्टममाह्निकम्॥

End:

यद्यपि तत्र वृषोऽपि कश्चित् स्यात्, तथापि मल्लग्रामवत् स्त्रीभिरेव व्यपदेशो भवतीति कैयटः। अग्राम्यादिषु तु मिश्रत्वात् संघस्य पुंस एव शेषसिद्धिः॥

Colophon:

इति शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य द्वितीये पादे तृतीयमाह्निकम्। पादश्च समाप्तः॥

भूवादयो धातवः। भवनं भूः क्रियासामान्यम्। संप(दा)दित्वात् भावे क्विप्। वदन्तीति वादयः वदेरौणादिक इञ्। भुवो वादयो भूवादयः क्रियावाचिन इति यावत्।

* * * *

क्रियावाचिनः गणपठिताश्च ये भूप्रभृतयः शब्दाः तेषामेव धातुसंज्ञेति सूत्रार्थ[:]लाभात् सर्वेष्टसिद्धेः सूत्रमिदमनवद्यम्॥

उपदेशेऽजनुनासिक इत्।

R. No **144.**

Śrītāla. 19×2⅜ inches. Foll. 102. Lines, 13 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) रामायणव्याख्या— सर्वार्थसारः.

RĀMĀYANAVYĀKHYĀ : SARVĀRTHASĀRAḤ.

Foll. 1*a*—77*a*. Fol. 77*b* is blank.

A commentary on the Rāmāyana of Valmiki : by Vênkatêśvara, a disciple of Śivarāma.

Contains Adhyāyas 71 to 75 of Āranyakānda and Adhyāyas 1 to 42 of Kiskındhākanda.

Beginning :

अस्मदो द्वयोश्च इति बहुवचनम् । ततः किमित्यतः शोकेति । अनायासानां स्वयं कार्यसाधने अनीश्वराणाम्, एवं विविधं सर्वत्र धावमानानामस्माकमिति भावः । सदृशमुचितम् । कारुण्यं कर्तुमुपकारेणोपकाराय ; फले हेतौ तृतीया । वर्ततां भवानिति शेषः ।

* * * *

Colophon :

इति श्रीमदारण्यकाण्डे एकसप्ततितमः सर्गः ॥

* * * *

उक्तमर्थमुपसंहरति—तत इति । कृतो दूरदेशे संक्रमो गमनं यत्र सः कृतदूरसंक्रमः । ददर्श क्वचिदुपविश्य सम्यगालोकितवान् ॥

शिवस्य रामस्य गुरोर्महाकवेर्नियोजनानुग्रहणोपदेशनैः ।
तयाशिषारण्यककाण्डमर्थतः समुज्ज्वलं व्याकृत वेङ्कटेश्वरः ॥

Colohon :

श्रीमद्रामायणे श्रीमदारण्यकाण्डव्याख्याने सर्वार्थसाराभिधाने पञ्चसप्ततितमः सर्गः ॥

बलं विष्णोः प्रवर्धतां तादृगाशीरिति ज्ञेयम् ॥

किष्किन्धाकाण्डे काव्याङ्गभूतं शैलनदीवनऋत्वादिवर्णनं प्रस्तौति । विदुषामपि संसारिणामिष्टवियोगनिमित्तं विलापादिकं भगवता विडम्ब्यते । तत्र विवेकिना कार्यं सान्त्वनं साधुदर्शनेऽपि भीतः संदेहं प्राप्नोतीति च कथयति प्रथमे सर्गे ।

End:

रजन्याः क्षये स्वस्योदयगिरिगमनेनावसाने सति वैदेहीमभिगम्य अस्ति नास्तीति वा निश्चित्यैव निवर्तध्वम्। दिष्टं संदिष्टम्। प्रमाणं कर्तव्याकर्तव्यनिश्चायका इत्यर्थः। तथापि एनं प्रमाणं संस्थाप्य व्यवस्थाप्य कृतस्योपकारस्यास्य कार्यस्य रावणवधान्तस्य निपुणं निशम्येति क्रियाविशेषणम्॥

Colophon:

इति श्रीमत्किष्किन्धाकाण्डव्याख्याने सर्वार्थसारे द्विचत्वारिंशः सर्गः॥

त्रिचत्वारिंशे संशयाभासाश्रयोऽपि देशो दिव्यवस्त्वाश्रयतया वचनश्रवणगमनैरदृष्टाधायक इति दर्शयति।

तमतिक्रम्येति। कालपर्वतमित्यर्थः। महागिरिम् अतिदीर्घविशालमित्यर्थः।

(*b*) वाक्यवृत्तिः—वाक्यवृत्तिप्रकाशिकासहिता.

VĀKYAVṚTTIḤ WITH VĀKYAVṚTTIPRAKĀŚIKĀ.

Foll. 78*a*—99*a*. Fol. 99*b* is blank.

Same work as the one described under No 4722 of the D.C.S. MSS, Vol. IX

Complete

(*c*) वेदान्तविषयः.

VĒDĀNTAVIṢAYAḤ.

Foll. 100*a*—102*a*. Fol. 102*b* is left blank.

Seems to be a commentary on a treatise bearing on Advaitavēdānta.

Contains the first Adhyāya only; wants beginning.

Beginning:

संक्षिप्याह—संग्रहेणेति। यस्य शब्दस्योच्चारणे यत् स्फुरति तत् तस्य वाच्यं प्रसिद्धम्। समाहितचित्तस्य चोङ्कारोच्चारणे यद्विषयानुरक्तं

संवेदनं स्फुरति तदोङ्कारमवलम्ब्य तद्वाच्यं ब्रह्मास्मीति ध्यायेत् । तत्राप्य-समर्थ ओंशब्द एव ब्रह्मदृष्टिं कुर्यादित्यर्थः ।

End:

एवं पुरुष इत्यादिना । यावद्यावद्गुणापचयस्तावत्तावत् तारतम्येन सौक्ष्म्यं दृष्टं पृथिव्यादिषु । परमात्मनि तु गुणानामत्यन्ताभावान्निरति-शयसौक्ष्म्यं सिध्यतीत्याह—स्थूलतावदित्यादिना ।

Colohpon:

प्रथमाध्यायः समाप्तः ॥

अनादिरविद्याप्रतिबन्धः प्रागुक्तः । अधुनागन्तुकप्रतिबन्धप्रदर्शना-योक्तः ।

R. No 145.

Palm-leaf. 17⅜ × 1¼ inches. Foll. 22 Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1910–11 from Gōpālasāmi Ayyangār of Mannārgudi.

(*a*) मिथ्यात्वानुमाननिरासः.

MITHYĀTVĀNUMĀNANIRĀSAḤ.

Foll. 1*a*—4*a* Fol. 4*b* is blank

Same work as the one described under R No. 93(*d*) *ante* with difference in the end only

Complete.

End:

. तस्मात् भेदाभेदवादं मिथ्यावादं परित्यज्यैवोक्तपरिष्कारः ब्रह्मा-नन्दाद्युक्ता अन्येऽपि च भेदघटितात्यन्ताभावघटिताः परिष्काराः संरक्ष-णीया इत्यलं पल्लवितेन ॥

(*b*) सत्यत्वानुमानसमर्थनम्.

SATYATVANUMĀNASAMARTHANAM.

Foll. 5*a*—19*b*.

A treatise in support of the inference that the universe of external manifestation is not unreal.

Incomplete.

Beginning:

सत्यत्वसाधकानुमानबाधिताश्च दृश्यत्वादयः । यद्यपि सत्यत्वानुमानेन सत्प्रतिपक्ष इति वक्तव्यम्, साध्याभावव्याप्यवत्पक्षस्य सत्प्रतिपक्षत्वात्, तथापि पक्षविशेष्यकसाध्यानुमितिप्रतिबन्धकतावच्छेदकविषयताकत्वमेव बाधत्वं सत्प्रतिपक्षसाधारणम् । न तु प्रकृतानुमितिप्रतिबन्धकतावच्छेदिका विरोध्यनुमितिजनकतानवच्छेदिका च या विषयता तन्निरूपकत्वरूपं सत्प्रतिपक्षव्यावृत्तम् । हेत्वभाववत्पक्षतद्व्याप्यवत्पक्षयोरसिद्धित्वस्येव साध्याभावतद्व्याप्यवत्पक्षयोर्द्वयोरपि बाधताया एव युक्तत्वात् । बाधविशेषस्य सत्प्रतिपक्षव्यवहारस्तु अस्माकमिष्ट एवेत्यवधेयम् ।

End:

न च शाब्दप्रमानुकूलशक्तिरेव तात्पर्यम् । न तु शाब्दभ्रमानुकूल-शक्तिः तत्र तात्पर्यत्वाव्यवहारादिति वाच्यम् । तथा सति बौद्धादिग्रन्थानां मि ।

Foll. 20*a*, 21*a* and 22*b* contain some footnotes on the same work and 20*b*, 21*b* and 22*a* are blank

R. No. **146**.

Palm-leaf 7⅜ × 1¼ and 6¾ × 1½ inches. Foll. 26. Lines, 5 in a page. Grantha Slightly injured.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) **श्राद्धप्रयोगः.**

ŚRĀDDHAPRAYŌGAḤ.

Foll. 1*a*—5*b*.

Similar to the work described under No. 3819 of the D.C.S. MSS., Vol. VII. This work describes the procedure as observed by the followers of Satyāṣāḍhasūtra of the black Yājurvēda.

Incomplete.

Beginning:

देवेभ्यो नमः। पितृपितामहप्रपितामहेभ्यो नमः . . स्वामिनः . . भवन्तोऽनुगृह्णन्तु . . श्राद्धकाले . . प्रवर्तये . . संकल्पः पुण्यतिथौ गोत्रस्य शर्मणः पितृभूतस्य यजमानस्य पितुः . . अद्यास्मिन् प्रत्याब्दिकश्राद्धं पार्वणविधानेनाद्य करिष्ये। वरणम् . . स्थलशुद्धिः . . अपेतवीता . . लोकमस्मै . . अपहताः . . उदीरताम्। औपासाग्निमुपसमाधाय . . 'दक्षिणाप्रागग्रैर्दर्भै-रग्निं परिस्तीर्य।

End:

वहाज्यं जातवेदः पितृभ्यः यत्रैनान् वेत्थ विहितां पराके आज्य-स्य कूल्या अवसागमन्तु सत्यायैषामाशिषः सन्तु कामैः स्वधा नमः पितृभ्य इदम्।

(*b*) अनाहिताग्निपैतृमेधिकप्रयोगः.

ANĀHITĀGNIPAITṚMĒDHIKAPRAYŌGAḤ

Foll. 6*a*—8*b*.

Same work as the one described under No. 3519 of the D.C.S. MSS., Vol. VII.

Incomplete.

(*c*) अनाहिताग्निसंस्कारकारिका.

ANĀHITĀGNISAṀSKĀRAKĀRIKĀ.

Foll. 9*a*—17*b*

This describes the ritualistic procedure to be followed in connection with the cremation and other funeral ceremonies to be conducted in regard to a deceased person who had not consecrated the sacred fire by performing the ceremony called Agnyādhāna. This is also intended for the followers of Satyāṣāḍhasūtra of the black Yajurvēda.

Incomplete.

Beginning:

अनाहिताग्नेरनले विनष्टे मृतस्य वह्नेर्जघनं पुरोवत् ।
संपूर्य च द्वादशभिर्गृहीतं घृतेन दर्वीं जुहुयाच्च तूष्णीम् ॥
ततो व्याहृतिभिर्हुत्वा प्रेतमात्या इति क्रिया ।
इह विध्य(न्तरा)भावादयमेव विधिर्भवेत् ॥
अनाहिताग्नेर्मरणस्य काले कर्णे जपेद्दक्षिणतो . . . काः ।
शुचिस्तदा ब्रह्मविदा भृगुर्वै तथायुषो वाथ मृते त्वमात्याः ॥

End:

भुञ्जीयाज्ज्ञातिभिः पश्चादित्थं वै पार्वणक्रिया ।
आवाहनाग्निकरणं स्वधानिनयनं तथा ॥

(*d*) शंकरद्वादशकम्.

ŚAṄKARADVĀDAŚAKAM.

Foll. 18*a*—19*b*.

A dozen stanzas describing briefly the leading incidents in the life of Śaṅkarācārya and invoking his blessings. It is stated that a certain person taught these stanzas to his disciples for daily repetition.

Contains ten stanzas only.

Beginning:

अन्वहं पठितुं सर्वमाचार्यचरितं शुभम् ।
द्विषट्कं चाथ पद्यानां शिष्यायोपदिदेश सः ॥
देशे कालडिनाम्नि केरलधराशोभाकरे सद्द्विजा-
ज्जातः श्रीपतिमन्दिरस्य सविधे सर्वज्ञतां प्राप्तवान् ।
भूत्वा षोडशवत्सरे यतिवरो गत्वा बदर्याश्रमं
कर्ता भाष्यनिबन्धनस्य सुकविः श्रीशंकरः पातु नः ॥

End:

अस्मिन् जन्मनि चान्यजन्मसु मनोवाक्कर्मभिर्यत्कृतं
बाल्ये वा सति यौवने च विहितं यद्यत्कृतं वार्धके ।

अज्ञानादपि बुद्धिपूर्वमथवा यत् संचितं चानिशं
तस्मात्कल्मषबृन्दतः सकलतः श्रीशंकरः पातु नः ॥

(*e*) सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM.

Foll. 20*a*–24*a*. Fol. 24*b* is blank.

A prayer in praise of Sarasvatī, the goddess of learning.

Contains stanzas one to eleven and the last portion of stanza eighteen. Apparently a leaf is lost in the middle.

Beginning:

नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमात्
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कविमलं वाचामधीशं महः ॥

End:

. . . . युगलनमन्मध्यदेशामधीशां
वाचामीडे चिराय त्रिभुवनविनतां पुण्डरीके निषण्णाम् ॥

(*f*) देव्युपनिषत्.

DĒVYUPANIṢAD.

Foll 25*a*–26*b*.

Same work as the one described under No 543 of the D.C.S. MSS., Vol. I, Part III

Wants beginning and end.

R. No. **147**.

Palm-leaf. 13 × 1⅜ inches. Foll 40 Lines, 9 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koduvāyūr.

(*a*) पैतृमेधिकविधिः.

PAITṚMEDHIKAVIDHIḤ.

Foll. 1*a*—35*b*

Similar to the work described under No. 3702 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

अथातः पैतृमेधिकविधिं व्याख्यास्यामः—

मरणसंशये मन्त्रस्नानादिकं कारयित्वा भस्मरुद्राक्षतुलसिधारणं च । पञ्चम्यां शुभतिथौ मम पितुः शरीरशुद्ध्यर्थं पुण्याहवाचनं च करिष्ये इति संकल्प्य.

* * * *

प्राचीनावीती गोत्रस्य शर्मणः मम पितुः प्रेतस्य पैतृमेधिकविधिना संस्कारार्थं प्रेतोपासनाग्निसंधानकर्म कर्तुं योग्यतासिद्धिरस्त्विति अनुगृहाण । प्रेतोपासनाग्निना पैतृमेधिकविधिना संस्कारं च कर्तुं योग्य . . ण ।

End:

पाथेयं दधिसंयुक्तं घृतशाकादिसंयुतम् ।
प्रपितामहतृप्त्यर्थं पितुरन्नं ददाम्यहम् ॥

वृद्धप्रपितामहतृप्त्यर्थमिदं पाथेयं सदक्षिणाकं सताम्बूलं तुभ्यमहं संप्रददे । पानकसंभारदानं दत्वा । पुण्याहजपदक्षिणा । द्वादशेऽहनि कृत्यं समाप्तम् ।

* * * *

उरसि अग्निं निधाय, अपसव्यं परिषिच्य, एवमाज्याहुतिः । अत्रोभयं प्रहरति । अपसव्यं परिषिच्य, स्नात्वा ब्रह्मदण्डम् ।

(*b*) अस्थिसंस्कारप्रयोगः.

ASTHISAṀSKĀRAPRAYŌGAḤ.

Fol. 36.

This gives the ritualistic procedure to be followed in conducting the cremation and other funeral ceremonies in regard to a deceased person whose bones alone are available.

Complete.

Beginning:

तद्दिने कर्तारो वपनं कृत्वा स्नात्वा अनुज्ञा । अशेषे . . . स्वीकृत्य, प्राचीनावीती, गोत्रस्य शमर्णः मम मृतस्य पितुः . . . . अस्थिसंस्कारकर्म कर्तुं यो . . ण । अस्थीनि शरीराकृतिं कृत्वा, पञ्चगव्येन पुण्याह-जलेन चाभिषिच्य, आवाहनम्--आयाहि प्रेत . . . शत(द्ध)-द्रयिं च ।

End:

इत्यभिमन्त्र्य, असुनी ते . . स्वस्ति । यथोक्तविधिना दहेत् । सद्यः संचयनम् । . . मन्त्रावृत्तिः ॥

Colophon:

अस्थिसंस्कारः समाप्तः ॥

(c) दर्भसंस्कारः.

DARBHASAMSKĀRAḤ.

Foll. 36b—37b

Similar to the work described under R. No 65(f) ante.

Complete

Beginning:

तद्दिने कर्तारो वपनं कृत्वा अस्थ्यभावे पालाशवृन्तैः दर्भैर्वा शरीराकृतिं कृत्वा, तत्प्रकारः---चत्वारिंशता शिरः, दशभिर्ग्रीवा, विंशतिर्वक्षः ।

End:

केशश्मश्रुनखायां(नां) च कृन्तनादि न चेष्यते ।

चरुश्रपणनिर्वासग्रन्थिपिण्डं न कारयेत् ॥

क्षीरसेचनकर्तव्यसंचयोऽपि. न दूष्यते ॥
. . . . मन्त्रावृत्ति. ॥

Colophon:

दर्भसंस्कारः समाप्तः ॥

(*d*) गर्भिणीसंस्कारः.

GARBHIṆĪSAṀSKĀRAḤ.

Foll. 37*b*–38*b*

Describes how the funeral rites should be conducted in the case of the death of a pregnant woman.

Complete.

Beginning:

गर्भिण्याः षण्मासादूर्ध्वे मरणे तां श्मशानं नीत्वा तस्या उदरं वामतः स्वधितिना हिरण्यगर्भः समवर्तताग्रे इत्युल्लिख्य . . . .

इति गर्भ(र्चे)मुद्धृत्य यदि जीवति शिशुः, जीवति मम पुत्रः दीर्घायुत्वाय वर्त(र्चे)स इति तमाभिमन्त्र्य, दीर्घायुत्वाय वर्चसे हिरण्यशकलमन्तर्धाय जलेनाभिषिच्य शिशुं ग्रामं नीत्वा ।

End:

यदि शिशुर्मृतः स्यात् गोमयेनाज्ञ(नादिभिर)लंकृत्य तस्याः पाददेशे व्याहृत्या निखनेत् । उत्क्रान्तिगोदानमारभ्य यथाविधि संस्कारं कृत्वा ॥

Colophon:

गर्भिणीसंस्कारविधिः समाप्तः ॥

(*e*) ब्रह्मचारिनारायणबलिविधिः.

BRAHMACĀRINĀRĀYANABALIVIDHIḤ.

Foll. 39*a*—40*b*

Contains the ritualistic procedure connected with the performance of Nārāyaṇabali (a sacrifice to Nārāyaṇa) in relation to the death of an unmarried person.

Complete.

Beginning :

पुत्रस्योपनीतस्य मरणे कपालाग्निमुत्पाद्य तदग्निना सर्वं पैतृमेधिकं- विधिवत् एकोद्दिष्टान्तं कृत्वा । . . . .
अथातो नारायणबलिं व्याख्यास्यामः—दक्षिणायने उत्तरायणे वा द्वादश- दिने अपरपक्षद्वादश्यां वा नारायणबलिः क्रियते । पूर्वेद्युः द्वादश षट् द्वौ वा ब्राह्मणान् वा निमन्त्रयेत ।

End :

स्नानं पुण्याहं यज्ञोपवीतधारणं विभूतिधारणं भोजनम् ॥

Colophon :

ब्रह्मचारिनारायणबलिः समाप्तः ॥

R. No. **148.**

Śrītāla. $12\frac{3}{4} \times 2\frac{1}{8}$ inches. Foll. 13. Lines, 11 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāl of Koḍuvāyūr

सीताविजयः.

SĪTĀVIJAYAH.

This narrates the story of the conquest of a demon named Śatamukha-Rāvaṇa by Sītā. This forms part of the Vāsiṣṭha-rāmāyaṇa and consists of seven Adhyāyas.

Complete.

Beginning :

ऋषयः—

सूतसूत महाप्राज्ञ पुराणार्थविशारद ।

* * *

रेफोच्चारणमात्रेण मुखान्निर्यान्ति पातकाः ।
पुनः प्रवेशभीत्या च मकारस्तु कवाटकः ॥
कायेन मनसा वाचा केवलैरिन्द्रियै (परम्) ।
यत् पापं क्रियते नित्यं तन्नश्येदत्र नामतः ॥

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
शृण्वतां सर्वपापघ्नं सीताविजयसंश्रितम् ॥

शातानन्दः—

नमस्ते ब्रह्मपुत्राय वसिष्ठाय महात्मने ।
शतास्यो नाम दनुजः सीतया निहतः पुरा ॥

Colophon:

इति वासिष्ठरामायणे सीताविजये प्रथमोऽध्यायः ॥

End:

शृणुयात् प्रयतो भक्त्या सर्वपापैः प्रमुच्यते ।
सर्वान् कामानवाप्यान्ते विष्णुलोकं स गच्छति ॥
इत्येवमुक्त्वा वै सूतः ऋषीन् सर्वान् मुनीश्वरान् ।
गन्तुकामः पुनः प्राह वचनं सर्वसौख्यदम् ॥
कुरुध्वं सज्जने प्रीतिं भजध्वं सततं हरिम् ।
मैत्रीं भजध्वं सर्वत्र यतो विष्णुमयं जगत् ॥

Colophon:

इति श्रीमद्वासिष्ठरामायणे सीताविजये श्रीरामपट्टाभिषेको नाम सप्तमोऽध्यायः ॥

R. No. **149.**

Śrītāla. 9 × 1½ inches. Foll. 51. Lines, 9 in a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṛṣṇavādyār of Palghat.

(*a*) **कुमारायुष्यश्लोकाः.**

KUMĀRĀYUṢYAŚLŌKĀH.

Fol. 1*a*.

This is a collection of four stanzas addressed to Śiva with a view to confer longevity on one's own son.

Complete.

Beginning:

त्रिपर्यस्य वेषं विहर्त्रोः स्वपित्रोः
समीपस्थिते स्तन्यकामे कुमारे ।
कटाक्षाङ्कुरः सस्मितं पातितो यः
स मे दीर्घमायुः कुमारे करोतु ॥

End:

सुब्रह्मण्यसदाशिवाख्यपदयोरोङ्कारधर्मे मयि
त्वय्यर्थेऽपि च कर्मधारयवतोराम्नायमध्यस्थयोः ।
त्वं चाहं प्रणवस्य वाच्य इति तं स्कन्दं वदन्तं मुदा
श्लिष्यन् जिघ्रति मूर्ध्नि यः स भगवान् मह्यालकं रक्षतु ॥

(*b*) सुभाषितानि.
SUBHĀṢITĀNI

Foll. 1*b*—45*b*.

This is a collection of choice and pithy stanzas on various subjects.

Contains 349 stanzas

Beginning:

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥
सुभाषितेन गीतेन युवतीनां च लीळया ।
यस्य चित्तं न ह्रियते स नूनं पुरुषः पशुः ॥
सुभाषितसुधानन्दलहरी यदि लभ्यते ।
अलं हारैः किमाहारैर्विहारैरपि योषिताम् ॥

End:

Six stanzas of praise and prayer addressed to Śaṭhāri or Nammālvār, a very esteemed saint of the Śrī-Vaiṣṇavas.

Complete.

Beginning :

श्रीशठारे मम स्वामिन् मद्गुरो मम रक्षक ।
अवधारय विज्ञप्तिमधुना · · · · पुमन् ॥
अनात्मन्यात्मबुद्धिं मे स्वतन्त्रात्मधियं तथा ।
· विनिवर्तय दत्वा म यथार्थज्ञानसंपदम् ॥

End :

कलयामि कलिध्वंसं कविलोकदिवाकरम् ।
यस्य गोभिः प्रकाशाभिराविद्धं निहतं तमः ॥

Colophon :

इति श्रीशठारिप्रार्थनाषट्कं संपूर्णम् ॥

(*l*) पराङ्कुशस्तोत्रम्.

PARĀṄKUŚASTŌTRAM.

Foll. 53*a*—55*b*.

A eulogy on the saint mentioned under the last work above.
Complete.

Beginning :

जयतु जयतु कारेः सूनुराद्यो गुरूणां
जयतु जयतु भूमानायकप्रेमसीमा ।
जयतु जयतु नित्यं द्राविडाम्नायदर्शी
जयतु जयतु चिञ्चामूलवासी शठारिः ॥

End :

निष्ठत्यस्यास्तटपरिसरे निम्नगा कापि तस्या.
कश्चिन्मूले निवसति मुनिर्मुक्तिमार्गोपदेष्टा ।
कालं दृष्ट्वा कलिकलुषितं सर्वयोग्यामनन्यं
दिव्यज्ञानं दिशति दयया द्राविडब्रह्मविद्याम् ॥

Colophon :

इति पराङ्कुशस्तोत्रं संपूर्णम् ॥

(*m*) पराङ्कुशपञ्चविंशतिः.

PARĀṄKUŚAPAÑCAVIṀŚATIḤ.

Foll. 55*b*—59*b*.

Similar to the above. By Varadadēśika of Vādhūlagōtra.
Complete.

Beginning :

श्रीपराङ्कुशनुतिं य आतनो(त्) तत्पदाब्जपरभक्तिचोदितः ।
तं वधूलकुलभूषणं दयावारिधिं वरददेशिकं भजे ॥

श्रीमन् पारङ्कश निरङ्कुशतत्त्वबोध-
वात्सल्यपूर्णकरुणापरिणाहरूप ।
सौशील्यसागरमनन्तगुणाकरं त्वां
संसारतापहरणं शरणं भजेऽहम् ॥

End:

. . . . सूनु-
मस्मद्गुरुं तव पदप्रवणं समीक्ष्य ।
अज्ञं कृतागसमनाथमकिंचनं मां
त्वत्किंकरं शठरिपो सततं कुरुष्व ॥

Colophon:

इति श्रीपराङ्कुशपञ्चविंशतिः संपूर्णा ॥

(*n*) नक्षत्रमालास्तोत्रम्.

NAKṢATRAMĀLĀSTŌTRAM

Foll. 59*b*—64*a* Fol. 64*b* is left blank.

This consists of 27 stanzas in praise of Nammālvār: by Abhirāmavara.

Complete.

Beginning:

अस्मासु वत्सलतया कृपया च भूयः
स्वेच्छावतीर्णमिव सौम्यवरं मुनीन्द्रम् ।
आचार्यपौत्रमभिरामवराभिधान-
मस्मद्गुरुं परमकारुणिकं नमामि ॥
श्रीमान् पराङ्कुशमुनिर्जीयाद्विज्ञानमुद्रया ।
नेन्द्रियाश्वयुजो नणां नित्यं विषयवीथयः ॥

End:

अन्तरेण शठारातिं कः संसारेऽवतीम(ह नः) ।
तदहं हृदये नित्यं निदधे तद्वपुःश्रियम् ॥
वाचिकी वरिवस्या मे तारकामालिकात्मिका ।
पराङ्कुशपदाब्जेन परिवा(ष्कार)वती भवेत् ॥

(*o*) क्षमाषोडशी.

KṢAMĀṢŌḌAŚĪ.

Foll. 65*a*—69*a*.

Sixteen stanzas of praise and prayer addressed to Ranganātha : by Vēdācārya, son of Vēdavyāsa

Complete.

Beginning :

यश्चक्रे रङ्गिणः स्तोत्रं क्षमाषोडशनामकम् ।
वेदव्यासस्य तनयं 'वेदाचार्यं तमाश्रये ॥
श्रीरङ्गेश यया करोषि जगतां सृष्टिप्रतिष्ठाक्षया
नत्रामुत्र च भोगमक्षयसुखं मोक्षं च तत्तत्तृषाम् ।
तत् स्वातन्त्र्य(मपास्य) कल्पितजगत्क्षेमादिहृद्या स्वतः
क्षान्तिस्ते करुणासखी विजयतां क्षेमाय सर्वात्मनाम् ॥

End :

संत्यक्तसर्वविहिताक्रियमर्थकायः
श्रद्धालुमन्वहमनुष्ठितनिन्द्यकृत्यम् ।
अत्यन्तनास्तिकमनात्मगुणोपपन्नं
मां रङ्गराज परया कृपया क्षमस्व ॥

Colophon :

क्षमाषोडशी समाप्ता ॥

(*p*) श्रीस्तवः.

ŚRĪSTAVAḤ.

Foll. 69*a*—71*b*.

A short poem in praise of Lakṣmī or Śrī-Raṅganāyakī : by Śrīvatsāṅkamiśra.

Complete.

Beginning :

श्रीवत्साचिह्नमिश्रेभ्यो नमउक्तिमधीमहि ।
यदुक्तयस्त्रयीकण्ठे या(न्ति मङ्गलसूत्र)ताम् ॥

स्वस्ति श्रीर्दिशतादशेषजगतां सर्गोपसर्गस्थिति-
स्वर्गं दुर्गतिमापवर्गिकपदं सर्वं च कुर्वन् हरिः ।
यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलं
क्रीडेयं खलु नान्यथास्य रसता स्यादैकरस्यात्ततः ॥

End:

यस्याः कटाक्षवीक्षाक्षणलक्ष्यं लक्षिता महेशाः स्युः ।
श्रीरङ्गराजमहिषी सा मामभिवीक्षतां लक्ष्मीः ॥

Colophon:

इति श्रीवत्साङ्कमिश्रविरचितः श्रीस्तवः संपूर्णः ॥

(*q*) **धाटीपञ्चकम्.**

DHAṬĪPAÑCAKAM.

Foll. 72*a*—73*a*

This is an eulogy on Ramanujacarya

Incomplete.

Beginning:

पाषण्डद्रुमषण्डदावदहनश्चार्वाकशैलाशनि-
र्बौद्धध्वान्तनिरासवासरपतिर्जैनेभकण्ठीरवः ।
मायावादिभुजङ्गभङ्गगरुडस्त्रैविद्यचूडामणिः
श्रीरङ्गेशजयध्वजो विजयते रामानुजोऽयं मुनिः ॥

End:

प्रज्ञासूत्रं बुधानां प्रशमधनमनःपद्मिनीनालसूत्रं
रक्षासूत्रं मुनीनां जयति यतिपतेर्वक्षसि ब्रह्मसूत्रम् ॥
पाषण्डसागरमहाबडबामुखाग्निः
श्रीरङ्गराजचरणाम्बुजमूलदासः ।
श्रीविष्णुलोकमणिमण्डपमार्गदायी
रामानुजो विजयते यतिराजराजः ॥

(r) प्रार्थनापञ्चकम्.

PRĀRTHANĀPAÑCAKAM.

Foll. 73a—74a.

Five stanzas of praise and prayer addressed to Rāmānujācārya.

Complete.

Beginning:

यतीश्वर श्रृणु श्रीमन् कृपया परया तव ।
मम विज्ञापनमिदं विलोक्य वरदं गुरुम् ॥
अनादिपापरचितामन्तःकरणनिष्ठिताम् ।
यतीन्द्र विषये सान्द्रां विनिर्वासय वासनाम् ॥

End:

काषायशोभि(कमनीय)शिखानिवेशं
दण्डत्रयोज्ज्वलकरं विमलोपवीतम् ।
उद्यद्दिनेशनिभमुल्लसदूर्ध्वपुण्ड्रं
रूपं तवास्तु यतिराज दृशोर्ममाग्रे ॥

Colophon:

इति श्रीयतिराजप्रार्थनापञ्चकं संपूर्णम् ॥

(s) रामानुजाष्टकम्.

RĀMĀNUJĀṢṬAKAM.

Foll. 74a—75b.

Similar to the last.

Complete.

Beginning:

रामानुजाय मुनये नमउक्तिमात्रं
कामातुरोऽपि कुमतिः कलयन्नभीक्ष्णम् ।
यामामनन्ति यमिनां भगवज्जनानां

End:

श्लोकाष्टकमिदं भक्त्या योऽकामः प्रत्य(हं पठेत्) ।
आकारत्रयसंपन्नः शोकाब्धिं तरति ध्रुवम् ॥

(*t*) श्रीरङ्गराजप्रपत्तिः.

ŚRĪRAṄGARĀJAPRAPATTIḤ.

Foll. 76*a*—77*b*.

This eulogy is addressed to God Raṅganātha worshipped at Srirangam in whose feet the author takes refuge.

Incomplete.

Beginning:

श्रीरङ्गधामनि महाद्भुतसंनिवेशे
व्यक्ते स्वयं प्रणववर्ष्मणि वेदशृङ्गे ।
दिव्ये विमानतिलके कृतनित्यवासौ
श्रीरङ्गराजचरणौ शरणं प्रपद्ये ॥

End:

श्रीचन्द्रपुष्करणिकातटवासिधर्म-
वर्मादिपूर्वतनु(न) भूपतपःप्रसन्न ।
कल्याणकल्पतरुपल्लवतल्लजाभौ
श्रीरङ्गराजचरणौ शरणं प्रपद्ये ॥
भोगीन्द्र . . . . . ।

(*u*) श्रीरङ्गराजमङ्गलाशासनम्.

ŚRĪRAṄGARĀJAMAṄGALĀŚĀSANAM

Fol 78.

One leaf containing the end of the last work and the beginning of this work is lost.

A benediction addressed to God Ranganātha.

Wants beginning.

Beginning:

. . . . . सुखसुप्ताय मङ्गलम् ।
रजताद्रिनिषण्णेन्द्रनीलशैलानुसारिणे ।
. . . . . य श्यामाय श्रीरङ्गेशाय मङ्गलम् ॥

End:

ज्ञानसिद्धाञ्जनैरस्मद्देशिकैर्दर्शिताय मे ।
निधये नित्यपूर्णाय श्रीरङ्गेशाय मङ्गलम् ॥

(*v*) शठकोपप्रपत्तिः.

ŚAṬHAKŌPAPRAPATTIḤ.

Fol. 79.

Contains a prayer addressed to Śaṭhāri or Nammaḻvār in which the author seeks refuge in His feet for absolving the sins.

Incomplete.

Beginning:

श्रीशस्य पुष्कलकृपाविषयैर्यतीन्द्र-

पूर्वैः प्रसूनसदृशं विधृतैः शिरोभिः
भव्यौ शठारिचरणौ शरणं प्रपद्ये ॥

End:

अन्नादिधारकमशेषशरीरभाजां
संपोषकं . . . . . . ।

R No. **174.**

Palm-leaf 19½ × 1½ inches Foll. 52. Lines, 6 in a page Telugu.
Slightly injured.

Presented in 1910-11 by T Rāmānuja Rao of Triplicane.

(*a*) स्तोत्ररत्नम्.

STŌTRARATNAM.

Foll. 1*a*—4*b*.

Same work as the one described under R. No. 160(*t*) *ante*.
Complete.

(*b*) यतिराजविंशतिः.
YATIRĀJAVIṀŚATIḤ.

Foll 4*b*—6*a*.
Same work as the one described under R. No. 173(*f*) *ante*.
Complete.

(*c*) वरवरमुनिदिनचर्या.
VARAVARAMUNIDINACARYA.

Foll. 6*a*—7*b*.
Same work as the one described under R. No 173(*e*) *ante*.
Contains Pūrvadinacaryā only.

(*d*) मुकुन्दमाला.
MUKUNDAMĀLĀ.

Foll. 8*a*—10*b*

A hymn in praise of Viṣṇu: by Kulaśēkhara, a prince of the Travancore country and a Vaisṇavasaint. He is considered by Śrī-Vaiṣṇavas to be an Āḻvār; and his Tamil work called Perumāḷ Tirumoḻi is included in what is called the Drāviḍavēda.

Complete.

Beginning:

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने ।
तमहं शिरसा वन्दे राजानं कुलशेखरम् ॥
श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुण्ठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासे-
त्यालापनं प्रतिपदं कुरु मे मुकुन्द ॥

End:

यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ
मित्रौ द्विजन्मवरपद्मशरावभूताम् ।
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण ॥

(*e*) **चतुःश्लोकी.**

CATUŚŚLŌKĪ

Foll. 10*b*—11*a*

Same work as the one described under R. No. 160(*a*) *ante*.
Complete.

(*f*) **धाटीपञ्चकम्.**

DHĀṬIPAÑCAKAM.

Fol 11.

Same work as the one described under R. No. 173(*q*) *ante*.
Complete.

(*g*) **प्रार्थनापञ्चकम्.**

PRĀRTHANĀPAÑCAKAM.

Foll. 11*b*—12*a*.

Same work as the one described under R. No. 173(*r*) *ante*.
Complete.

(*h*) **पञ्चायुधस्तोत्रम्.**

PAÑCĀYUDHASTŌTRAM.

Fol 12*a*.

Same work as the one described under R. No. 173(*j*) *ante*.
Complete.

(*i*) जितन्तेस्तोत्रम्.

JITANTĒSTŌTRAM.

Foll. 12*b*—13*a*.

This is taken from the Pāñcarātrāgama and is a hymn in praise of Visṇu

Contains the first twenty stanzas only.

Beginning:

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥

End:

उपचारापदेशेन कृतानहरहर्मया ।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम ॥

(*j*) देवराजाष्टकम्.

DĒVARĀJĀṢṬAKAM.

Fol. 13.

Eight stanzas in praise of Varadarāja, a form of Visṇu, worshipped at Conjeevaram. The author of this work is Kāñcīpūrṇa, called Tirukkaccinambi in Tamil. He was the son of Kamalāpati and was one of the religious teachers of Rāmānujācārya.

Complete

Beginning:

श्रीमत्काञ्चीमुनिं वन्दे कमलापतिनन्दनम् ।
वरदाङ्घ्रिसदासंगरसायनपरायणम् ॥
देवराजदयापात्रं श्रीकाञ्चीपूर्णमुत्तमम् ।
रामानुजमुनेर्मान्यं वन्देऽहं सज्जनाश्रयम् ॥
नमस्ते हास्तिशैलेश श्रीमन्नम्बुजलोचन ।
शरणं त्वां प्रपन्नोऽस्मि प्रणतार्तिहराच्युत ॥

End:

त्वदीक्षणसुधासिन्धुवीचिविक्षेपशतिलैः ।
कारुण्यमारुतानीतैः शीकरैरभिषिञ्च माम् ॥

(*k*) अष्टश्लोकी.

AṢṬAŚLŌKĪ.

Foll. 13*b*—14*a*.

Same work as the one described under R. No. 171(*d*) *ante*.
Complete.

(*l*) नाममौक्तिकमाला.

NĀMAMAUKTIKAMĀLĀ.

Foll. 14*b*—15*a*.

A collection of 128 names of Viṣṇu: by Yāmunācārya
Complete.

Beginning:

यत्पदाम्भोरुहध्याननविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥
श्रीनाममौक्तिकैर्माला यामुनार्येण निर्मिता ।
ऋषिसू(शु)क्तिसमुद्भूतैर्निर्दोषैः श्रुतिसागरे ॥

* * * *

श्रीमन्नारायणाद्रीश श्रीमन्नञ्जनशैलप ।
श्रीमद्वृषभशैलेन्द्र श्रीमत्सिंहनगाधिप ॥

End:

येन तत्पठ्यते नाम्नामष्टाविंशोत्तरं शतम् ।
अनिष्टपक्षक्षपणमिष्टावाप्तिरवाप्यते ॥

(*m*) क्षमाषोडशी.

KṢAMĀṢOḌAŚĪ.

Foll. 15*b*—17*a*. Fol. 17*b* is left blank.

Same work as the one described under R. No. 173(*o*) *ante*.
Complete.

(*n*) गद्यत्रयम्.

GADYATRAYAM.

Foll. 18*a*—23*b*.

Three prose pieces containing praise and prayer addressed to God Viṣṇu. They describe the self-surrender made by Rāmānuja to God Nārāyaṇa as a means of attaining salvation, and praise Śrī-Raṅganātha worshipped at Srirangam and in Vaikuṇṭha (Lord of the heaven). By Rāmānujācārya.

Complete.

Beginning:

वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमुपास्महे ॥

भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणां पद्मावनालयां भगवतीं श्रियं देवीं नित्यानपायिनीं . . . . . . पारमार्थिकभगवच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञान ।

End:

सस्मितमाहूय समस्तक्लेशापहं निरतिशयसुखावहमात्मीयं श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत ॥

चिदचित्परतत्त्वानां तत्त्वयाथार्थ्यवेदिने ।
रामानुजाय मुनये नमो मम गरीयसे ॥
रामानुजपदाम्भोजद्वन्द्वकैङ्कर्यवृत्तयः ।
सन्तु सर्वास्ववस्थासु धारकाः पोषकाश्च मे ॥

Colophon:

इति श्रीभगवद्रामानुजविरचितगद्यत्रयं संपूर्णम् ॥

(*o*) सुन्दरराजस्तवः.

SUNDARARĀJASTAVAḤ.

Foll. 24*a*—34*a*.

This consists of eulogistic prayer addressed to God Sundarabāhu worshipped at A<u>l</u>agar Malai near Madura This work is also called

Sundarabāhustava. By Śrīvatsāṅkamiśra, of Hāritagōtra, and a disciple of Rāmānujācārya The colophon is incorrectly written here.

Complete.

Beginning :

श्रीमन्तौ हरिचरणौ समाश्रितोऽहं श्रीरामावरजमुनीन्द्रलब्धबोधः ।
निर्भीकस्तत इह सुन्दरोरुबाहुं स्तोष्ये तच्चरणविलोकनाभिलाषी ॥

End :

इदं भूयो भूयः पुनरपि च भूयः पुनरपि
स्फुटं यद्दीव्यामीत्यगतिरबुधोऽनन्यशरणः ।
कृतागा दुष्टात्मा कलुषमतिरस्मीत्यनवधे-
र्दयायास्ते पात्रं वनगिरिपते सुन्दरभुज ॥

Colophon :

इति श्रीहारीतकुलतिलकश्रीराममिश्रसोमसुत्सूनोः श्रीरङ्गराजदिव्याज्ञालब्धपराशरापरनामधेयस्य श्रीवत्साङ्कस्य कृतिषु श्रीरङ्गनाथसुन्दरराजस्तवः संपूर्णः ॥

(*p*) श्रीवैकुण्ठस्तवः.

ŚRĪVAIKUṆṬHASTAVAḤ.

Foll. 34*b*—42*a*.

A hymn in praise of Viṣṇu, the Lord of Vaikuṇṭha: by the same author as the last.

Complete.

Beginning :

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ॥

त्रैविद्यवृद्धजनमूर्धविभूषणं यत्
संपच्च सात्त्विकजनस्य यदेव नित्यम् ।

यद्वा शरण्यमशरण्यजनस्य पुण्यं
तत् संश्रये(य) वकुलाभरणाङ्घ्रियुग्मम् ॥

End :

निर्बन्ध एष यदि ते यदशेषवैध-
संसेवितो वरद रक्षसि नेतरांस्त्वम् ।
तर्हि त्वमेव मयि शक्त्यधिकारवाञ्छा-
प्रत्यूहशान्तिमितरच्च निधेहि विश्वम् ॥
व्यक्तीकुर्वन् निगमवचसामर्थमन्तर्निगूढं
श्रीवैकुण्ठस्तुतिमकृत यः श्रेयसे सज्जनानाम् ।
कूराधीशं गुरुतरदयादुग्धसिन्धुं तमीडे
श्रीवत्साङ्कं श्रुतिमतगुरुच्छात्रशीलैकधाम ॥

Colophon :

श्रीवैकुण्ठस्तवः समाप्तः ॥

(*q*) श्रीरङ्गराजस्तवः.

ŚRĪRAṄGARĀJASTAVAḤ.

Foll. 42*a*—44*b*.

A hymn in praise of Śrī-Raṅganātha as worshipped at Srirangam : by Parāśarabhaṭṭa, son of Śrīvatsāṅkamiśra.

Pūrvaśataka incomplete.

Beginning :

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥
श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

End :

परेण नाकं पुरि होममय्यां यो ब्रह्मकोशोऽस्त्यपराजिताख्यः ।
श्रीरङ्गनाम्ना तव पौरुषेयं विमानराजं भुवि भावयामि ॥
अनाद्याम्नातत्वात् पुरुषरचना.

(r) यतिराजस्तवः.

YATIRĀJASTAVAH.

Foll. 45*a*—52*b*.

A hymn in praise of Rāmānujācarya: by a disciple of Varadasūri.

Incomplete

Beginning:

श्रीशैलेशदयाभिपात्रमतुलं धीभक्तियोग्यादिसौ-
शील्याशेषमहागुणार्णवमहं श्रीरम्यजामातरम् ।
वेदान्तद्वयमुख्यपारवचनालंकारशास्त्रार्थदं
वन्दे तं यतिशेखरप्रवणमम्भोजाक्षिमब्जाननम् ।
श्रीशं शठारिं यतिसार्वभौमं श्रीरम्यजामातृमुनिं महान्तम् ।
वेदान्तयुग्मार्थविबोधशीलं वेदान्तसूरिं वरदं भजामि ॥
श्रीमद्रामानुजार्याङ्घ्री प्रपद्ये शरणं सदा ।
रामानुजाय कलये श्रीमते नम इत्यहम् ॥

End:

श्रीमद्रामानुजार्याङ्घ्री प्रपद्ये शरणं सदा ।
श्रीमते रामानुजाय नम इत्येवमास्थितः ॥

R. No. **175.**

Palm-leaf. $13\frac{1}{2} \times 1\frac{1}{4}$ inches Foll. 147. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1910–11 by T. Rāmānuja Rao of Triplicane.

(a) यतिराजविंशतिः.

YATIRĀJAVIMŚATIḤ.

Foll. 1*a*—4*a*.

Same work as the one described under R. No 173(*f*) ***ante***.

Complete.

(b) वरवरमुनिदिनचर्या.

VARAVARAMUNIDINACARYĀ

Foll. 5*a*—7*b*. Fol 4*b* is blank.

Same work as the one described under R. No. 173(*e*) *ante*.
Contains Pūrvadinacaryā only.

(*c*) क्षमाषोडशी.

KṢAMĀSŌḌAŚĪ.

Foll. 8*a*—11*a*.

Same work as the one described under R. No. 173(*o*) *ante*.
Complete.

(*d*) न्यासदशकम्.

NYĀSADAŚAKAM.

Foll. 12*a*—13*a*. Fol. 11*b* is blank.

Ten stanzas explaining the doctrine of Nyāsa or Prapatti as a means of attaining salvation: by Vēṅkaṭanātha also called Vēdāntadēśika.

Complete.

Beginning:

अहं मद्रक्षणभरो मद्रक्षणफलं तथा ।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेद्बुधः ॥

End:

श्रीमन्नियतपञ्चाङ्गं मद्रक्षणभरार्पणम् ।
अचीकरत्(:)स्वयं स्वस्मिन्नतोऽहमिह निर्भरः ।

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यासदशकं संपूर्णम् ॥

(*e*) प्रार्थनापञ्चकम्.

PRĀRTHANĀPAÑCAKAM.

Fol. 14. Fol. 13*b* is blank.

Same work as the one described under R. No. 173(*r*) *ante*.
Complete.

(*f*) यतिराजविंशतिः—आन्ध्रव्याख्यासहिता.

YATIRĀJAVIṀŚATIḤ WITH TELUGU COMMENTARY.

Foll. 15*a*—33*a*.

Same work as the one described under R. No. 173(*f*) *ante*.

Complete.

(*g*) உபதேசரத்தினமாலை.

UPADEŚARATNAMĀLAI.

Foll 34*a*—45*a*. Fol. 33*b* is blank.

See the Tamil part of the Triennial Catalogue.

(*h*) वरदराजस्तवः.

VARADARĀJASTAVAḤ.

Foll. 46*a*—58*b*. Fol. 45*b* is blank

A hymn in praise of Varadarāja worshipped at Conjeevaram: by Śrīvatsāṅkamiśra.

Complete.

Beginning:

श्रीवत्सचिह्नमिश्रेभ्यो नम(उ)क्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥
स्वस्ति हस्तिगिरिमस्तशेखरः संतनोतु मयि संततं हरिः ।
निःसमाभ्यधिकमभ्यधत्त यं देवमौपनिषदी सरस्वती ॥

End:

रामानुजाङ्घ्रिशरणोऽस्मि कुलप्रदीपः
आसीत् स यामुनमुनेः स च नाथवंश्यः ।
वंश्यः पराङ्कुशमुनेः स च सोऽपि देव्याः
दासस्तवेति वरदास्मि तवेक्षणीयः ॥
श्रीवत्सचिह्नमिश्रेभ्यः . . . मङ्गलसूत्रताम् ॥

(*i*) भगवद्गीता.

BHAGAVADGĪTĀ.

Foll. 60*a* - 116*b*. Fol. 59 is blank.

Same work as the one described under No. 1982 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

(*j*) ரஹஸ்யத்ரயம்.

RAHASYATRAYAM.

Foll. 133*a*—143*a* Foll. 117 to 132 and 143*b* to 147 are blank.

See the Tamil part of the Triennial Catalogue.

R. No. **176.**

Palm-leaf. 16½ × 1½ inches. Foll. 33. Lines, 8 in a page. Telugu. Much injured.

Presented in 1910-11 by Ullakki Śāstri of Guntur.

(*a*) हंसोपनिषत्.

HAṀSŌPANIṢAD.

Fol. 1 only.

Same work as the one described under No. 841 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*b*) परमहंसोपनिषत्.

PARAMAHAṀSŌPANIṢAD.

Fol. 2 only.

Same work as the one described under No. 598 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*c*) वाक्यवृत्तिः.

VĀKYAVṚTTIḤ.

Foll. 3*a*—5*b*.

Same work as the one described under No. 4719 of the D.C.S. MSS., Vol. IX.

Complete.

(*d*) ईशावास्योपनिषद्भाष्यटिप्पणी.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAṬIPPAṆĪ.

Foll. 6*a*—12*b*.

Same work as the one described under No. 312 of the D.C.S. MSS., Vol I, Part III.

Complete.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दगिरिकृ(त)मीशावास्य-भाष्यटिप्पणम् ॥

(*e*) ईशावास्योपनिषद्भाष्यम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Foll. 13*a*—20*a*. Fol. 20*b* contains Sarasvatīdvādaśanāma-stōtra.

Same work as the one described under No. 310 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*f*) सर्वसारोपनिषत्.

SARVASĀRŌPANIṢAD.

Foll. 21*a*—22*b*.

Same work as the one described under No. 816 of the D.C.S. MSS., Vol. I. Part III.

Complete.

(*g*) गर्भोपनिषत्.

GARBHŌPANIṢAD.

Foll. 23*a*—24*b*.

Same work as the one described under No. 436 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*h*) कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Foll. 25*a*—27*a*. Fol. 26 is missing.

Same work as the one described under No 395 of the D.C.S. MSS., Vol. I, Part III.

Complete

(*i*) कालाग्निरुद्रोपनिषत्.

KĀLAGNIRUDRŌPANIṢAD

Foll. 27*b*—28*a*. Fol. 28*b* is blank.

Same work as the one described under No. 356 of the D.C.S. MSS., Vol. I, Part III; without Ṛsicchandōdēvatā.

Complete.

(*j*) मेधादक्षिणामूर्तिमन्त्रः.

MĒDHĀDAKṢIṆĀMŪRTIMANTRAḤ.

Foll. 30*a*—35*b*. Fol. 29 is blank.

Similar to the work described under No. 6957 of the D.C.S MSS., Vol. XIII.

Complete.

R. No. 177.

Palm-leaf 16⅛ × 1⅜ inches Foll. 16. Lines, 6 in a page. Telugu. Injured.

Presented in 1910-11 by Prayāga Sītārāma Śāstri.

(*a*) शिवोत्कर्षश्लोकाः.

ŚIVŌTKARṢAŚLŌKĀḤ.

Foll. 1*a*—2*a*. Foll. 2*b* and 3 are blank.

These stanzas explain the superiority of Śiva over Viṣṇu with the aid of Purāṇic stories

Incomplete

Beginning:

कन्दर्पध्वंसकत्वाद्गरलकबलनात् कालगर्वापहत्वात्
दैतेयावासभूतत्रिपुरविदलनाद्दक्षयागे जयित्वात् ।

पार्थस्यास्त्रप्रदानान्नरहरिविजयान्माधवे स्त्रीशरीरे
शास्तुः संपादकत्वादपि च पशुपतिः सर्वदेवप्रकृष्टः ॥

End :

ग्राहं निहत्य करिराजमरक्षदेकः मृत्युं निहत्य मुनिपुत्रमरक्षदेकः।
को वा . . . . ॥

(b) आशौचविषयः.

ĀŚAUCAVIṢAYAḤ.

Foll. 4a—7b.

Similar to the work described under No. 3032 of the D C.S. MSS., Vol. V.

Incomplete.

(c) शिवभुजङ्गः.

ŚIVABHUJAṄGAḤ.

Foll. 8a—9b.

Same work as the one described under R. No. 61(o) *ante*.

Complete.

(d) साम्बभुजङ्गप्रयातस्तवः.

SĀMBABHUJAṄGAPRAYATASTAVAḤ.

Foll. 9b—11a.

A hymn in praise of Śiva and consisting of stanzas in Bhujaṅgaprayāta metre : by Śaṅkarācārya.

Complete.

Beginning :

कदा वा विरक्तिः कदा वा सुभक्तिः कदा वा महायोगसंसेव्यमुक्तिः।
हृदाकाशमध्ये सदा संवसन्तं चिदानन्दरूपं शिवं साम्बमीडे ॥

End :

भुजङ्गप्रयातस्तवं साम्बमूर्तेरिदं ध्यानरूपं तदेकाग्रचित्तः।
पठेद्यः सुभक्त्या स भक्तः कृतार्थः सदा तस्य साक्षात्प्रसन्नः
[शिवः स्यात् ॥

Colophon :

इति श्रीशंकराचार्यस्वामिविरचितं साम्बभुजङ्गप्रयातस्तवं(वनं)संपूर्णम्॥

(*e*) **काशीसारः.**

KĀŚĪSĀRAḤ.

Foll. 11*b*—13*a*.

Explaining the holiness of the sacred place, Benares.

Complete.

Beginning :

श्रीमद्विश्वेश काशी गिरिवरतनया सा च गङ्गेति तिस्रः
प्रेयस्यस्तत्र काश्यां त्वमसि कृतरुचिर्नैतरत्रोभयोर्यत् ।
तत्राद्या त्वत्सरूपान् धृतगरलगलान् फालनेत्रान् प्रसूते
पुत्रानर्धेन्दुमौलीनहह कथमुभे ते गजास्यं षडास्यम् ॥

End :

संसारसागरेऽगाधे दुःखा(वर्त)शताकुले ।
मज्जतां मनुजानां वै पूजा माहेश्वरस्य नौः ॥
अहंकारा . - . लभेत् ॥

Colophon :

इति श्रीशंकराचार्यविरचितः काशीसारः ॥

(*f*) **मल्हणस्तवः.**

MALHAṆASTAVAḤ.

Foll. 13*a*—14*b*.

A hymn in praise of Śiva : by Malhaṇa.

Incomplete.

Beginning :

कान्ताकचप्रचयपुष्पसुगन्धिगन्धलुब्धभ्रमद्भ्रमरकर्बुरकन्धराय ।
गन्धर्वयक्षसुरसिद्धकिरीटकोटिसंघट्टघृष्टचरणाय नमः शिवाय ॥

End :

उक्तं शिवेति शिव येन दिवा च रात्रौ उत्कण्ठया हर हरेति वृथापि येन ।
सत्यं ब्रवीमि सुरनाथ न पक्षपातात् मूढोऽपि घोरनरकान्न बिभेति तस्मात् ॥

Foll. 15 and 16 contain some stanzas of ethical character.

R. No. 178.

Palm-leaf. $16\frac{5}{8}\times 1\frac{1}{4}$ inches. Foll 104. Lines, 5 in a page. Telugu. Injured.

Presented in 1910-11 by Prayaga Sītārāma Śastri.

(*a*) जीवन्मुक्तिविवेकः.

JĪVANMUKTIVIVĒKAḤ.

Foll 1*a*—91*b*. Fol. 37 is blank.

A treatise in **Advaita-Vēdānta** explaining the principles of Sannyāsa or renunciation and describing the nature of salvation attained thereby even in this world : by Vidyāranya.

Complete

Beginning:

(यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं) जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्व(रम्) ॥

* * * *

. . . . . वैराग्यं यदहर्विरजेत्तदा ।
प्रव्रजेदिति वेदोक्तेस्तद्भेदस्तु पुराणगः ॥
विरक्तिर्द्विविधा प्रोक्ता तीव्रा तीव्रतरेति च ।

* * * *

इह जन्मनि जन्मान्तरे वा सम्यगनुष्ठितैः वेदानुवचनादिभिः उत्पन्नया विविदिषया संपादितत्वादयं विविदिषासन्न्यास इत्याभिधीयते । अयं च वेदनहेतुः संन्यासो द्विविधः—जन्मापादककर्मादित्यागमात्रात्मकः, प्रैषोच्चारणपूर्वकदण्डधारणाद्याश्रमरूपश्चेति । त्यागश्च तैत्तिरीयादौ श्रूयते—न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति । अस्मिंश्च त्यागे स्त्रियोऽप्यधिक्रियन्ते ।

End:

तद्ब्रह्माहमस्मीत्येवं सर्वदानुभवन्नयं यो योगी परमहंसः (स) कृतकृत्यो भवति । तथाच स्मर्यते—

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥ इति ।

जीवन्मुक्तिविवेकेन बन्धं हार्दं निवारयन् ।
पुमर्थमखिलं देयात् वितीया(द्या)तीर्थमहेश्वर· ॥

Colophon:

इति जीवन्मुक्तिविवेकः समाप्तः ॥

The scribe's name and date: Kūrappāḍu Jvālāpati, on the 5th of the bright fortnight in Vaiśākha of the year Nandana.

(*b*) उत्तरगीता—सव्याख्या.

UTTARAGĪTĀ WITH COMMENTARY.

Foll. 92*a*—104*b*.

Same work as the one described under No. 2377 of the D.C S. MSS., Vol. IV, Part II.

Contains 42 stanzas only in the first Adhyāya.

R. No. **179.**

Palm-leaf. 7⅜ × 1¼ inches. Foll. 14. Lines, 4 in a page. Telugu. Injured.

Presented in 1910-11 by T. Rāmānuja Rao of Triplicane.

गुरुपरम्पराध्यानश्लोकाः.

GURUPARAMPARĀDHYĀNAŚLŌKĀḤ.

Certain stanzas in praise of the successive teachers of Śrī-Vaiṣṇava religion: as would be recited by the descendants of Parāśara-bhaṭṭa.

Complete.

Beginning:

श्रीवत्सचिह्नकुलवारिधिपूर्णचन्द्रं श्रीमद्रघूत्तमगुरोरुपलब्धतत्त्वम् ।
श्रीवेङ्कटेशगुरुवर्यसुतं शरण्यं श्रीवत्साचिह्नगुरुवर्यमहं प्रपद्ये ॥

End:

श्रीस्तनाभरणं तेजः श्रीरङ्गेशयमाश्रये ।
चिन्तामणिमिवोद्भ्रान्तमुत्सङ्गेऽनन्तभोगिनः ॥

R. No 180.

Śritāla. 17½ × 2⅝ inches. Foll. 197. Lines, 13 in a page. Grantha. Good.

Presented in 1910-11 by S Ramakrsnavadyar of Palghat.

(a) माण्डूक्योपनिषद्भाष्यम्

MĀṆḌŪKYŌPANIṢADBHAṢYAM

Foll. 1a—15a. Fol. 15b is blank.

Same work as the one described under No. 704 of the D.C.S. MSS., Vol. I, Part III.

Contains up to Āgamaprakaraṇa.

(b) ऐतरेयोपनिषद्भाष्यम्.

AITARĒYŌPANIṢADBHĀṢYAM.

Foll. 16a—29a. Fol. 29b is blank.

Same work as the one described under No. 330 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(c) छान्दोग्योपनिषद्भाष्यम्.

CHĀNDŌGYŌPANIṢADBHĀṢYAM.

Foll. 30a—46b. Fol. 47 is blank.

Same work as the one described under No. 464 of the D.C.S. MSS., Vol. I, Part III.

Contains the sixth Adhyaya complete.

(d) पञ्चदशी—सव्याख्या.

PAÑCADAŚĪ WITH COMMENTARY.

Foll. 48a—194b.

Same work as the one described under No 4615 of the D.C.S. MSS., Vol. IX.

Complete.

The scribe's name and date: Krsna Śastrin, in the month of Caitra of the year Kīlaka.

Foll. 116b, 118b, 142b, 143b and 195—197 are blank.

R. No. 181.

Śrītāla. 9½ × 1½ inches. Foll. 177. Lines, 11 in a page. Grantha. Good.

Presented in 1910-11 by Mīnākṣiyammāl of Koḍuvāyūr.

(a) आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Foll. 1a—163b.

Same work as the one described under No. 1042 of the D.C.S. MSS., Vol. II.

Contains Praśnas one to ten

The scribe gives his name and date; Subrahmanya, on the 17th of the Jyēṣṭha month in the year Īśvara.

(b) आपस्तम्बपरिभाषासूत्रम्.

ĀPASTAMBAPARIBHĀṢĀSŪTRAM.

Foll. 164a—167a. Fol. 176b is left blank.

Same work as the one described under No. 1045 of the D.C.S. MSS., Vol. II.

Complete.

(c) आपस्तम्बप्रवरसूत्रम्.

ĀPASTAMBAPRAVARASŪTRAM.

Foll. 167b—176a. Foll 176b is left blank.

Same work as the one described under No 1056 of the D.C.S MSS., Vol. II.

Complete.

Fol. 177 contains a portion of Agniṣṭōmaprayōga

R. No. 182.

Śrītāla. 14½ × 2⅛ inches. Foll. 149. Lines, 12 in a page. Grantha. Good.

Presented in 1910-11 by S. Rāmakṛṣṇavādyār of Palghat

Foll. 1—5 are left blank.

उपदेशसाहस्री—सव्याख्या.

UPADĒŚASĀHASRĪ WITH COMMENTARY

Foll. 6*a*—149*b*.

Same work as the one described under No. 4565 of the D.C.S. MSS., Vol. IX.

Contains the metrical portion only The contents of this portion are given in the end in the passages extracted below :—

चैतन्यं प्रतिषेद्धुं चेश्वरश्चेति तृतीयकम् ।
अहंप्रत्ययबीजं च म(मू)न्त्राशङ्कं(ङ्कः) तु पञ्चक(म)म् ॥
छित्त्वेति बुद्ध्यारूढं च चित(ति)स्वरूपमष्टमम् ।
सूक्ष्मताऽव्यापिता चैव दृशिस्वरूपमित्यपि ॥
ईक्षितृत्वं प्रकाशस्थमचक्षुष्टं तथैव च ।
स्वप्नस्मृतिर्नान्यदन्यत् पार्थिवस्तत्त्वमस्यापि ॥
प्रयुञ्जचे(ज्ये)ति प्रकरणं जन्मनाशस्ततः स्मृतः ।
विंशत्प्रकरणाख्या या सोपदेशसहस्रिका ॥

R. No. 183.

Palm-leaf 13¾ × 1¼ inches Foll. 22. Lines, 6 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) इतिहासोपनिषत्.

ITIHĀSŌPANIṢAD.

Foll. 1*a*—18*b*.

Same work as the one described under No. 299 of the D.C.S. MSS., Vol. I, Part III.

Complete.

The name of the scribe is given as Ayyāsāmidīkṣitar.

(b) सोमोत्पत्तिः.

SŌMŌTPATTIḤ.

Foll. 19a—22b.

Same work as the one described under No. 2592 of the D.C.S. MSS., Vol. IV.

Complete.

The name of the scribe and the date of transcription are Ayyāsāmidīksitar, on the 14th of the Tulā month in the year Rudhirōdgāri.

R. No. **184.**

Palm-leaf. $13\frac{3}{4} \times 1\frac{1}{2}$ inches Foll 7. Lines, 7 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

ऋषिपञ्चमीव्रतपूजाविधानम्.

ṚṢIPAÑCAMĪVRATAPŪJĀVIDHĀNAM.

Foll. 1a—6a. Fol. 6b is blank.

Similar to the one described under No. 8281 of the D.C.S. MSS., Vol. XVI

Complete.

Fol. 7 contains Aṅgapūjā.

R. No. **185.**

Palm-leaf. $10\frac{1}{2} \times 1\frac{3}{4}$ inches Foll. 27. Lines, 8 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāl of Koḍuvāyūr.

(a) ललितासहस्रनामावलिः.

LALITĀSAHASRANĀMĀVALIḤ.

Foll. 1a—18a Foll, 18b is blank.

Contains 1,000 eulogistic names of Lalitā or Dēvī.

Complete.

Beginning:

श्रीमात्रे नमः । श्रीमहाराज्ञ्यै नमः । श्रीमत्सिंहासनेश्वर्यै नमः । चिदग्निकुण्डसंभूतायै नमः । देवकार्यसमुद्यतायै नमः ।

End:

ह्रींकारहिमवद्गङ्गायै नमः । ह्रींकारार्णवकौस्तुभायै नमः । ह्रींकारमन्त्रसर्वस्वायै नमः । ह्रींकारपरसौख्यदायै नमः । श्रीमहात्रिपुरसुन्दर्यै नमः ॥

The name of the scribe and the date of transcription: Ayyāsāmidīksitar, on the 28th of Āni in the year Krōdhi.

(*b*) इतिहासोपनिषत्.

ITIHĀSŌPANIṢAD.

Foll. 19*a*—27*a*. Fol. 27*b* is blank.

Same work as the one described under No. 299 of the D.C.S. MSS., Vol. I, Part III.

Complete.

R. No. **186.**

Palm-leaf. 15⅜ × 1⅜ inches. Foll. 43 Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1910-11 by T. Śrīnivāsa Śāstriyār of Tanjore.

(*a*) तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆI DĪDHITIPRAKĀŚIKĀ.

Foll. 1*a*—27*b*

Same work as the one described under No 447 of the D.C.S. MSS., Vol. VIII.

Parāmarśavāda incomplete

(*b*) मुक्तावलीप्रकाशटिप्पणी.

MUKTĀVALĪPRAKĀŚAṬIPPAṆĪ.

Foll. 28*a*—41*a*. Foll. 41*b* is blank

This is a gloss on Dinakarīya of Mahādēva described under No. 3995 of the D.C.S MSS., Vol. VIII.

Wants beginning and end in Pratyakṣa.

Beginning:

समाप्तपुनरात्तत्वमिति । क्रियान्वयेन निवृत्ताकाङ्क्षस्य विशेष्य-वाचकपदस्य विशेषणान्तरान्वयार्थं पुनरनुसंधानं समाप्तपुनरात्तत्वं दोषः । तथाहि—चूडामणीकृतविधुर्वलयीकृतवासुकिः । भवो भवतु भव्याय लीला-ताण्डवपण्डित इति विशेषणान्तरान्वयार्थं भवपदस्य पुनरनुसंधानमिति विशेषणत्रयान्विते लीलाताण्डवपण्डिते विशेष्यभूते भव्याय भवत्विति क्रियान्वये तु नायं दोषः, क्रियान्वयेन शान्ताकाङ्क्षस्य पुनरनुसंधाना-भावात् ।

* * * *

तत्तद्विघ्नाभावत्वेनेति । यावत्यो विघ्नाभावव्यक्तय. तावतीः प्रातिस्वि-करूपेणोपादाय तद्व्यक्तिसंसर्गाभावविशिष्टव्यक्त्यन्तरसंसर्गाभावत्वेनेत्यर्थः ॥

न त्विति । यावन्तो विघ्नप्रतियोगिकसंसर्गाभावाः तावत्समुदायेन हेतुतेत्यर्थः ॥

Colophon:

इति मुक्तावलीप्रकाशे मङ्गलवादस्य तात्पर्यकथनम् ॥

End:

अरणिनिर्मथनसंयोगादिति । तृणफूत्कारसंयोगजन्यवह्नित्वावच्छिन्नं प्रति कारणत्वाभावान्न व्यभिचारप्रसारः । एतेनैव तद्वारणसंभवे तृणफूत्कार-संयोगादौ शक्तिः किमर्थमङ्गीकार्येति वाच्यम् ।

Foll. 42 and 43 contain some Cātuślōkas.

R. No. **187**.

Palm-leaf. 11¼ × 1⅜ inches. Foll. 216. Lines, 7 in a page. Telugu Very much injured.

Presented in 1910–11 by Prayāga Sītārāma Śāstri.

(*a*) याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Foll. 1*a*—118*b*.

Same work as the one described under No. 2682 of the D C.S MSS., Vol. V.

Vyavahārakāṇḍa incomplete.

(*b*) पराशरस्मृतिव्याख्या—माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ: MĀDHAVĪYĀ.

Foll. 120*a*—216*b* Fol. 119 is blank.

Same work as the one described under No. 2657 of the D C.S. MSS., Vol. V.

Prāyaścittakāṇḍa incomplete.

Contains Adhyāas four to seven complete and eight incomplete.

R. No. **188.**

Śrītāla. 14¼ × 2 inches. **Foll.** 171. Lines, 11 in a page. Grantha. Good.

Presented in 1910-11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Same work as the one described under No. 142 of the D C.S MSS., Vol I, Part II.

Contains Aṣṭakas I and II only.

The scribe adds: Ayyāsāmidīkṣitar, on Saturday, the 30th and the third lunar day, in the Siṁha month in the year Virōdhikṛt.

R. No. **189.**

Śrītāla. 13⅞ × 1⅞ inches. Foll 237. Lines, 10 in a page. Grantha. Good.

Presented in 1910-11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Foll. 1*a*—111*b*.

Same work as the one described under No. 156 of the D.C.S MSS., Vol. I, Part II.

Contains III Aṣṭaka only complete.

The copying was completed by Ayyāsāmidīkṣitar on Thursday, the 7th of Āni, in the year Virōdhikṛt

(*b*) कृष्णयजुर्वेदारण्यकम्.

KṚṢṆAYAJURVĒDĀRAṆYAKAM.

Foll. 112*a*—210*b*.

Same work as the one described under No. 170 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*c*) कृष्णयजुर्वेदकाठकम्.

KṚṢṆAYAJURVĒDAKĀṬHAKAM.

Fol. 211*a*—237*b*.

Same work as the one described under No. 184 of the D.C.S MSS., Vol. I, Part III.

Complete.

The date of the MS and the name of the scribe are given :

ज्येष्ठशुक्लाद्वितीयायामानन्दाब्दे च तिष्यभे ।
षट्त्रिंशत्संख्यकाः शाखाप्रश्नाः शेषाद्रियज्वना ॥
काठकारुणसंयुक्ताः केशवग्रामवासिना ।
लिखितास्तातपादानां पितणां तु प्रसादतः ॥

R. No. **190.**

Palm leaf. 14⅞ × 1⅝ inches. Foll. 180. Lines, 10 in a page. Telugu. Much injured.

Presented in 1910-11 by Gōpālasāmi Ayyaṅgār of Mannargudi.

काशिकावृत्तिः.

KĀŚIKĀVṚTTIḤ.

Same work as the one described under No. 1313 of the D.C.S. MSS., Vol. III

Breaks off in the second Pāda of the third Adhyāya.

R. No. 191.

Palm-leaf. 16¾ × 1⅝ inches. Foll. 199. Lines, 9 in a page. Grantha. Good.

Presented in 1910-11 by Gōpālasāmi Ayyangar of Mannargudi.

काव्यदर्पणः.

KĀVYADARPAṆAḤ.

A work in nine Ullasas on poetics and rhetoric: by Rājacūḍāmaṇidīkṣita, son of Satyamangala Ratnakhēṭa Śrīnivāsadīkṣita and Kāmākṣi.

Complete.

Beginning:

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै विष्वक्सेनाय ते नमः ॥
भव्यारम्भाय वो भूयादव्याजकरुणानिधिः ।
सव्यार्धालोकने कम्रा दिव्या या कापि देवता ॥

काव्यदर्पणाख्यं ग्रन्थमारभमाणो ग्रन्थकारः विघ्नविघाताय स्वेष्टदेवतां स्तुवन् अभिधेयवस्तुनिर्देशमप्यर्थादभिधत्ते --

नियत्यनियताह्लादमयीं नवरसोज्ज्वलाम् ।
कृतिं स्वतन्त्रां कुर्वाणा कवेर्जयति भारती ॥

नियतिर्नाम कालतत्त्वात् परं सप्तविंशतितमं तत्त्वम् । सा च पद्मादावेव सौरभादिकं नियमयतीति शैवशाक्तादितन्त्रेषु प्रसिद्धम् । यद्वा नियतिरदृष्टं तया ब्रह्मकृतिर्नियमिता । भारतीकृतिस्तु न नियतिकृतनियमनानियता, पद्मातिरिक्तकामिनीमुखादावपि सौरभादिवर्णनात् ।

End:

तनुकुञ्जरधाममहोहरिजिष्णुशब्दानां पर्यायासहिष्णुतया शब्दाश्रयत्वम् । वपुःकरितेजइन्द्रशब्दानां देहगजप्रतापपुरन्दरादिपदान्तरसहिष्णुतयार्थाश्रयत्वमित्युभयाश्रयत्वं पुनरुक्तपदाभासस्येति ध्येयम् ॥

Colophon:

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्कविश्वामित्रवंशसुकृतपरिपाकसाग्निचित्यविश्वजिदतिरात्रयाजिसत्यमङ्गलरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसंभवस्य श्रीमदर्धनारीश्वरगुरुचरणसहजतालब्धविद्यावैशद्यस्य राजचूडामणिदीक्षितस्य कृतिषु काव्यदर्पणे शब्दालंकारविवेको नाम नवम उल्लासः ॥

The subjects dealt with in the various chapters of the work are—

१. काव्यस्वरूपनिरूपणम्.

२. शब्दार्थनिरूपणम्.

३. व्यङ्ग्यार्थस्वरूपनिरूपणम्.

४, ५, ६. काव्यभेदविवरणम्.

७. दोषनिरूपणम्.

८. गुणालङ्कारनिरूपणम्.

९. शब्दालङ्कारविवेकः.

R. No 192.

Palm-leaf $17\frac{1}{4} \times 1\frac{1}{8}$ inches. Foll. 77. Lines, 6 in a page. Telugu. Much injured.

Presented in 1910-11 by Prayāga Sītārāma Śāstri.

कुवलयानन्दः.

KUVALAYĀNANDAḤ.

A rhetorical work based on the Alaṅkāra chapter of Jayadēva's Candrālōka: by Appayadīkṣita.

Contains up to Vyājōktyalaṅkāra.

R. No. **193.**

Palm-leaf. 19⅜ × 1½ inches. Foll. 15. Lines, 8 in a page. Telugu. Good.

Presented in 1910–11 by **Prayāga** Sītārāma Śastri.

(*a*) **दक्षिणामूर्त्युपनिषत्.**

DAKṢIṆĀMŪRTYUPANIṢAD.

Fol. 1.

Same work as the one described under No. 535 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*b*) **योगतत्त्वोपनिषत्.**

YŌGATATTVŌPANIṢAD.

Fol. 2*a*.

Same work as the one described under No. 740 of the D.C.S. MSS., Vol. I, Part III.

Contains stanzas 1, 2 and from 132 to the end.

(*c*) **कैवल्योपनिषत्.**

KAIVALYŌPANIṢAD.

Foll. 2*a*—3*a*.

Same work as the one described under No. 395 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*d*) **नारायणोपनिषत्.**

NĀRĀYAṆŌPANIṢAD.

Fol. 3*a*.

Same work as the one described under No. 561 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(e) प्रणवार्थप्रकाशिका.

PRAṆAVĀRTHAPRAKĀŚIKĀ.

Foll. 4a—6b.

A commentary on the syllable ओम् according to the Advaita Vēdānta: by Brahmānandayōginātha.

Complete.

Beginning:

प्रणवप्रतिपाद्याय तदतीताय च(व)स्तुतः ।
हरये गुरवे प्रत्यक्चेतनाय नमो नमः ॥

ननु सर्वेषु वेदान्तेषु ज्ञानादेव तु कैवल्यम्—तमेवं विदित्वा अमृतत्वमेति । नान्यः पन्था विद्यतेऽयनाय । ज्ञात्वा देवं सर्वपाशावहानिः । तरति शोकमात्मवित् । ब्रह्म(वि)द् ब्रह्मैव भवति । यः साक्षादपरोक्षाद्ब्रह्मेत्यादिश्रुत्यादिभिरात्मसाक्षात्कारस्यैव मुक्तिहेतुत्वं प्रतिपादितम् । स चात्मा प्रणवरूपः प्रतिपाद्यः, ततः यो वेदादौ स्वरः . . श्वरः इति श्रुत्या सर्वेषां वेदान्तानां प्रणवमूलकत्वात् ।

End:

श्रीगुरोर्मुखात् स्वयमात्मानं यो वेत्ति स एव कृतार्थ इति डिण्डिमः । अयमेव राजयो(ग ओ)मित्युच्यते । सांख्यतारकामनस्कादियोगैः बहुशब्दैरपदमेव शास्त्ररहस्येषूच्यते ॥

इदमश्रद्दधानाय नास्तिकाय शठाय च ।
न देयं सर्वदा तत्त्वमेवं हि शिवशासनम् ॥

Colophon:

इति ब्रह्मानन्दयोगिनाथेन्द्रविरचिता प्रणवार्थप्रकाशिका संपूर्णा ॥

(f) महावाक्यविवरणम्.

MAHĀVĀKYAVIVARAṆAM.

Foll. 6b—8a.

Similar to the work described under No. 4710 of the **D.C.S.** MSS, Vol IX.

Complete.

Beginning:

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥
तद्देशतत्कालभागान् हित्वा वाचार्थलक्षणा ।
तदैव चैतद्देशतत्कालभागान् विहाय च ॥
लक्ष्यभूतो देवदत्तो वाक्यार्थस्तु यथा भवत् ।
तथैव च महावाक्ये वाच्यार्थस्तत्तदन्वये ॥
मायातत्प्रतिबिम्बित्वसर्वज्ञत्वादयो गुणाः ।
त्वंपदस्य च वाच्यार्था ये च कर्तव्यपूर्वकाः ॥

End:

तस्मादिमं महावाक्यविवेकब्रह्मबोधकम् ॥
यस्तं शृणोति पठति पठेत् सर्वविचारकृत् ।
स मन्दोऽपि कृतार्थः सन् जीवन्मुक्तो भवेन्नरः ॥

Colophon:

इति श्रीवाक्यविवरणं संपूर्णम् ॥

(*g*) **कैवल्यस्थानम्.**

KAIVALYASTHANAM.

Fol. 8 r.

This describes the condition and characteristics of one who has attained to the kind of salvation known as Kaivalya.

Beginning:

कैवल्याङ्गं शिखिस्थानं निर्गुणं च तथैव च ।
आत्मन्यवस्थायुक्तानि अभिमानी निरञ्जनः ॥
निरालम्बं स्थानसंज्ञ एकारं मातृकाक्षरम् ।
सूक्ष्मवेदं च दैवत्वं सदाशिवमिदं स्मृतम् ॥

End:

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥

(*h*) तत्त्वंपदविवरणम्.

TATTVAṀPADAVIVARAṆAM.

Fol. 8*b*.

This investigates into the meaning of Tat and Tvam occurring in the Upanisadic sentences like Tattvamasi.

Complete.

Beginning:

अथ तत्पदवाच्यार्थो नाम योऽयमक्षिणीक्षणपुरुषः योऽयं वितान-मयः तस्माद्वा एतस्मादाकाशः अद्भ्यः पृथिवी(दृ)श्यते इत्यादितत्तल्ल-क्षणोक्तः । एको वा इमानि भूतानि जायन्ते तद्ब्रह्मेति श्रुतेः सर्वज्ञत्व-सर्वेश्वरत्वसर्वनियन्तृत्वसर्वपरिपालकत्वसर्वान्तर्यामित्वादिधर्मविशिष्टः ।

End:

एतत्क्रमेण त्वंपदतत्पदयोर्लक्ष्यार्थं पुरस्कृत्य अन्वयं साक्षिभूतः सन् प्रत्यगात्माभिन्नतया स्वयंज्योतिरेव सच्चिदानन्दस्तिष्ठति ॥

Colophon:

पदविवरणम् ॥

(*i*) तत्त्वबोधः.

TATTVABŌDHAḤ.

Foll. 8*b*—11*b*.

Same work as the one described under No. 4585 of the D.C.S. MSS., Vol. IX.

Complete.

(*j*) ब्रह्मनामावली.

BRAHMANĀMĀVALĪ.

Foll. 11*b*—12*a*.

A collection of certain significant names of the Supreme Being expressing the identity of the individual and the supreme souls: by Śankarācarya.

Complete.

Beginning:

तद्वत् यथाज्ञानं प्राप्य तदैव सर्वकर्माणि तिध्वी(तीर्त्वा)मत्तः ।
सकृच्छ्रवणमात्रेण ब्रह्मज्ञानं यतो भवेत् ।
ब्रह्मनामावलीमाला सर्वेषां मुक्तिसिद्धये ॥
असङ्गोऽहमसङ्गोऽहमसङ्गोऽहं पुनःपुनः ।
भूतानन्दस्वरूपोऽहमहमेवाहमव्ययः ॥
नित्यशुद्धविमुक्तोऽहं निराकारोऽहमव्ययः ।
सच्चिदानन्दरूपोऽहमहमेवाहमव्ययः ॥

End:

अन्तर्ज्योतिर्बहिर्ज्योतिः प्रत्यक्ज्योतिः परापरः ।
ज्योतिर्ज्योतिः स्वयंज्योतिरात्मज्योतिः शिवोऽस्म्यहम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य . . ब्रह्मनामावलीस्तोत्रं संपूर्णम्॥

(*k*) **राजयोगसिद्धान्तरहस्यम्.**

RĀJAYŌGASIDDHĀNTARAHASYAM.

Foll. 12*a*—15*b*.

Similar to the work described under No. 4377 of the D.C.S. MSS., Vol. IX

Adhyāyas one and two.

Beginning:

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुरेव स्वनामतः ।
न गुरोरधिकं किंचित् त्रिषु लेकेषु विद्यते ॥
आत्मविद्याविहीनस्य विद्याजालं निरर्थकम् ।
कण्ठसूत्रविहीनायाः कामिन्या भूषणं यथा ॥

* * * *

उत्तमं लययोगं च मध्यमं ध्यानधारणम् ।
अधमं तीर्थयात्रादिपूजनं त्वधमाधमम् ॥

* * * *

ज्योतिर्मयं चिदानन्दमवाङ्मनसगोचरम् ।
चिन्तयित्वा चिदाकाशं निराकारं निरञ्जनम् ॥

Colophon:

इति राजयोगसिद्धान्तरहस्ये शिवानन्दानुभवे राजयोगामृते पार्वत्युपदेशयोगो नाम प्रथमोऽध्यायः ॥

End:

आदौ सूक्ष्मेण लक्ष्यन्ति लक्ष्यं कृत्वा पुनःपुनः ।
पूर्णलक्ष्येण दर्शित्वात्पूर्णज्योतिः प्रकाशते ॥

Colophon:

इति श्रीराजयोगसिद्धान्तरहस्ये शिवानन्दानुभवे राजयोगामृते पार्वत्युपदेशयोगो नाम द्वितीयाध्यायः ॥

R. No. **194.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 33. Lines, 5 in a page. Telugu. Much injured.

Presented in 1910-11 by Prayaga Sitarāma Śastri.

(*a*) किरातार्जुनीयव्याख्या.

KIRĀTĀRJUNĪYAVYĀKHYA.

Foll. 1*a*—11*a*. Fol. 11*b* is blank.

A commentary on Bhāravi's epic poem. Kirātārjunīya: by **Mallinātha.**

Contains the sixth Sarga only.

(*b*) किरातार्जुनीयम्.

KIRĀTĀRJUNĪYAM.

Foll. 12*a*—15*b*.

Contains the seventh Sarga only.

(c) ఆంధ్రనామసంగ్రహము.

ĀNDHRANĀMASAṄGRAHAMU.

Foll. 16a–20a. Fol. 20b is blank.

See for remarks the Telugu part of the Triennial Catalogue.

(d) चम्पुरामायणम्.

CAMPURĀMĀYAṆAM.

Foll. 21a–31a. Fol. 31b is blank.

By Bhōjaraja.

Contains Bālakaṇḍa and Āraṇyakaṇḍa, both incomplete.

(e) पञ्चायुधस्तवः.

PAÑCĀYUDHASTAVAḤ.

Fol. 32a only.

Same work as the one described under R. No. 173 (j) *ante*.

Complete.

(f) भजगोविन्दस्तवः.

BHAJAGŌVINDASTAVAḤ.

Foll 32b—33b.

By Śaṅkarācārya.

Incomplete.

R. No. **195**.

Palm-leaf 17¼ × 1⅜ inches. Foll. 17. Lines, 6 in a page. Telugu. Very much injured.

Presented in 1910–11 by Prayāga Sītarama Śāstri.

कुमारसंभवः—सव्याख्यः.

KUMĀRASAMBHAVAH WITH COMMENTARY.

The author of the commentary is Mallinātha.

Wants beginning and end in the commentary for the first Sarga.

R. No. **196.**

Palm-leaf. 8 × 1¼ inches. Foll. 12. Lines, 5 in a page. Telugu. Injured.

Presented in 1910-11 by T. Rāmānuja Rao of Triplicane.

आचार्यध्यानश्लोकाः.

ĀCĀRYADHYĀNAŚLŌKĀH.

Meditations on some teachers of Śrī-Vaiṣṇava religion. Incomplete.

Beginning:

अस्मद्गुरुभ्यो नमः । अस्मत्सर्वगुरुभ्यो नमः ।

वाधूलवेङ्कटाचार्यतनयं विनयोज्ज्वलम् ।
वेङ्कटार्यं कृपापात्रं भावनाचार्यमाश्रये ॥
श्रीमन्तं श्रितमन्दारं श्रीभावगुरुनन्दनम् ।
श्रीमत्तदङ्घ्रिशरणं श्रीवेङ्कटगुरुं भजे ॥

End:

विश्वावस्वभिधानहायनवरे मासे नभस्येऽनघे
श्रीशैलेशमहोत्सवश्रुतिगुरोर्वारे विशाखोडुनि ।
जातं श्रीनरसिंहसूरितनयं हारीतवंशाम्बुधि-
प्रालेयांशुमहं भजामि रघुनाथार्यं कृपावारिधिम् ॥

R. No. **197.**

Palm-leaf. 16 × 1½ inches. Foll 55. Lines, 7 in a page. Telugu. Injured.

Presented in 1910-11 by Devulapalli Veṅkaṭappa Śastri of Repalli, Guntur district.

काव्यप्रकाशिकाटीका.

KĀVYAPRAKĀŚIKĀṬĪKĀ.

By Sarasvatītīrthayati.

A commentary on Mammaṭa's Kāvyaprakāśa written at Benares: by Sarasvatītīrthayati, a Sannyāsin, whose name, before

taking up the order, was Narahari. The author was the son of Mallinātha, grandson of Narasimhabhaṭṭa, and great grandson of Rāmēśvara of Śrīvatsagōtra He was the younger brother of Nārāyaṇa and was a native of Tribhuvanagiri in the Telugu country. This is the same work as the one noticed under No. 1139 on page 325 of the India Office Library Catalouge. The stanzas giving the year and the position of the planets at the time of the birth of the author are corrupt and obscure.

Breaks off in the fifth Ullasa

Beginning:

लक्ष्मीं तनोतु नितरा . . शतधारधुरंधरं नः ॥

ब्रह्माण्डस्तूयमानस्फुरदुरुमहिमावर्जिताशेषलोकः
स्वान्तःसाक्षात्कृतश्रीदशरथतनयः सेवकौघामरेन्द्रः ।
रामाज्ञात्यक्तकन्थाकटिकलितलसत्सूत्रकौपीनदण्ड.
दीव्यत्याशापटीकः स हरिहरमहाभारतीयोगिराजः ॥

फलमिव सुकृतानां लोकधात्र्याः समस्तं
विगलितमिव भूमौ नाकलोकस्य खण्डम् ।
नगरमपि गरीयः सर्वसंसारसारः
त्रिभुवनगिरिनामा तत्र . . . . . ॥

तत्राभवत्सकलशास्त्रविचारपात्रः
श्रीवत्सगोत्रसुरकाननपारिजातः ।
अन्यद्विधातुमवलम्बनमात्मवाचां
रामेश्वरः कविकलङ्ककथान्तरायः ॥

आसीत् प्रमाणपदवाक्यविचारशीलः
साहित्यसूक्तिबिसिनीवलयाग्रहस्तः ।

ब्रह्मामृतग्रहणनाटितलाभवृत्ति-
स्तस्यात्मजो निपुणधीर्नरसिंहभट्टः ॥
तस्मादचिन्त्यमहिमा महनीयकीर्तिः
श्रीमल्लिनाथ इति शास्त्रमतिर्बभूव ।
यः सोमयागविधिना (क)लिखण्डनाभि-
रद्वैतसिद्धिमिव सत्ययुगं चकार ॥
लक्ष्मीरिव मुरारातेः पुराराते रिवाम्बिका ।
तस्य धर्मवधूरासीन्नागाम्बेति गुणोज्ज्वला ॥
ज्येष्ठस्तदीयतनयो विनयोदितश्री-
र्नारायणोऽभवदशेषनरेन्द्रमान्यः ।
वाग्देवताकमलयोरपि यस्य गात्रे
सीमाविभागकलहो न कदाऽपि शान्तः ॥
विरिञ्चेः पर्यायो भुवि सदवतारः फणिपतेः
त्रिदोषा दोषाणां सकलगुणमाणिक्यजलधिः ।
अवाचां प्राचां वा सकलविदुषां मौलिकुसुमं
कनीयांस्तत्सूनुर्जयति विभुमानो नरहरिः ॥
दण्डवस्तुग्रहग्रस्ते ब्रह्मणा समलङ्कृते ।
काले नरहरेर्जन्म कस्य नासीन्मनोहरम् ॥
तत्काले सह मङ्गलेन गुरुणा मित्रेण लेभे वणिक्
राशिप्ण (स्थ)प्रमदाश्रयेण समभूदुच्चैस्सुकाव्यो बुधः ।
तत्केतुः शुभहेतवे द्विजपतिर्जातः कुले(ली)रागतः
मैत्रं शान्तिमयं वलेस(?) कलशं जन्मोत्सवालं बरोः (?) ॥
विचार्य दुःखं सुखमेव दुःखं सुधामये ब्रह्मणि लोलुपः स्यात् ।
सत्यस्य सत्त्वस्य बभूव सार्थो सरस्वतीतीर्थयतिः प्रसिद्धः ॥

तर्के कर्कशकेलिना बलवता वेदान्तविद्यावने
मीमांसागुणमांसलेन परितः सांख्येष्वसंख्योक्तिना ।
साहित्यामृतसागरेण फणिनो व्याख्यासु विख्यावता
काश्यां तेन महाशयेन किमपि ब्रह्मामृतं पीयते ॥

काश्यां सरस्वतीतीर्थयतिनाथेन रच्यते ।
टीका काव्यप्रकाशस्य बालचित्तानुरञ्जनी ॥

ननु नियतीत्यादिरादिश्लोकोऽनुपपन्नः, प्रारिप्सितकाव्यमीमांसाशास्त्रे-ऽनुपपन्नत्वादित्याशङ्क्य प्रारिप्सितग्रन्थपरिसमाप्तिपरिपन्थिविघ्ननिरास-हेतुनमस्कारलक्षणमङ्गलाचरणप्रतिपादकत्वादुपपन्न एवेत्याह – ग्रन्थारम्भ इत्यादि । समुचिता एतच्छास्त्रप्रतिपाद्या इष्टा च या देवता भारती तां काव्यमीमांसाकृत् सर्वोत्कर्षेण स्तौति । नियम्यते कमलसौगन्ध्यादि कमनयेत्यसाधारणो धर्मः ।

End:

एवमन्येऽपि भेदा उदाहर्तव्या इत्याह—एवमिति ।

Colophon:

इति श्रीसरस्वतीतीर्थयतीश्वरविरचितायां काव्यप्रकाशिकाटीकायां चतुर्थ उल्लासः ॥

एवं सप्रपञ्चोत्तमकाव्यस्य निरूपणानन्तरं मध्यमकाव्यस्य प्रपञ्चो युक्त इति चतुर्थपञ्चमोल्लासयोः संगतिं कथयन् उत्तरसूत्रमवतारयति---एवमिति ।

* * * *

इन्द्रजिल्लोकान्तरं प्रापितोऽत्र केनापि राक्षसपतेः रावणस्य कण्ठा उविक्र(त्क)त्ताः छिन्नाः । अत्र प्रकृतोपयुक्तमंशमाह—अत्रेति । केनापी-त्युक्तः । मयेति व्यङ्ग्यं झटि ।

R. No. 198

Palm-leaf. 17 × 1⅜ inches. Foll 35. Lines, 6 in a page. Telugu. Injured.

Presented in 1910-11 by T. Rāmānuja Rao of Triplicane

(*a*) प्रयोगरत्नम्.

PRAYŌGARATNAM.

Foll 1*a*—27*a*.

On the conduct of household religious ceremonies: by Nārāyanabhatta, son of Rāmēśvarabhatta.

Wants beginning and end

Beginning:

कृत्वा क्रमेण आदित्यादीशानान्तेभ्यः . . . .
समिदाज्यैः प्रागुक्तसंख्याकाहुतीर्जुहुयात् । . . . .
विपश्येम न चक्षसे स्वाहा । उदु त्यमिति मन्त्रस्य कण्वपुत्रः प्रस्कण्वः सूर्यो गायत्री । उदु त्यं जातवेदसं (देवं वहन्ति) केतवः । दृशे विश्वाय सूर्यं स्वाहा । नमो मित्रस्येति मन्त्रस्य सूर्यपुत्रः अभीतपाः सूर्यो जगती ।

* * * *

एवमन्येषामपि यदि स्वगृह्यादावुक्तः तदा स एव । येषां तु गृह्यादौ नोक्तः तैर्याज्ञवल्क्यादिस्मृत्युक्तः मत्स्यपुराणाद्युक्तो वाऽनुष्ठेयः । स्मृत्यादेः साधारण्यादिति दिक् ।

Colophon:

इति श्रीमद्विद्वन्मकुटमाणिक्यश्रीरामेश्वरभट्टसूनुश्रीनारायणभट्टकृते प्रयोगरत्ने नवग्रहमखप्रयोगः ॥

End:

नित्यनैमित्तिकं काम्यं यच्चान्यन्मोक्षसाधनम् ।
विष्णोः समर्पितं सर्वं सात्त्विकं सफलं भवेत् ॥

गीतायाम्—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय सर्वं कुरु मदर्पणम् ॥ इति ।

विहितमिति शेषः । इत्यादि । एवमन्या अपि परिभाषा ज्ञेयाः ॥

Colophon:

इति श्रीनारायणभट्टकृते प्रयोगरत्ने परिभाषाधिकरणम् ॥

* * * *

द्वित्राद्यशुभे संनिपाते तत्सूचितबहुशुभनिरासार्थं वक्ष्यमाणमाहुतिसंख्यादिविवृद्ध्या कार्या यथाशक्तीत्यादि ज्ञेयम् ॥

इति शुभाशुभविचारः ॥

(*b*) शान्तिविधिः.

ŚĀNTIVIDHIḤ.

Foll. 27*a*—35*b*.

On the propitiatory ceremonies to be conducted when a woman attains puberty on inauspicious days.

Incomplete.

Beginning:

अथ शान्तिविधिरुच्यते—तत्रैवं विनायकं (सं)पूज्य गृहांश्चैवंविधानतः । कर्मणां फलमाप्नोतीति कर्मफलसिद्धौ अविघ्नार्थत्वेन ग्रहयज्ञस्यानावश्यकतोक्तेः ।

End:

नमः सस्पिञ्जराय त्विषीमते पथीनां पतये ॥

R. No. **199.**

Palm-leaf. 17⅜ × 1½ inches. Foll 58. Lines, 6 in a page Telugu. Injured.

Presented in 1910–11 by A. Ullakki Śāstri of Guntur.

ग्रहलाघवम्—सान्ध्रटीकम्.

GRAHALĀGHAVAM WITH TELUGU ṬĪKĀ.

A compendium of astronomical calculations: by Gaṇēśa, son of Kēśava.

Breaks off in Sphuṭādhikāra.

Beginning:

ज्योतिःप्रबोधजननी परिशोध्य चित्तं तत्सूक्तकर्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकृतैरुपायैर्व्यक्तीकृता जयति केशववाक्पतिश्च ॥

परिभग्नसमौर्विकेशचापं दृढगुणहारलसत्सुवृत्तबाहुम् ।
सुफलप्रदमात्तनृप्रभं तत्स्मर रामं क(श)रणं च विष्णुरूपम् ॥

यद्यप्यकार्षुरुरवः करणानि धीरास्तेषु ज्यकाधनुरपास्य न सिद्धिरस्मात् ।
ज्याचापकर्मरहितं सुलघुप्रकारं कर्तुं ग्रहप्रकरणं स्फुटमुद्यमो(तो)ऽस्मि ॥

End:

तत्कालोऽर्कस्सायनस्वेदयग्नभाग्यांशाखत्सृद्धृता(तो) भाग्यकालः ।
एवं यातांशैर्भवेद्यातकालो भोग्यश्शोध्याभीष्टनाडी फलेभ्यः ॥

R. No **200**

Śrītāla. 12⅞ × 2⅛ inches. Foll. 60 Lines, 10 in a page. Grantha. Good.

Presented in 1910-11 by S. Rāmakṛṣṇavādyār of Palghat.

Foll. 1—6 are blank.

छान्दोग्योपनिषद्भाष्यम्.

CHĀNDŌGYŌPANISADBHĀSYAM.

